Muni Shri Mohanlalji Jain Granthmala No. I.

THE

PARSHWANATH CHARITA

BY

SHRI HEMVIJAI GANI

EDITED BY

Pt. Velsingha Nyaya Vyakaran Tirth,

UNDER THE PATRONAGE OF

Bhikhi Bai widow of Chunni Lal son of Panna Lal

OF

BOMBAY.

PUBLISHED BY HARSH PARISHAD,
BENARES.

Veer-Era 2442

PRINTED BY PT. ATMA RAM SHARMA,
at the George Printing Works, Benares City.

अर्हम्

श्रीयुतमान्यवरश्रेष्ठिचुन्नीलालपन्नालाल



पात्रेभ्यो दानदातुः सुमधुरवचसो नीतिमार्गानुगस्य
मान्यस्य मानयोग्यैः सकरुणमनसो जैनधर्मानुगस्य ।
कृष्णाब्दाद् यद् विमुच्य स्वपतिमधुरिपुं श्रीयुतस्यादमुष्य
दूरं यया दिगन्तं समगमदचिराद् भामिनी कीर्तिरूपा ॥१॥

(N P V C)

जन्म १९०५ विक्रमाब्द-वैशाखकृष्णतृतीयायाम्, निर्याणम् १९५९ विक्रमाब्द-ज्येष्ठशुक्लपौर्णमास्याम्

S. L. N. Press, Benares.

प्रस्तावः ।

कः खल्वहमप्यस्मि कश्चन पुरुष इति पुरुषत्वाभिमानी परमार्हती-ष्य मानधराधरसमास्फोटितचारित्रपोतम्, मायाभामिनीभ्रुकुटीभङ्गभीष-मकरीदुराटोपपुच्छच्छटोच्छालितप्रमादशीकरान्धकारितज्ञानेक्षणकाष्ठम्, ततस्ततः परिसर्पद्दुस्त्यजज्वालाजालजटिलकोपव्यालसंदष्टानेकमार्गधार-डम्बितम्, दुःखलोलुपाहंकृतिप्रचण्डावर्तदुरवगाहम्, दुर्बोधलोभ-नक्रचक्रभीषणम्, जीवाजीवादिद्रव्यपर्यायपाथस्तरक्रमकरमपूरितम्, सं-सृतिपारावारं समुत्तितीर्षुः संबुभुक्षुश्चानन्तचतुष्टयानन्दम्, कारिकाम-षक्लेशाविच्छेदनस्य, दारिकां भवसन्ततेः, विधायिनीं निःशेषदोषमो-क्षस्य, दर्शयित्रीं पारमार्थिकधर्मस्य, आबिभ्रतीं निःसर्गसौन्दर्यम्, स्रष्टुतां रसैः, परमपवित्रां कालदोषतः कीटैरुपभुज्यमानामन्धतमसे नैपतितां मातरमिव जैनीं भारतीं समुद्धर्तुं न यतेत ! । एवं च बुद्धिष्ठानां न्यासपदधारिणाम्, प्रपादानां करुणारसस्य, तीर्थानां चातुर्वेद्यानाम्, रोहणाचलानां गुणगणरत्ननिकरस्य, उद्धारकाणां भव्यजनस्य, प्रेष्ठानां निजनलक्ष्मीकस्य विश्वजनीनवृत्तीनां गुरुगुरूणां तत्रभवतां पन्यास-श्रीहर्षमुनीन्द्राणां प्रशिष्यः शिष्यश्च विदुषां श्रीमतां जयमुनि-महाराजानां सिद्धहैमव्याकरणपारदृश्वा चारित्रपात्रं शान्तात्मा संसा-रान्धकूपपातिकाभिर्निःसीमलोभवृत्तिभिर्धनादेरदातॄन् दानशीलादिशुभान् निमतालिकान् निन्दयद्भिर्दातॄंश्चोन्मार्गगामिनः प्रत्यक्षतो दृश्यमान-दोषान् प्रशंसयद्भिर्मातुरुद्धारेऽपि संसारपरम्परावर्धके वैरमाभिर्जनैः वैशार्चीयमहत्त्वाकाङ्क्षामात्रेण स्वमातरमिवार्हतीं भारतीं निष्ठुरं विघ्नं-यद्भिर्महापुरुषैर्विघ्नसहस्रैः प्रतिहन्यमानोऽपि "विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः प्रारब्धमुत्तमजना न परित्यजन्ति" इमां जनविश्रुतां श्रुतिं सत्यत्वेन प्रतिष्ठापयन् "न जातु कामाद् न भयाद् न लो-भाद् । धर्मं त्यजेज्जीवितस्यापि हेतोः" इति वैदीं वाचमनुरुन्धानश्च 'येन केनाऽपि मार्गेण जैनं प्रवचनं भजेत्' इत्यभियुक्तोक्तिं समस्य तत्र

विहायेममन्यानपि विजयप्रशस्तेः षोडशसर्गी, कथारत्नाकरः, कीर्तिकल्लोलिनी, अन्योक्तिमहोदधिः, सूक्तरत्नावली, विजयप्रकाशः स्तुतित्रिदशतरङ्गिणी, कस्तूरीप्रकरः, शाङ्गावशतकम्, विजयस्तुतय [illegible]

[illegible]

नैतत् प्रामाण्यकोटौ श्रीगुणविजयगणीनां वचःसन्दोहाः, तथा च विजयप्रशस्तेष्टीकाप्रशस्तौ—

"अथो बृहद्गुरोः शिष्यो गुरोश्च गुरुसोदरः ।
श्रीहेमविजयोऽभिज्ञो जज्ञे कविषु कुञ्जरः ॥४७॥
श्रीहेमसुकवेस्तस्य हेमसूरेरिवाभवत् ।
वाग्लालित्यं तथा देवे गुरौ भक्तिश्च भूयसी ॥४८॥
यदीया कविता कान्ता न केषां कौतुकावहा ? ।
विनापि हि रजो यस्माद् यशःसुतमसूत या ॥४९॥
तेन श्रीविजयसेनसूरेः सर्वज्ञचित्तहृत् ।
स्वर्गकल्लोलिनीतुल्या कीर्तिकल्लोलिनी कृता ।५०।
अन्येऽपि स्तुतित्रिदशतरङ्गिण्यादयो घनाः ।
रचयांचक्रिरे ग्रन्थाः स्तोत्राणि शतशः पुनः ॥५१॥
चतुर्विंशत्यर्हतां च, विजयस्तुतयः पुनः ।
बाल्येऽप्यबालधीगम्यं श्रीपार्श्वचरितं महत् ॥५२॥
शाङ्गावशतकं चापि कस्तूरीप्रकरः पुनः ।
सूक्तरत्नावलिश्चाप्यन्योक्तिमुक्तामहोदधिः ॥५३॥
धर्मो धर्मेतरो येन कथारत्नाकरः स्फुरन् ।
कथाकपापीयूषलुब्धानां विबुधानां मनो हरन् ॥५४॥
इत्यादिग्रन्थविधौ सौधे कलशाधिरोपणसवर्णम् ।
विजयप्रशस्तिकाव्यं तेन कृतं विजयसेनगुरोः ॥५५॥

---

१ इमे श्रीगुणविजयगणिभिः श्रीहेमविजयकृते विजयप्रशस्तेः [illegible] सर्गादि [illegible] गतिनुपगमिष्यत्यावसरिऽपि [illegible] निर्दोषं सम्पूर्णेन विजयप्रशस्तिः, तस्य च पेक्षा च हेमविजयगणिकृतग्रन्थानां विजयप्रशस्तेष्टीका अपि कृता विवेचकाः ।

अधिकृतमत्र कोपसरीसृपे जाङ्गुलीमन्त्रायमाणस्य रागादिविद्वं
दावानलस्य विषयग्रामनावासमहीरुहोन्मूलने गजेन्द्रनामाद्धानस्ये
धृतबालतपःप्रभावशठकमठज्वालितोल्वणज्वालज्वालाजिह्वज्वालादग्ध
भुजङ्गस्यावधूय तृणवत् साम्राज्यलक्ष्मीं निर्जित्य मोहमर्दापनिनकल्पूरं
ध्यानाशुशुक्षणिनिर्दग्धानि.शेषक्लेशमूलस्य पारमार्थिकं धर्ममजानानै
तिमीपणेऽनाद्यनन्तागाधसमृतिसरित्पतौ मज्जनोन्मज्जनैर्विह्वलीभवद्भिः
कृतमायैर्जनैर्देवधिया पूजितैरपीन्द्रादिभिर्भक्तिभरेणाद्यमहाभिक्या सेव्यमा
नचरणद्वन्द्वस्य विहारवाननिर्वाणेनेत्यादिरजःसमूहस्य त्रयोविंशतीर्थक
स्य निःसीमकरुणापरस्य श्रीपार्श्वनाथस्याऽऽबोधिबीजं दशभव्याः-याव
मोक्षं चरितम् । व्यावर्णितं सुधासहोदररमणीयानि.स्याम्दिभिः सुसंग
वाक्यसन्दोहैः सद-लङ्कृतीनि पद्यानि सर्गबन्धेनोपनिबध्नद्भिः कविवि
र्नग–नगराऽऽर्णवनायकादिवर्णनीयनिकुरम्बस्यावर्णनेन यथामहाकाव्य
स्वरूपम् । यद्यपि

सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम् ।
आशीर्नमस्क्रियावस्तुनिर्देशो वाऽपि तन्मुखम् ॥१॥
इतिहासतथोद्भूतमितरद्वा सदाश्रयम् ।
चतुर्वर्गफलोपेतं चतुरोदात्तनायकम् ॥२॥
नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः ।
उद्यानसलिलक्रीडामधुपानरतोत्सवैः ॥३॥
विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः ।
मन्त्रिदूतप्रयाणाजिनायकाभ्युदयैरपि ॥४॥
अलङ्कृतमसंक्षिप्तं रसभावनिरन्तरम् ।
सर्गैरनतिविस्तीर्णैः श्राव्यवृत्तैः सुसन्धिभिः ॥५॥
सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जकम् ।
काव्यं कल्पान्तरस्थायि जायेत सदलंकृति' ॥६॥इति

महाकाव्यलक्षणैर्लक्षितत्वेऽपि कर्तृभिरस्य कुत्रापि महाकाव्यत्वे
नोल्लेखाभावे प्रथमे वयसि विहितत्वं कृतेश्च प्राथमिकत्वमन्तरेण नान्य

किञ्चिद् निमित्तमुत्पश्यामः । न च सर्वत्र सर्गान्ते लेखकविस्मृतिरभि-
धातुं योग्या, संहितेरनिवार्यप्रसरत्वाद्-लेखकस्य विस्मरणमुताहो ग्रन्थ-
कारस्यानभिधानमिति । न चैवं तथा चोभयमप्यसिद्धम्, सर्वत्र विस्म-
रणस्याकल्पनीयत्वेनोत्तरकल्पनायां बाधकोन्मूलनाद्-बाधकस्य-संशय-
स्य समूलकाषं कषणाद् । एवां कवीनां समीक्ष्य बुद्धिपाटवं गुरवो बाल्य
एव गणिपदं समार्पिपाविति वक्तुं सुशकम्, "बाल्येऽप्यबालधीगम्य-
द"इत्यादिनाऽस्य बाल्ये विधानस्य संसिद्धेः सर्गान्ते च सर्वत्र हेमविजय-
गणिविरचित इत्यभिहितत्वाद् । यद्वा विद्योत्कर्षत्वात् पदस्य च भावित्वात्
तदभावेऽपि स्वयमेव तत्तद्धितस्य स्वस्नामोल्लेखस्य सुकरत्वाद् गणिपद-
प्राप्त्यैव तदुल्लेख इति निर्धारयितुं न शक्यते, दृश्यन्ते खलु विद्वांसो
भाविनी भूतवदुपचारयन्तः स्वेन पदं प्रापयन्तश्च । केचिदिदानी-
न्तनीमेव सत्प्रणाली मन्यमानाः जवनिकायोपायमाणाः निन्दयन्त्यर्वाची-
नान् प्रशंसयन्ति च प्राचीनान् तद् बालिशप्रयोगप्रायमयुक्तम्,तदातने-
ष्वपि तत्कल्पनेन विपरीतविकल्पस्यापि शक्यत्वाद् । आयास्यति खलु
तादृशः समयो यस्मिन्निदानीन्तनानामिदानीं प्राचीनानामिव सर्वं या-
थातथ्येनैव प्रतिभाविषयं नेष्यन्तीति, यथेदानीन्तनमसत्यमपि सत्यत्व-
कोटौ संगंस्यते तथा प्राचीनमसत्यं सत्यत्वेन प्रतिभातीति किं न मन्य
से ? । न चैवं सर्वथैव चिरंतनेषु असत्यमेव सत्यत्वेनाधुना प्रतीति-
विषयमेतीति निश्चेयम्, किं तर्हि ? यत्किञ्चित् प्राचीनं सर्वथा सत्यत्वेना-
वगमय्य पण्डितंमन्यत्वप्रसिद्धये सर्वथैवदानीन्तनेष्वसत्याक्षेपो मन्दमत्यर्दः;
योग्योऽदक्षमपि योग्यं पदं स्वस्मिन् स्वेन प्रयुञ्जीत न तं दोषार्हं वि-
जानीयाः किं पुनः सुयोग्यं प्राप्तपदकं स्वेन विधयैव वा । इमे हि
गणयोऽनुगणिपदेऽधिकेनामिदं धारेते अपम्युरित्यपि नायुक्तिमुक्तम् ।
यद्यप्यादिमत्त्वाद् व्याकरणच्छन्दोऽलङ्कारादिविषया दोषा राहुरिव
पीयूषदीधितिमिमं ग्रन्थं ग्रसन्तस्तथापि तदाधिक्यप्राचुर्याद् न ते
एकान्तेन सुदुरुद्धराः । यत्तु क्वचित् पादस्य समाप्तत्वं क्वचिच्च नवा-
क्षरत्वं सदवद्यं सत्कारणं मुधानघ । सर्वेऽप्यल्पदोषस्य गुणबाहुल्या
दाक्षिप्यन्ते धनतृष्णोत्पन्नमानसानि । विषदानुगमप्यास्मिभेदम्

तिस्मृतिजननस्य, पुनरुपदेशदानेन तयोर्धर्मप्राप्तेश्च वाचोयुक्तिः।
न्ते उपप्लवे सन्दद्य धर्मप्रभावं बहूनां प्रतादानस्य प्रतरा-
स्य च, अष्टापदं प्राप्य सर्वेषां यथास्थानगतेः, मरुभूतेस्तत्तद्गु-
विस्तैस्तैः परिषद्भिर्मोचनापूर्वं विद्वेनश्च वचनम् । कमठस्य मठ-
तेयधेन तापसेभ्यो लोकेभ्यश्च तिरस्कारस्य, आर्तध्यानेन मृत-
कमठस्य कुर्कुटाहिमयप्राप्तेः, पुष्पकालागतेरतिरुपार्तस्य मरु-
नर्दंशितन एकस्मिन् सरोवरे निमग्नतायाः, तत्रागतेन कुर्कुटाहिना
रस्य पण्डितमृत्युना विपद्य मरुभूतार्द्वितीयस्वर्गलाभस्य, देवता-
-शृङ्गारवर्णनस्य, मरुभूतेर्जीवस्य देवत्वं प्राप्तस्य ह्रास्थेन नाम-
हं सवर्णनं वाप्यादिदर्शनस्य, शाश्वतीत्याथं प्रपठ्य पुस्तकं विधाय
पाचादिधार्मिकं कृत्यं मरुभूतेर्विविधभोगासेवनस्य, कुर्कुटाहेः
च्वमायनिगमनस्य, वरुणाया अपि मृत्वा द्वितीयसर्गे यातायाः
स्परानुरागेण देवेन सम्मेलनस्य, तयोरितस्ततो विलासस्य चोक्तिः।

द्वितीये सर्गे ।

पूर्वविदेहस्यसुकच्छविजयस्य वैताढ्यं भूधरम्, तस्यां तिलकां
म्,तद्राजं विद्याधर विद्युद्गतिनामानम्,विद्युद्गतिपत्नीतिलकावतीं च
निविश्या तिलकावतीकुक्षौ स्वर्गाद् मरुभूतिजीवस्य च्यवनम्, तज्ज-
ात्सवम्, किरणवेगेति नामविहितिम्, बाल्ये तल्लालनम्,यौवने पद्मा-
या सह विवाहं राज्यं समर्प्य विद्युद्गतेर्दीक्षास्वीकारम्,राज्यं विदधत'
रणवेगस्य किरणतेजोनाम्नः पुत्रस्योत्पत्तिम्, सुरगुरुनामकस्य
ोरागतिम्,धर्मं श्रुत्वा किरणवेगस्य प्रव्रज्योपादानं च व्याकृत्य गीता-
भूय किरणवेगमहात्मनः पुष्करद्वीपस्य वैताढ्ये गतेः, कुर्कुटाहि-
यस्याप्युद्धृत्य नरकावनेस्तत्रैव सर्पभवनस्य, तत्सर्पदष्टस्य मुने-
र्निपूर्वं पञ्चत्वमाप्य द्वादशे कल्पे यानस्य, यौवनालङ्कृतस्य च
रमेघ समययापनस्य व्याहरणम् । दवाग्निदग्धस्य सैरीसृपस्य
प्रभानाम्नि नरकावनौ यानम्, सुगन्धिविजयस्य शुभंकरायां
र्यां वज्रवीर्यस्य राज्ञः लक्ष्मीवत्याश्च तत्प्रियायाः वर्णनम्, लक्ष्मी-
ीगर्भे किरणवेगजीवस्य द्वादशात् स्वर्गादवतरणम्,तस्य वज्रनाभ
ति नामकरणम्, बङ्गदेशीयचन्द्रकान्तराजस्य विजयाह्वया कन्यया
द्वाहः, वज्रनाममातुलपुत्रस्य नास्तिकस्य कुबेरस्योपवज्रनाममायनं
स्य धैहिकविषयोपदेशाः, तच्छ्रुत्वा गुरोरागममिच्छोर्वज्रनाभस्य
नम्, लोकचन्द्रगुरोरागतिः, उभयोर्वन्दितुं मुनिं यातिः, मुनेरनु

द् क्रीडतो राज्ञ एकदाऽऽयुधशालायां चक्रोत्पत्तिः, तस्य स्नान-पूजन-
स्तुतिविधानम्, राज्ञो जलविहारवर्णनम्, आभूषणाधारणम्, छत्र चाम-
दिशोभितस्य पर्यङ्कस्यधिरोहणम्, ससैनिकस्य षट्खण्डसाधनाय
थमं पूर्वां दिशं प्रति गमनम्, अनुक्रमेण षट्खण्डीसाधने चयानां
धीनां च प्राप्तिः, तदग्रतश्च चतुर्दशानां चक्रिरत्नानां कार्यस्य, राज्ञो
राजैः सह युद्धस्य, पराभूतैस्तैस्तैः स्वोचिताश्वकौर्विविधोपदादा-
स्य, चमूपतेस्तत्र तत्र पुरुषपराक्रमस्य तद्धस्पश्चपोध, निधेवपर्णो-
स्य च वर्णनम् । चक्रवर्तियोग्यसामग्रीसहितस्य स्वपुरागमने तत्र
सुरासुरनरैः विहितस्य राज्ञोऽभिषेकः, रत्नानां जन्मभूकथनम्, रा-
ऽऽकाशे देवसमूहदर्शनम्, वनपालेन जिनागमकथनम्, वनपाल-
पारितोषिकदानं राज्ञो भावना च । जिनाभे राज्ञो गमनम्, भग-
देशना, भगवत्पादपङ्कजमभ्यायमाणान् देवान् समीक्ष्योहापोहेन
: पूर्वभवस्मृतिः, भावनापूर्वं तपस्यादानम्, स्वर्णबाहो राजर्षे-
निरूपणपूर्वं संयमपालनम्, विशेषतः स्थानकानां वर्णनम्, सम्य-
राधितैर्विंशत्या स्थानकैः स्वर्णबाहुना तीर्थकरपदोपार्जनम्, एका-
मो विहर्तुर्मुनेराकाशमार्गेण क्षीरवणाख्यवने गमनम्, तत्र प्रतिम-
स्थितस्य मुनेर्मत्स्याद् निःसृत्य प्राप्तसिंहभवेन कुरङ्गजीवेन सम्मु-
विलोक्य जातकोपाटोपेन घातः, मैत्रीकारुणी भावनां भावयतो मुने-
पव विशत्यम्पायुष्या दशमे स्वर्गे उत्पत्तिः, सिंहजीवस्य मृत्यु-
कप्राप्तिः, स्वर्णबाहुजीवस्य देवभयोचितसुखेन कालनिर्गमश्च ।

चतुर्थः सर्गः ।


जम्बूद्वीपे भरतक्षेत्रस्थानार्यदेशान् संत्यज्य, वाराणसीं नगरीम्,
नृपमश्वसेनम्, वामाख्यां च नृपपत्नीं सम्यग् व्यावर्ण्य वामाकुक्षौ
र्णबाहुजीवस्य चैत्रमासस्य कृष्णचतुर्थ्यामवतारम्, चतुर्दशस्व-
निभालनम्, लब्धस्वप्नया वामादेव्या प्रोक्तां गत्वा प्रोच्य स्वप्नान्
लं पृष्टेन राज्ञा स्वबुद्ध्यनुसारेण वचनम्, प्रातःकाले आकार्य स्व-
पाठकानापृच्छय स्वप्नफलं वितीर्य तेभ्यश्च पारितोषिकं विसृष्टिम्,
वसन्त-ग्रीष्म-वर्षा-शरद्-हेमन्तानामृतूनां लावण्यश्रियम्, समस्विन्यां
मायाः पार्श्वेऽहिदर्शनाद् राज्ञः पार्श्वनामकरणे संकल्पम्, पौष-
ष्णद्वादश्यां भुजङ्गाङ्कस्य भगवतो जननं च व्याकृत्य भगवज्ज-
समये आलोकान्तं प्रकाशस्य, नित्यदुःखवतां नारकाणामपि क्षणं
वासिकायाः, पुष्पप्रकरवृष्टेश्च कथनम् । आसनकम्पेन विभ्रासां दि-

वार्षिकदान-देवेन्द्रागमन-प्रव्रज्योत्सववर्णनम्, पौषकृष्णैकादश्यां मायिकोच्चारः, मनःपर्यायस्य चोत्पत्तिः । देवेन्द्रकृतस्तुतिः, नन्दी-प्रदीपं देवमहोत्सवः, प्रभोः कादम्बर्यामटव्यां गमनम्, तत्र कुण्ड-स्य निभाल्य प्रभुं जातिस्मृतिः, तत्पूर्वभववृत्तान्तः, हस्तिना प्रभोः र्चनं च । प्रभोरग्रे व्यन्तरविरचितनाट्यं समीक्ष्य वनपालिनां चम्पा-धीशाय करकण्डवे निवेदनम्, करकण्डोरभिगमागतिः, प्रभु-दर्शनाय विलपते तस्मै धरणेन प्रतिमार्पणम्, राज्ञा च तत्र चैत्य-मम् । प्रतिदिनदर्शनादुपार्जितपुण्यस्य हस्तिनो मृत्वा तत्राधि-ष्ठायकरूपेण भवनम्, तीर्थस्य च महाप्रभावख्यातिः । शिवापुर्यां स्मृतो-पकारेण धरणेनागत्य प्रभोरुपरि छत्रधारणम्, ततश्चाहिच्छत्रेति नाम्नः प्रसिद्धिः, राजपुरमेश्वरस्य प्रभुं संदृश्य पूर्वभवस्मृतिः, स्व-शिष्यः सविस्तरं पूर्वभवज्ञापनं च । कमठकृतोपसर्गस्य, तदानीं समाहितस्य धरणेन्द्रस्य भक्तेः, धरणेन कमठस्य भापनस्य च नम् । कमठस्य प्रभोः पादयोर्निपत्य क्षमाप्रार्थनम्, प्रभोः केवलज्ञा-[illegible] सपरिवारस्याभ-[illegible] गादिचतुष्टय-जात्या-[illegible] गाथयोश्च व्रतग्रहणं सोमादिभिश्चतुर्भिर्दीक्षार्थं विज्ञप्तेन प्रभुणा तेभ्यः प्रव्रज्यार्पणं पदीदानं च । बलिप्रक्षेपः, सर्वेषां यथायोग्यं तदुपदीतिः, भगवतो यातिः, सचभूतां देवानां, तीर्थाधिष्ठातुः फणिपतेरधिष्ठा-नस्य यथायथा वर्णनम्, प्रभोः प्रभावस्य च वर्णनम् ।

षष्ठे सर्गे ।

पार्श्वनाथस्वामिनः पुण्ड्रदेशे विहृतिम्, सागरदत्तस्य कथानकं वर्णय्य, कासराभ्यां संविधांहत्तां दीक्षां चतुर्णां भगवच्छिष्याणां द्वदर्शने यातिम्, अन्ते च पश्चात्तापं कुर्वतामभेदं च भगवताऽपि-तां केवलप्राप्तिम्, सविस्तरं बन्धुदत्तकथानकं तदन्तश्च श्रीपर-णां च व्याकृत्य प्रभोः परिवारस्य, सम्मेताद्रेः, तत्र च भगवतो ध्या-नस्य, इन्द्रादेरागमनस्य, श्रावणशुक्लाष्टम्यां सह साधुपुरुषैः सिद्धि-सौधाधिरोहणस्य, इन्द्रकृतविलापस्य, तनूदाहकर्मणः, भगवतो दंष्ट्रा-दिग्रहणस्य, स्तुतेश्च वर्णनमिति ।

एतन्मुद्रणे श्रेष्ठिवर्यश्रीचुनीलालो यो हि—



ऐन्द्रं तत् परमं ज्योतिर्योतिमालोपदिग्गुरुम् ।
समस्तं यस्तु पद्माजां दस्तन्यस्तमिवाजनि ॥ १ ॥
नमः श्रीनाभिभूपालकुलाकाशैकभास्वते ।
दर्शयामास च श्यामो सन्मार्गं भानुमानिव ॥ २ ॥
सन्तु श्रीशान्तिनाथस्य शान्त्यै कमनखत्विषः ।
त्वभुवां नमदिन्द्राणीमाले पल्लवलता इव ॥ ३ ॥
कज्जलश्यामलच्छाय श्रीशीघ्रयः शिवाय वः ।
अमेयोऽपि हि य पुष्पं पत्रपादमर्दाददत् ॥ ४ ॥
नमोऽस्तु वर्धमानाय समस्तधर्म महामहिममालिने ।
दलदात्तरविस्मेरस्मयापस्मारकारिणे ॥ ५ ॥
प्रायुनेव ततः पर्वं यत्करं कान्तमाचलः ।
येनाद्गुंफ्तन स्पृष्ट स श्रीपोरः श्रियेऽस्तु वः ॥ ६ ॥
निर्वर्णवर्णिनी यच्चपदन्यासा रसोऽद्भुता ।
कुलाङ्गनेव सार्वज्ञी गौरवं गौरसनोऽस्तु वः ॥ ७ ॥
जयन्ति गुरवो विश्वविद्याविश्वाससंश्रयाः ।
यत्प्रसत्तेरहं प्राप्तं विवर्णोऽपि सवर्णताम् ॥ ८ ॥
जयन्ति कवयः सर्वे धुर्यसाधर्म्यमहोदयाः ।
शिर्षाभया रसाधारा यद्गोगंङ्गेव तापहृत् ॥ ९ ॥
दीप्तस्यमिव शीतांशौ भास्वर्यमिव भास्करे ।
यारसदयं येषु ते सन्तु मयि सन्तः कृपालयः ॥ १० ॥

भव —समार, पक्षे महादेव. । २ धर्मदेवम् । ३ निर्वर्णा—मनोहरा वै वर्णा. —अक्ष-रवती, पक्षे निर्वर्णं —रमणीयो यो वर्णः —अनुरागस्तद्वती । ४ परम्-नवपदन्यासपन्नम्, चतुर्भिर्वा, पक्षे पर. —चरणः ५ रसो वैराग्यात्मकः, पक्षे शृङ्गारात्मक. । ६ विपविद्या-दि । ७ शोभने रसेऽरेव महानुरसो येषां ते । ८ शिरम्—शुभम्, पक्षे यासे तस्मात् । रसः—शान्तसाम, पक्षे जलम् । १० तापः—दुःखम्, पक्षे सन्तापम् ।

कुण्डलीकृतचापेन निधिः कुण्डलिना यथा ॥ २६ ॥
सर्वतो भुवनाम्भोधौ महाद्वीपः परंतपात् ।
सागरतरङ्गपङ्क्त्या यत्र मेरुः पयोजनि ॥ २७ ॥
तत्रासीत् भरतक्षेत्रं क्षेत्रभूरिव सम्पदाम् ।
आवर्जितजनानन्दं [illegible] ॥ २८ ॥
नानाऽऽराम गिरि-ग्रामाभिरामं भाति यद् भुवाम् ।
प्रजिन्वपर्णादिनवमूलं पत्रसंस्थमिव प्युमम् ॥ २९ ॥
आम्नायवन्दनीयं खण्डानि यत्र षट्खण्डाभिभूषणम् ।
[illegible] षट्पदा इव ॥ ३० ॥
तत्राभूत् स्वःपुराकारं नगरं पाटलाभिधम् ।
[illegible] पङ्क्तयः त्रिदशा इव ॥ ३१ ॥
भाति यद्द्वीपतले [illegible] ।
[illegible] यत्र [illegible] ॥ ३२ ॥
स्वर्णकुम्भा [illegible] ।
[illegible] इव व्यभुः ॥ ३३ ॥
तत्रारिकुञ्जरकण्ठकुठारोऽभूद् महीपतिः ।
अरविन्द इति ख्यातोऽरविन्दवत्कारलोचनः ॥ ३४ ॥
छिदुर्भीणां [illegible] येन निजं यशः ।
[illegible] तदपि प्राप्तं कोऽन्यदा ! अस्य धैर्यता ॥ ३५ ॥
[illegible] परिपन्थिनः ।
सर्वेऽपि परितः पेतुः पतङ्गा इव निष्प्रभाः ॥ ३६ ॥
तस्य राज्ञोऽभवद्राज्ञी धारिणी शीलधारिणी ।
[illegible] ॥ ३७ ॥
[illegible]
[illegible] ३८ ॥
निर्भरं यन्मनो [illegible] ।
[illegible] खण्डमिवाजनि ॥ ३९ ॥
सुरतानेऽपि प्रीता यद्धामनि रमते रमा ।
सरस्वती मुखे यस्य हंसीव सरसीरुहे ॥ ४० ॥
[illegible] सारमादाय वेधसा ।

[illegible] । २ भुवनम् = जगम्, यद्वा भूमण्डलम् ।
[illegible]

समादायैव शीतांशोः मण्डं नलिनयोनिना ।
विदधे रसना येषां ते सन्तः सन्तु शर्मणे ॥ ११ ॥
चन्द्रलेन्दुकलाकुन्दमन्दस्यन्दसुन्दराः ।
वाग्विलासाः सतां सन्तु जगदानन्दहेतवे ॥ १२ ॥
करोतु खलराड् राज्यं गुणिदूषणभूषणः ।
यद्भीत्या सावधानाः स्युः सन्तः सद्धर्मकर्मणि ॥ १३ ॥
द्विककर्कशवाक्येऽपि विरञ्जयति दुर्जनः ।
भवेद् गोरसवृद्धयै यद् निःस्नेहोऽपि खलः खलु ॥ १४ ॥
दुर्जनो वन्दनीयोऽसौ यज्जिह्वा काव्यदीपिका ।
विना पाषाणखण्डं किं धौतखण्डमहिमा भवेत् ? ॥ १५ ॥
प्रसन्ना यदि सन्तः स्युर्विश्वानुग्रहकारिणः ।
किं खलैः खलु दुर्वृत्तैः काव्यरत्नाऽपरीक्षकैः ? ॥ १६ ॥
द्विजिह्वजिह्वज्वालाजिह्वज्वालासुतापितम् ।
काव्यस्वर्णं सतां कर्णभूषणौचित्यमर्हति ॥ १७ ॥
सच्चरित्रचमत्कारि रत्नाकरसमुद्भवम् ।
सद्दृष्टिशुद्धिसंघातपरीक्षकपरीक्षितम् ॥ १८ ॥
खलजिह्वारया विद्धं तेजितं तद्वचोघनैः ।
काव्यरत्नमिदं भूयाद् विदुषां कण्ठभूषणम् ॥ १९ ॥ (युग्मम्)
विषापहारविद्याया विषाणीव समन्ततः ।
महतां कीर्तनादेव गलन्त्येनांसि तत्क्षणात् ॥ २० ॥
महद्भ्योऽपि महान्तो येऽर्हन्तस्तत्कीर्तनाद् न किम् ।
चेत् पयःपानतस्तृष्णा याति किं नामृतस्य तत् ? ॥ २१ ॥
त्रिषष्ठानि प्रभोः पूर्वं सूरिभिर्भूरिभिर्यदि ।
चरित्राणीह भूरीणि स्वपरोपकृतेः कृते ॥ २२ ॥
तथापि स्वल्पबुद्धीनामुपकारकरं नृणाम् ।
सम्यक् सम्यक्त्वमाणिक्यावाप्तये चात्मनः पुनः ॥ २३ ॥
श्रोतृश्रोत्रेषु पीयूषवर्षि वर्षासखं मया ।
चरित्रं पार्श्वदेवस्य यथादृष्टं प्रकाश्यते ॥ २४ ॥ (युग्मम्)
जम्बूद्वीपाभिधो द्वीपो वृत्तसंस्थानसंस्थितः ।
वृतोऽसंख्याम्बुधिद्वीपैः सेवकैरिव नायकः ॥ २५ ॥
वेष्टितः शुशुभे योऽत्र परितः क्षारवार्धिना ।

---

१ स्नेहः—द्रवपदार्थो गोरसवृद्धिं करोत्ययं तु निःस्नेहोऽपीति विरोधः; निःस्नेहः—प्रेमाभाववान्, गोरसो वाग्रस इति परिहारः ।

कुण्डलीकृतकायेन निधिः कुण्डलिना यथा ॥ २६ ॥
यद्धंसो भुवनान्तस्थो महाकन्दः परागवान् ।
ताराकारपृषद्रूपो यत्र मेघः पयोजनि ॥ २७ ॥
तत्रास्ति भरतक्षेत्रं क्षेत्रभूरिव सम्पदाम् ।
आकर्णीकृतकोदण्डदण्डकाकृतिविस्तरम् ॥ २८ ॥
मालाऽऽराम गिरि-ग्रामाभिरामं भाति यद् भृशम् ।
मणिस्वर्णादिसम्पूर्णं स्वर्गखण्डमिव च्युतम् ॥ २९ ॥
भास्यखण्डानि खण्डानि यत्र षड्भोगिभूषणे ।
पद्मान्तगुप्तमध्येनोरगयाः षडरका इव ॥ ३० ॥
तत्राभूत् स्वःपुराकारं नगरं पोतनाभिधम् ।
सदाऽऽरम्भैकसंभोगा यज्वानः त्रिदशा इव ॥ ३१ ॥
भाति चन्द्रोपलपंक्ते कुट्टिमेऽलक्तकांकिता ।
स्त्रीपदन्यासजो यत्र रक्ताम्भोजमिवाम्भसि ॥ ३२ ॥
स्वर्णकुम्भा गृहोपर्यन्तपीताऽरुणशोणिताः ।
स्वःस्त्रीवक्षोजसंस्पर्शावाधितेच्छा इव व्यभुः ॥ ३३ ॥
तत्रारिवृन्दकन्दैककुद्दालोऽभूद् महीपतिः ।
अरविन्द इति ख्यातोऽरविन्दस्फारलोचनः ॥ ३४ ॥
द्विट्स्त्रीणां साञ्जनैर्बाष्पैर्धौतं येन निजं यशः ।
नैर्मल्यं तदपि प्राप्तं काऽप्यहो ! अस्य वैदुषी ॥ ३५ ॥
यत्कृपाणप्रदीपैकशिखायां परिपन्थिनः ।
सर्वेऽपि परितः पेतुः पतङ्गा इव निस्त्रपाः ॥ ३६ ॥
तस्य राज्ञोऽभवद्राज्ञी धारिणी शीलधारिणी ।
पद्मानुकारिणी, यस्या वपुः श्रीश्च विपावने ॥ ३७ ॥
अभवद्भूपतेस्तस्य विश्वभूतिः पुरोहितः ।
विश्वभूतिभृतः पूर्वदिक्पतेरिव वाक्पतिः ॥ ३८ ॥
निर्भरं यन्मनो जैनधर्मवासितमन्वहम् ।
क्षमिरागैर्दुग्धसिन्धोर्यशःखण्डमिवाजनि ॥ ३९ ॥
मुरारातेरिव प्रीता यद्धामनि रमते रमा ।
सरस्वती मुखे यस्य हंसीव सरसीरुहे ॥ ४० ॥
सुररत्न-सुरद्रूणां सारमादाय वेधसा ।

---

१ हंसः—सूर्यः, पक्षे तन्नामा पक्षी । २ भुवनम्—जलम्, पक्षे भूमण्डलम् । न्दः—मेघः, पक्षे कमलकन्दः । ४ पराग—पुष्परज, रजः, पक्षे परा-उत्कृष्टा —पर्वतागमनम् ।

सा समाधिनिषण्णात्मा मृतिमापदनुद्धरा ॥ ५६ ॥
सुषादं बाधितौ तौ च विशोर्षिपासिद्धबुना ।
चिरेमतुर्न कथञ्चिच्छोकाद् युद्धादिव संतभौ ॥ ५७ ॥
कृतौर्ध्वदेहिकौ तौ च गतशोकौ बभूवतुः ।
शोको हि महतां प्रातश्छायेव क्षितिभाग् भवेत् ॥ ५८ ॥
स्वकार्ये कार्यधौरेयौ सञ्जातौ सोद्यमाविमौ ।
अत्यवाहयतां कालं भूयांसं विश्वभूतिजौ ॥ ५९ ॥
कठिनः कमठस्याभूत् स्वभावस्तस्य सर्वदा ।
लोहस्याऽकारि काठिन्यं किं केनाऽपि कदाचन ? ॥ ६० ॥
नवनीतमिवात्यन्तं मरुभूतेर्मनो मृदु ।
स्वाभाविकी भवेद् नूनं मृदुता जलजन्मनि ॥ ६१ ॥
अन्येद्युस्तत्पुरोद्याने देवद्रुरिव जङ्गमः ।
हरिश्चन्द्रमुनिश्चन्द्ररुचिरम्यगुणोऽभ्यगात् ॥ ६२ ॥
तदाऽऽगममपीयूषाऽऽसारसिक्तोऽथ पूर्जनः ।
तं नन्तुमगमत् प्रीत्योदञ्चद्रोमाञ्चकञ्चुकः ॥ ६३ ॥
सर्वेऽपि सप्रियाः पौराः साधुनाऽलङ्कृतां भुवम् ।
अभ्यगुर्मिथुनीभूता मराला इव मानसम् ॥ ६४ ॥
विश्वभूतिसुतावेतौ कौतुकोत्कण्ठिताशयौ ।
जग्मतुः शोकनाशार्थं निर्ग्रन्थमभिवन्दितुम् ॥ ६५ ॥
निषण्णेऽथ सर्वेऽपि यथास्थानं पुरीजनाः ।
पश्यन्तः साधुवदनं चकोरा इव चन्द्रिकाम् ॥ ६६ ॥
स्थितेषु तेषु सर्वेषु जनेषु करुणाकरः ।
प्रारेभे देशनां साधुः पयोवृष्टिमिवाम्बुदः ॥ ६७ ॥
स्याद्रत्नत्रयमेवेदं मिथ्यात्वध्वान्तधूसरे ।
संसारेऽत्र प्रकाशाय प्रदीप इव वेश्मनि ॥ ६८ ॥
ज्ञान-दर्शन-चारित्ररूपं तत् कथितं जिनैः ।
सम्यगाराधितं दत्ते श्रियं स्वर्गापवर्गयोः ॥ ६९ ॥
जीवाजीवादितत्त्वानि यथोक्तानि जिनोत्तमैः ।
तथावबोधस्तेषां यस्तज्ज्ञानं सम्यगीरितम् ॥ ७० ॥
अर्हदुक्तेषु तत्त्वेषु यः समस्तेषु निर्णयः ।
दर्शनं तच्छिवश्रीणां प्रतिभूरिव देहिनाम् ॥ ७१ ॥
अहिंसा-ऽसत्य-निश्चौर्य-ब्रह्मा-ऽकिञ्चनतात्मकम् ।

१ एभी—अजी, मेषी वा । २ कमले ।

याऽकारि, गतसारा हि ते तिरोदधिरेऽधुना ॥ ४१ ॥
तत्प्रियाऽनुद्धरा नाम धरेव क्षान्तिधारिणी ।
पतिचित्तानुगामिन्या ययाऽरञ्जि जगत्त्रयम् ॥ ४२ ॥
रूपसम्पत्पराभूतपुरुहूत[1]नितम्बिनी ।
याऽभवद् भर्तुरानन्दकन्दकादम्बिनीनिभा ॥ ४३ ॥
रमणीयगुणागाराचभूतां तनयौ तयोः ।
द्विधाविहितरूपः किं पञ्चेषुः किल कौतुकात् ? ॥ ४४ ॥
कमठोऽमरभूतिश्चेत्यनयोरभिधां पिता ।
स्थापयामास समये मनोरथलतामिव ॥ ४५ ॥
क्रमेण वर्धमानौ तौ रूपस्पर्धितमन्मथौ ।
रेजतुर्धैर्यसौन्दर्यावश्विनीनन्दनाविव ॥ ४६ ॥
एतावनल्पकलाभ्यासौ कुलोद्धारधुरन्धरौ ।
यौवनं पावनं विश्वभूतिपुत्रावथापतुः ॥ ४७ ॥
कमठस्याऽभवद् भार्या वरुणा हरिणेक्षणा ।
दयिता मरुभूतेश्चाभवद् नाम्ना वसुन्धरा ॥ ४८ ॥
भुञ्जानौ भ्रातरावेतौ विषयान् विषयेप्सितान् ।
गेहिनीभ्यां समं स्वाभ्यां निन्यतुर्बहुवासरान् ॥ ४९ ॥
भुञ्जानौ भ्रातरावेतौ विषयान् विषयेप्सितान् ।
विश्वभूतिरमू वीक्ष्य वंशभारधुरन्धरौ ।
पुत्रौ विरक्तो गार्हस्थ्याद् वीवधादिव भारवाड् ॥ ५० ॥
(सार्धश्लोकः)
ततश्च स स्वयंदास्य स्कन्धोत्तारणयोस्तयोः ।
भारमारोपयामास शकटं वृषयोरिव ॥ ५१ ॥
स्वयं मोहस्यपाशैकनिशातं शान्तमानसः ।
वैराग्यं प्राप्य मुमुदे दरिद्रीव धनागमे ॥ ५२ ॥
स्वाध्यायविनयोत्कृष्टशीलदीक्षाविभोद्यराम् ।
गुर्वन्तिके तपस्यां स विश्वभूतिरुपाददे ॥ ५३ ॥
विधायानशनं चान्ते नमस्कृतिस्मृतिं सृजन् ।
विश्वभूतिस्ततो मृत्वा सौधर्मे त्रिदशोऽजनि ॥ ५४ ॥
अनुद्धराऽपि स्वधवविरहव्यथिताऽधिकम् ।
दुस्तपं च तपस्तेने मर्त्यानां पद्धतिः क्रमः ॥ ५५ ॥
तपःश्रामण्यधुर्याणामप्युरेव भाल्मी ।

---
१ पुरुहू –इन्द्र ।

सा समाधिनिबद्धात्मा मृतिमापत्सुन्दरा ॥ ५६ ॥
सुगाढं बाधितौ तौ च पित्रोर्विपत्तिदन्दुना ।
विरेमतुर्न कथञ्चिच्छोकाद् युद्धादिव स्तभौ[1] ॥ ५७ ॥
कृतौर्ध्वदेहिकौ तौ च गतशोकौ बभूवतुः ।
शोको हि महतां प्रातश्छायेव क्षितिभाग् भवेत् ॥ ५८ ॥
स्वकार्ये कार्यधौरेयौ सञ्जातौ सोद्यमाविमौ ।
अत्यवाहयतां काले भूयांसं विश्वभूतिजौ ॥ ५९ ॥
कठिनः कमठस्याभूत् स्वभावस्तस्य सर्वदा ।
लोहस्याऽकारि काठिन्यं किं केनाऽपि कदाचन ? ॥ ६० ॥
नवनीतमिवात्यन्तं मरुभूतेर्मनो मृदु ।
स्वाभाविकी भवेद् नूनं मृदुता जलजन्मनि ॥ ६१ ॥
अन्येद्युस्तत्पुरोद्याने देवद्रुरिव अद्रुमः ।
हरिश्चन्द्रमुनिश्चन्द्ररुचिरम्यगुणोऽभ्यगात् ॥ ६२ ॥
तदाऽऽगमनपीयूषाऽऽसारसिक्तोऽथ पूर्जनः ।
तं नन्तुमगमत् प्रीत्योद्गच्छद्रोमाञ्चकञ्चुकः ॥ ६३ ॥
सर्वेऽपि सप्रियाः पौराः साधुनाऽलङ्कृतां भुवम् ।
अभ्यगुर्मिथुनीभूता मराला इव मानसम् ॥ ६४ ॥
विश्वभूतिसुतावेतौ कौतुकोत्कण्ठिताशयौ ।
जग्मतुः वन्दनार्थं निर्ग्रन्थमभिवन्दितुम् ॥ ६५ ॥
निषण्णेऽथ सर्वेऽपि यथास्थानं पुरीजनाः ।
पश्यन्तः साधुवदनं चकोरा इव चन्द्रिकाम् ॥ ६६ ॥
स्थितेषु तेषु सर्वेषु जनेषु करुणाकरः ।
प्रारेभे देशनां साधुः पयोवृष्टिमिवाम्बुदः ॥ ६७ ॥
स्याद्रत्नत्रयमेवेदं मिथ्यात्वध्वान्तधूसरे ।
संसारेऽत्र प्रकाशाय प्रदीप इव वर्त्मनि ॥ ६८ ॥
ज्ञान-दर्शन-चारित्ररूपं सत् कथितं जिनैः ।
सम्यगाराधितं दत्ते श्रियं स्वर्गापवर्गयोः ॥ ६९ ॥
जीवाजीवादितत्त्वानि यथोक्तानि जिनोत्तमैः ।
तथावबोधस्तेषां यस्तज्ज्ञानं सम्यगीरितम् ॥ ७० ॥
अर्हदुक्तेषु तत्त्वेषु यः समस्तेषु निर्णयः ।
दर्शनं तच्छिवश्रीणां प्रतिभूरिव देहिनाम् ॥ ७१ ॥
अहिंसा-ऽसत्य-निश्चौर्य-ब्रह्मा-ऽकिञ्चनतात्मकम् ।

---

१ स्तभौ = अजौ, मेषौ वा । २ गमने ।

दावाग्निमिव संवेगं वर्धयन् कमठानुजः ।
निर्मोकमिव निर्मोकी मुमोचासौ वसुन्धराम् ॥ ८७ ॥
भोगान् भोगानिवोद्वेगदायिनो जानताऽमुना ।
प्रकामं तत्यजे कामकथाऽपि मरुभूतिना ॥ ८८ ॥
तत्प्रिया साऽथ संवेगसंगतं वीक्ष्य वल्लभम् ।
मम्लावस्ताचलप्राप्तमिवादित्यं सरोजिनी ॥ ८९ ॥
अनादृताऽमुना साथ सुभगेनेव दुर्भगा ।
प्रकामं कामबाणानां गोचरा समजायत ॥ ९० ॥
मरुभूतिप्रिया कामवशा देवरमात्मनः ।
अभावयत् कटाक्षैः स्वैः सायकैरिव मान्मथैः ॥ ९१ ॥
कमठोऽपि शठः शाठ्यनिष्ठुरस्तां न्यभालयत् ।
दृशा कन्दर्पदर्पैककन्दजीवातुतुल्यया ॥ ९२ ॥
मिथोऽथ मिलितावेतौ मनसा वचसा दृशा ।
ततस्तयोरभूत् प्रीती रति मन्मथयोरिव ॥ ९३ ॥
ततस्तौ चक्रतुः कामक्रीडां निर्व्रीडचेतसौ ।
कामार्तानां कुतो लज्जा निर्विवेकाङ्गिनामिव ॥ ९४ ॥
दुष्टं तच्चरितं स्पष्टं दृष्ट्वाऽथ कमठप्रिया ।
ईर्ष्यालुः कथयामास समस्तं मरुभूतये ॥ ९५ ॥
कर्णाभ्यर्णोपसर्पद्भिर्मरुभूतेर्महात्मनः ।
ववृधे तद्वच पूरैः कोपो वह्निरिवेन्धनैः ॥ ९६ ॥
स्वयं पश्याम्यदः स्पष्टं चरितं दुष्टमेतयोः ।
अन्याये निश्चयीभूते दण्डः स्यात् तद्विधायिनाम् ॥ ९७ ॥
चेतस्येवं स निश्चित्य दिदृक्षुश्चरितं तयोः ।
कृतग्रामान्तरव्याजो निर्ययौ भ्रातुराज्ञया ॥ ९८ ॥
कियद्भूमिं च गत्वैव व्याघुट्य कुशाग्रधीः ।
सायं गौरिव वत्सोत्का स्वपुराभिमुखोऽभवत् ॥ ९९ ॥
अन्यथाकृतनेपथ्यस्तापसीभूय सोऽभ्यगात् ।
प्रदोषे भवनाभ्यर्णं स्वं नीडमिव नीडजः ॥ १०० ॥
विश्रामाय श्रमभ्रान्तः प्रतिश्रयमयाचत ।
कमठं मरुभूतिश्च (दिदृक्षुश्चरितं तयोः ?) ॥ १०१ ॥
आकर्ण्यैतद्वचो वेश्ममर्दनां सोऽप्यदीदृशत् ।
कमठः कठिनोऽप्यस्मै वासाय मरुभूतये ॥ १०२ ॥

---

१ वीवातु—जीवनौषधम् । २ नेपथ्यम्-वेषः ।

हास्यैरुल्लासितानङ्गविभ्रमौ भ्रूविभ्रमौ ।
चिरं चिक्रीडतुः कामकिङ्कराविव निस्त्रपौ ॥११८॥ (त्रिभिर्विशेषकम्)
धीरस्तच्चरितं दृष्ट्वा चुकोप कमठानुजः ।
तिरश्चामपि दुःसहा पराभूतिः स्वयोषिताम् ॥ ११९ ॥
उत्पन्नानल्पसंकल्पः स दध्याविति धीनिधिः ।
अधुना नासहिष्येऽहं दुश्चरित्रमदोऽनयोः ॥ १२० ॥
तत् सर्वं ज्ञापयामास क्षितीशाय स द्रुतम् ।
अन्यायैः परिभूतानां भूतानां भूपतिर्गतिः ॥ १२१ ॥
तद्वचोभिर्भुवो भर्तुः क्रोधो वृद्धिमुपेयिवान् ।
महारण्यप्रदेशस्य दावानल इवानिलैः ॥ १२२ ॥
कीनाश इव संक्रुद्धः प्रचण्डैश्चण्डदण्डकृत् ।
दण्डपाशैः क्षमापीशः कमठं समजूहवत् ॥ १२३ ॥
[illegible]
[illegible]
[illegible]
[illegible]
यष्टिमुष्टिप्रहारैस्तं निहत्य क्ष्मापपूरुषाः ।
हठेनारोपयामासुः कमठं गर्दभोपरि ॥ १२६ ॥
भूयो भूयः परिभ्राम्य चत्वरे चत्वरे चिरात् ।
प्रकारैर्भूरिभिर्घोरैर्विडम्ब्य च मुहुर्मुहुः ॥ १२७ ॥
ते भूपपुरुषा निन्युः कमठं पुरतः पुरः ।
अवध्य इति मुमुचे सजीवस्तैः कुकर्मकृत् ॥ १२८ ॥ (युग्मम्)
तलारक्षादिलोकेषु गतेषु निखिलेष्वपि ।
ह्रिष्टकर्ममयोऽचालीत् कमठः पापकर्मठः ॥ १२९ ॥
अत्यन्तविनतग्रीवः पापकर्मभरैरिव ।
अनाचाराञ्चलेनेव पाणिना पिहिताननः ॥ १३० ॥
मुञ्चन्नश्रूण्यविश्रामं निर्वापमिव सन्मतेः ।
प्रस्खलत्पदविन्यासो निबद्धो निगडैरिव ॥ १३१ ॥
गच्छन् दुर्ध्यानधरणीकमठः कमठस्ततः ।
प्यालपानिनि दौर्जन्यपर्जन्यगगनाङ्गणः ॥१३२॥
(त्रिभिर्विशेषकम्)

अथाहं सोदरादेव न्यपतं विपदाम्बुधौ ।
भ्रातृत्वेन समुत्पन्नः शत्रुरेव ममानुजः ॥ १३३ ॥

विपक्षमिव मन्वानो मरुभूतिं निजानुजम् ।
परिधानविमुक्तोऽयमधजान् ग्रामम् ॥ १३४ ॥
निर्विण्णः प्राणितव्येऽपि निःसंघ लोकयष्टिना ।
निजापराधमुक्त्यर्थं थियामुक्तस्स सोऽजनि ।
भ्रमन्नितस्ततोऽरण्ये सोऽभ्यगात् तापसाश्रमम् ॥ १३५ ॥
(सार्धश्लोकः)
वटा इव जटावन्तोऽभंका इव (शुचेतस ?)
कमठेनेक्षाञ्चक्रिरे तापसास्तापसाश्रमे ॥ १३६ ॥
पतद्बाष्पो लुलद्वालो भ्रमच्चक्षु स्खलद्वचाः ।
सोऽथकु तेभ्यः स्वकं दुःखं रागाय भेपजं रुजम् ॥ १३७ ॥
पापातिरेकादुद्वृत्तं नरकादिव नारकम् ।
कृमिक्रान्ततनु श्वानमिव निन्द्यं पदे पदे ॥ १३८ ॥
वीक्ष्य तं तादृगाकारं दुष्टाचारमिवापरम् ।
मरुभूत्यग्रजन्मानमभ्यधुस्तेऽथ तापसाः ॥ १३९ ॥ (युग्मम्)
भो ! भद्राभद्रभूमानं मा कार्षीः खेदमीदृशम् ।
जीवैः क्षीबैरिवावश्यं कृतं कर्मोपभुज्यते ॥ १४० ॥
भ्रमद्भिर्भवकान्तारे जीवैर्भ्रान्तनरैरिव ।
कर्मणः फलमासाद्यं स्वयमुप्ततरोरिव ॥ १४१ ॥
आकर्ण्यैवं च तद्वाचं दुःखवैराग्यभागसौ ।
अभ्यधाद् मूर्ध्नि विन्यस्तहस्तस्तांस्तापसानिति ॥ १४२ ॥
चेद् समस्तेषु सत्वेषु भगवन्तः कृपापराः ।
मह्यं तथापि ददतु भवन्तस्तापसव्रतम् ॥ १४३ ॥
अथगत्यैनं प्रशान्तं भस्माच्छन्नमिवानलम् ।
दीयतापसदीक्षां ते ददुस्तस्य शठात्मनः ॥ १४४ ॥
तद्व्रतादानतस्तुष्टः परिष्टः पापकर्मणि ।
अन्यथात् कष्टमज्ञानं तादृशां सन्मतिः कुतः ? ॥ १४५ ॥
मरुभूतौ स्मरन् वैरमस्मरन् कृत्यमात्मनः ।
दुस्तपं स तपस्तेपे कन्द मूल-फलाशनः ॥ १४६ ॥
इतश्चैनां दशां वीक्ष्य कमठस्यातिनिष्ठुराम् ।
मरुभूतेरभूत् पीडा मनोज्ञानां शिरोमणेः ॥ १४७ ॥
क्षणे क्षणे स्मरन् स्वान्ते वृत्तान्तं भ्रातुरात्मनः ।
न कापि रतिभाक् सोऽभूद् यूथभ्रष्ट इव द्विपः ॥ १४८ ॥

१ मरो ।

मरुभूतिर्महात्मेति निनिन्दात्मानमन्वहम् ।
बन्धोरपि मयाऽकारि दुर्दशैतादृशी हहा ! ॥ १४९ ॥
जीवितं यदि पश्यामि तं बन्धुं बन्धुराक्षरैः ।
क्षमयामि निजं मन्तुमन्तेयासीच तत्पुरः ॥ १५० ॥
तपस्यन्तं स शुश्राव कमठं तापसाश्रमे ।
निजापराधमुक्त्यर्थं यियासुस्तत्र सोऽजनि ॥१५१॥
राज्ञार्थं स्खलितस्यापि गच्छतोऽस्याथ वर्त्मनि ।
महानर्थैकपिशुनैः शकुनैः प्रतिकूलितम् ॥१५२॥
प्रकृत्या मृदुरात्मानं मन्तुमन्तं विचिन्त्य सः ।
ईयिवांस्तापसावासं मृत्योरिव निकेतनम् ॥१५३॥
मृगाभिकृत्तोपास्ति कुशासंस्तरविस्तरम् ।
भूरिभस्मभराभ्यङ्गं वल्कलाकल्पकल्पनम् ॥ १५४ ॥
कुर्वन्तं ध्यानमत्युग्रमप्रज्ञानमात्मनः ।
सोऽपश्यदमुं गच्छन् कर्कटकुटिलाशयम् ॥१५५॥ (युग्मम्)
गुरुगुभगरस्येव स्वभावं तस्य दुर्मतेः ।
नाज्ञासीद् मरुभूतिः स दुर्लक्ष्या गतिरीदृशाम् ॥१५६॥
गुरोरिव विनयाद्ग्राहितशिक्षुर्मन्तुमात्मनः ।
सोऽपतत् पदयोस्तस्य भूतलन्यस्तमस्तकः ॥१५७॥
तदा तस्य प्रणामः स तत्क्रोधेन्धनतां ययौ ।
पन्नगानां पयःपानात् किं न स्याद् गरगौरवम् ? ॥१५८॥
नतस्य तस्य वचनैः शीतलद्युतिशीतलैः ।
प्राज्वलत् कमठाऽस्नेहैः, स्नेहैः सिक्त इवानलः ॥१५९॥
अस्यैषोऽवसरो वैरिवैरग्रहणकर्मठः ।
कमठश्चिन्तयामास वीक्ष्य तं नतकन्धरम् ॥१६०॥
पाणिनाऽपातयत् प्रौढां स शिलामस्य मस्तके ।
तर्जयन्तीं मुष्टिपातं क्रुद्धस्य समवर्तिनः ॥१६१॥
सा भाति स्म तदाऽधस्तात् पतन्ती शैलतः शिला ।
धीरिव श्रितदुर्बुद्धेरस्य क्षमापरीयसी ॥१६२॥
एकदाः पतनादस्या असौ जीवन् भविष्यति ।
ध्यात्वेति दुर्धियानेनाऽऽददे सा पाणिना पुनः ॥१६३॥
पुनस्तामामुचद् दुष्टः कमठश्चेतनामिव ।
शिला तत्तपसा सार्धं मरुभूतिमचूर्णयत् ॥१६४॥
मुमुचे मरुभूतिः स ततः प्राणैस्त्वरत्त्वरम् ।
अपध्यानदनोत्पन्नपापतः सर्पोरिव ॥१६५॥

प्रहारार्तिसमुत्पन्नमहार्तध्यानधूसरः ।
तत्कालविस्मृतश्राद्धव्रतपञ्चनमस्कृतिः ॥१६६॥
अर्हत्सिद्धादिशरणादरणीकृतमानसः ।
वन्ध्याद्रौ मद्र आर्तीय सोऽभूद् वन्धुरसिन्धुरः ॥१६७॥ (यु
क्रमेण ववृधे तस्य तारुण्यं वपुषा समम् ।
सदन्तः स तदा सानुमतः सानुरिव व्यभात् ॥१६८॥
क्षरद्दानकणाम्भोभिः सुरभीकृतभूतलः ।
भ्राम्यद्भ्रमरझङ्कारवर्धिष्णुक्रोधदुर्धरः ॥१६९॥
प्रचण्डशुण्डादण्डेन कम्पितप्रौढपादपः ।
ईषत्प्रिभदन्ताभ्यां भिन्नभूधरधोरणिः ॥१७०॥
गम्भीरवदनोद्भूतगर्जितर्जितवारिदः ।
उद्भिन्नतुङ्गकुम्भाभ्यां कुम्भाभ्यामिव शोभितः ॥१७१॥
प्रचलोत्तुङ्गसङ्ग्रामरूपपृष्ठायतानलः ।
अञ्जनाद्रिरिवोत्तुङ्गः सोऽभ्रमद् वनगह्वरे ॥१७२॥
(चतुर्भिः कलापकम्)
कण्डूयमानां गौरिव कदाचित् करिणीकरैः ।
कदाचिद्वनिनीहस्नानविन्यस्तहस्तकमस्तकः ॥१७३॥
कदाचित् पद्मिनीपत्रपरागकपिशं पयः ।
पिबन् पद्माकरात् पुष्पशाखिभिरिव वारिदः ॥१७४॥
कदाचिद् भावयन् भूयो भूपर्णाशितवल्लभा ।
स्वकुम्भस्पर्शविवशां मदवीनामिव मन्युमान् ॥१७५॥
कदाचिद् विचरन् कुञ्जकुञ्जे सुशीलया ।
कदाचित् करिणीवृन्दैः सार्धं क्रीडाविनिरतः ॥१७६॥
क्रीडन् क्रीडानिरासोऽपि विविधाभिरहर्निशम् ।
हस्तिमदस्वानिनाद् हस्तिनीनां वानरायसौ ॥१७७॥
(पञ्चभिः कुलकम्)
कमठस्य प्रिया साथ वरुणा विप्रवासिता ।
सादरता मृत्युविद्धा सा कैरातुरातिरम् ॥ १७८ ॥
कर्णिके च पूर्वदेश विन्ध्यशैलस्य कन्दरे ।
विरहवरुणा जज्ञे हस्तिनी तस्य हस्तिनः ॥ १७९ ॥
असुमुना अमर्षी सा करिणो करिणा समम् ।
दिकनैव विमुक्तास्य मन्मथेगुरुणा भवात् ॥ १८० ॥
सम्पादित हस्तिनस्तस्यां विचित्रारमनदृनि ।

…पुष्पिरत्नुरिव कन्दो दृत्यं तनुगच्छति ॥ १८२ ॥
…रसमाणगमदा सार्धं सिन्धुरः (स्नेहस्पृशः ?) ।
…अग्यभुरुण पुरं रामयोनिजाली पद्दति ॥ १८२॥
…शनारविन्द्भूमृदुंधुषं रामपतः यतः ।
…समस्तार हारतालनामालीरिव मन्दमः ॥ १८३ ॥
…ईर्षिरदं पादिमांपादः श्रेतुपेव यथाऽतिमम् ।
…पङ्कजहनयाधेगरतोसेनरीश्रमाद्रिय ॥ १८४ ॥
…दीर्द गीरकर्णारम्भं हृपदलं गीरातयेप्यमृत् ।
…अनन्तानन्तमेमंजपस्वधंवेव समन्तत. ॥१८५॥
…विवरा. कारापुष्पाणां शोभते यत्र निर्भरम् ।
…ईरामामीपुषां सुपतांपदय विदिता भुवा ॥१८६।
…भाति यत्रातितरभौकं मण्डलं मृणालमय ।
…लगाडेगुमिथोगुवमं धामं कन्दर्पचपिल ॥१८७॥
…स्थाने स्थाने च हृदयन्ते हंसा कुन्देन्दुसुन्दरा. ।
…हंसोहपहारकालभूपालतमपा इव ॥१८८॥
…यत्र गोपालपुत्राणां श्रूयन्ते गीतकेलय. ।
…यत्रन्ते कलकण्ठानां कलकण्ठरवा इव ॥१८९॥
…पियार्णः इमां खमानमध यपुन्मनतम्भवासिरे ।
…हरिणस्तां सिरः कूटं दर्शदंष्टावला इव ॥१९०॥
…नदाडरविन्दभूपालः शारकालांचितं सुखम् ।
…सुश्रानः सोऽप्यदा नन्यां सोऽपिऽत्रापिव केसरी ॥१९१॥
…प्रवासी रममाणः स मधपयाप्सरोजनः ।
…समस्येकेपरेऽपदपद्मध्येम व्योममम्बुरम् ॥१९२॥
…नयः हारमनुद्यमगधं मासीनगत् तदा ।
…हारवालमहीपालप्रवेश इव तोरणम् ॥१९३॥
…ववचित् कुन्देन्दु कैलास-काशसंकाशविस्तरम् ।
…लहाद्रेयहिपंडारपिण्डैरिव विनिर्मितम् ॥१९४॥
…क्वचित्पद्मपवनप्रस्थाद काञ्चनीकाञ्चनोपमम् ।
…पासादोपरिगैः शातकुम्भकुम्भैरिव श्रितम् ॥१९५॥
…वचित् लक्षितगुञ्जार्धं जपा-कौशस्य किंशुकम् ।
…सालसौविहितं गन्धवद्भिरुक्मीलां कर्मैरिव ॥१९६॥

१ अर्धनमानक मध्ये मात्पुरे । २ पुष्पवर्ष सजाम्बनीरं…कमन्वयम् । …रिपटर.–पं… ।

क्वचित् तमालहिन्तालतालप्रियालविभ्रमम् ।
व्योमोपरि परिभ्राम्यत् कीराणामिव संकरम् ॥१९७॥
क्वचित् कज्जललोलालिकालिन्दीजलसोदरम् ।
दैवादिवेह सम्प्राप्तं शृङ्गमञ्जनभूभृतः ॥१९८॥
वर्ण्यं निर्वर्ण्य निर्वर्ण्यमिरयब्दं पञ्चवर्णकम् ।
विसिस्मिये विशामीशः सौधोत्सङ्गस्थितस्तदा ॥१९९॥

(षड्भिः कुलकं

इत्यस्य पश्यतो राज्ञो विस्मयोत्फुल्लचक्षुषः ।
विदुद्राव द्रुतं वार्दो दौर्जनीव मनःस्थितिः ॥२००॥
तदैव कलितानित्यभावनो भूमिवल्लभः ।
व्यासवानिति वैराग्यवारिस्पर्धितवारिधिः ॥२०१॥
अहो ! यतादृशी सम्पद् घनस्य नयनोत्सवा ।
तत्क्षणाद् विलयं प्राप तृणाग्निरिव सर्वतः ॥२०२॥
पुत्रमित्रकलत्रादिधनकाञ्चनसंश्रयः ।
तथा संसार एषोऽपि घनवत् क्षणभङ्गुरः ॥२०३॥
शरीरं शोभते येन विनाऽपि मणिभूषणैः ।
यौवनं तदपि प्रौढशक्रचाप इवास्थिरम् ॥२०४॥
मिष्टान्नपानैरत्यन्तं पोषिता तनुरङ्गिनाम् ।
विलीयते क्षणादेव स्फुरद्विद्युल्लतेव च ॥२०५॥
मणिमाणिक्यसाम्राज्यराज्यरूपा अपि श्रियः ।
सर्वा अपि विलीयन्ते स्थासका इव तत्क्षणात् ॥२०६॥
काः स्त्रियः के सुताः किञ्च राज्यं परिजनश्च कः ? ।
काऽसौ सम्पत् पुनः कोऽहं सर्वं मेघानुसार्यदः ॥२०७॥
तत्सुखेष्वेव निमग्नोऽस्मि सुखे सांसारिके भृशम् ।
यत्फलं मूलनाशाय रम्भाफलमिव ध्रुवम् ॥२०८॥
इत्यनित्यं जगद्वृत्तं भावयन् सोऽवनीधवः ।
आससादाथधिष्ठानं फलं वैराग्यभूरुहः ॥२०९॥
ततो महेन्द्रनामानमङ्गजन्मानमात्मनः ।
न्यधाद् राज्येऽरविन्दो राङ् वैराग्यमिव चेतसि ॥२१०॥
सचिवादिपरीवारं प्रतिबोध्यानघोक्तिभिः ।
सूरेः सामन्तभद्रस्याभ्यर्णे स व्रतमाददे ॥२११॥
आत्माऽङ्गयोर्विदन् भेदं हंसवत् क्षीरनीरयोः ।

दुर्धरां मनसोऽप्यन्यैः स तपस्यामपालयत् ॥२१२॥
पावयन् काश्यपीपीठं भवाब्धिद्वीपसंनिभः ।
अरविन्दमुनीन्द्रः स विजह्रे ध्यानपार्जितः ॥२१३॥
महातीर्थाष्टापदाद्रौ तीर्थयात्राचिकीर्षया ।
सागरदत्तसार्थेशसार्थेऽचालीत् स साधुराट् ॥२१४॥
अन्येद्युर्मुदितः सार्थनाथः पाथोधिनिःस्वनम् ।
मुनिं पप्रच्छ हे स्वामिन् ! क्व यियासाऽस्ति वोऽधुना ? ॥२
अथाऽमुमवदत् साधुरहमष्टापदाचले ।
सम्मेताद्रौ च यास्यामि तीर्थयात्राचिकीर्षया ॥२१६॥
पुनः सार्थपतिः प्राह के देवास्तत्र च प्रियाः ? ।
कुतस्तीर्थे च ते जाते ? किं फलं तन्नमस्कृतेः ? ॥२१७॥
मुनिरप्याह तं, देवास्तत्राऽर्हन्तो जगन्मताः ।
नमन्ते तन्मयत्वं च तद्गुणं रञ्जनाज्जनाः ॥ २१८ ॥
तद्गुणान् श्रोतुमिच्छामि श्रुत्योः पीयूषवर्षिणः ।
इत्युक्ते स मुनिः प्रोचे तदनुग्रहकाम्यया ॥ २१९ ॥
मिथ्यात्वाऽविरती हास्य-रती मन्मथ-शोचने ।
अज्ञान-त्रास-भी-राग-द्वेषा निद्रा-जुगुप्सनम् ॥ २२० ॥
भोगो-पभोगयोर्लाभ-दानयोः पुनरीक्षसः ।
अन्तरायाश्च नैतेषु दोषा अष्टादशाप्यमी ॥ २२१ ॥ (युग्मम्
वपुः सुगन्धि निःश्वासो निराम्भोरुहसौरभः ।
अच्छमांसे पयःपूरकर्पूरोद्दामोदरे ॥ २२२ ॥
अदृश्यश्चर्मदृष्टीनां नीहारा-ऽऽहारयोर्विधिः ।
चत्वारोऽतिशयाः सार्धं जन्मनो धीगुणा इव ॥ २२३ ॥
योजनप्रमितायां च धर्मव्याहरणावनौ ।
तिष्ठन्ति कोटिशस्तिर्यग्मर्त्या-ऽमर्त्या अबाधया ॥ २२४ ॥
भाषानुभाविनी भाषा तिर्यग्-मनुज-नाकिनाम् ।
भामण्डलं शिरःपृष्ठे मण्डलं जयदर्पणः ॥ २२५ ॥
योजनानां शते सार्धे रोगा-ऽवृष्ट्यतिवृष्टयः ।
वैर-मारी-ति-दुष्काला भयं स्व-परचक्रयोः ॥ २२६ ॥
यत्प्रभावाच्च नैते स्युः कुरङ्गा इव पश्यतः ।
एतेऽप्यतिशया एकादश स्युः कर्मणां क्षयात् ॥२२७॥

---

१ जल-पूर्ण कलश-[illegible] ।

धर्मचक्रं पुरो व्योम्नि ध्वजो रत्नमयो महान् ।
पन्न्यासे नव पद्मानि देवदुन्दुभिझाङ्कृतिः ॥ २२८ ॥
चैत्यद्रुः पल्लवोल्लासी मृगेन्द्रासनमुत्तमम् ।
वप्रत्रयं तथोत्तुङ्गमातपत्रं च चामरा ॥ २२९ ॥
अधस्तात् कण्टकास्यानि चत्वारि वदनानि च ।
आनुकूल्यं च वायूनां प्रादक्षिण्यं च पक्षिणाम् ॥ २३० ॥
वर्षं गन्धोदकानां च प्रणतिः पृथिवीरुहाम् ।
सुगन्धिसुमनोवृष्टिः सर्वेऽपि ऋतवोऽन्तिके ॥ २३१ ॥
अवृद्धिर्नख-केशानां नाकिकोटिः सदाऽन्तिके ।
एकोनविंशतिर्देवैः कृता अतिशया अमी ॥ २३२ ॥
स्युरेतेऽतिशयाः सर्वे चतुस्त्रिंशच्च मीलिताः ।
सेवन्ते तानमी नित्यं भुजिष्या इव नायकान् ॥ २३३ ॥
पञ्चत्रिंशद्गुणोपेतं तद्वच सुमनोहरम् ।
सुरासुरनराधीशस्वान्तसंवननौषधम् ॥ २३४ ॥
इत्याद्यसंख्यैः संख्यावद्गणगेयैर्गुणोत्करैः ।
निचिता ये च पाथोभिरिव पानीयराशयः ॥ २३५ ॥
त्रिकालविषयं वस्तु समस्तमपि नित्यशः ।
प्रतिबिम्बमिवादर्शे तज्ज्ञाने प्रतिबिम्बितम् ॥ २३६ ॥
अनन्ता अभवंस्ते च भविष्यन्ति तथाऽपरे ।
अर्हन्तो भगवन्तोऽत्र विश्वातिशयशालिनः ॥ २३७ ॥
आकर्णयाथ सार्वेश ! तत्तीर्थोत्पत्तिमादितः ।
याति तच्छ्रवणादेव दुरन्तमपि दुष्कृतम् ॥ २३८ ॥
अस्यामेवावसर्पिण्यामिक्ष्वाकुकुलसम्भवः ।
बभूव भगवानादिर्देवो देवेन्द्रवन्दितः ॥ २३९ ॥
तत्सूनुः पुण्यनिभृतो भरतो भरताधिपः ।
चक्रिणामादिमो योऽभूदर्हतामिव तत्पिता ॥ २४० ॥
अन्येद्युर्भरताधीशस्तं तीर्थाधीशमादिमम् ।
पर्यन्तेऽष्टापदे प्राप्तमभ्यगादभिवन्दितुम् ॥ २४१ ॥
नत्वा निषण्णस्तत्राथैवमप्राक्षीत् क्षितिवासवः ।
अस्यां भावावसर्पिण्यां (भाविनः ?) कति तीर्थपाः [1] ॥ २
अथादिरर्हतामाद्यो भरतं भावभासुरम् ।

---

१ ष्टम. । २ नमस्तान्-ीतम् ।

भविताऽत्र महाभाग ! त्रयोविंशतिरर्हताम् ॥ २४३ ॥
तदङ्गाऽऽह्वान-संस्थान-वर्णप्रभृतिपूर्वकम् ।
श्रुत्वा मुदितो धाम जगाम जगतीपतिः ॥ २४४ ॥
प्रतिबोध्य जगल्लोकानम्भोजानिव भास्करः ।
नाभेयो भगवांश्चैवं मुक्तिमप्यापदाचले ॥ २४५ ॥
आर्यभिरृषभाधीशनिर्वाणेनातिदुःखितः ।
शोकं चकार, संसारवासिनां यदसौ स्थितिः ॥ २४६
तथा चाष्टापदाद्रौ सोऽप्यप्रौढविक्रमः ।
भरतस्तातनिर्वाणस्थाने वन्दितुमभ्यगात् ॥२४७॥
गलद्धनमास्यमच्छोकं निर्मोकमिव पन्नगः ।
शोको हि तादृशां न स्याच्चिरं स्नेह इवासताम् ॥२४८॥
सोऽथ तत्र गिरौ चिभ्यविभ्राजमहधीर्मुदा ।
भरतोऽचीकरच्चैत्यं यशोराशिमिवात्मनः ॥२४९॥
भविष्यदर्हतां भक्त्या पुनस्तातदिदृक्षया ।
जिनानिषद्यां प्रतिमास्तत्रास्थापयदर्हताम् ॥२५०॥
ततश्च प्रथमे तीर्थमिदं निर्वाणकारणम् ।
स्वतन्त्रदा चन्द्रभागस्थावरं शिवसमर्पकम् ॥ २५१ ॥
सम्मेतोऽपि महातीर्थं त्रैलोक्यानन्दकन्दभूः ।
प्रवृत्तिं शृणु तस्यापि श्रोत्रभुम्योः सुधोपमाम् ॥२५२॥
अनन्ता निर्वृता यत्र निर्वास्यन्ति तथाऽपरे ।
अर्हन्तो बहुभिः सार्धं साधुभिर्गुणधारिभिः ॥२५३॥
अस्यामप्यवसर्पिण्यामत्र विंशतिरर्हताम् ।
कर्म निर्मूल्य निर्वाणसुखमव्ययमेष्यति ॥२५४॥
अतस्तद्दर्शने पुंसां फलं कैवल्यलक्षणम् ।
महापुंभिस्तु यत् स्पृष्टं तद् बीजं मोक्षभूरुहः ॥२५५॥
तस्मादिमे महातीर्थे पवित्रीकृतविष्टपे ।
गत्वाऽहमपि तत्रैव करिष्ये कर्मणां क्षयम् ॥२५६॥
अन्ये तीर्थे इमे सर्वेभ्योऽप्युत्तमे अहह ।
यदारूढैः क्षणेनाऽपि लोकाग्रमपि लभ्यते ॥२५७॥
इति तस्योक्तिलसितात्मा सागरः सार्थनायकः ।
आजन्मभङ्गुरे जाते पीतस्तम्भ स्पृहार्दितः ॥२५८॥
अरविन्दमुनीन्द्रः स योग्यं ज्ञात्वाऽन्यदाऽथ तम् ।

१ सर्वचयद् ।

अनुजग्राह धर्मोऽस्या मन्त्रो हि जिनशासनात् ॥२५९॥
सागरोऽथ मुनेर्वाचा मुक्त्वा मिथ्यात्वमञ्जसा ।
भेजे धर्मं गृहस्थानां सम्यक् सम्यक्त्वसंयुतम् ॥२६०॥
अनगारं गुणागारं मार्गे सागरसार्थराट् ।
सेवमानोऽचलत् गृह्णन् सत्संगमतरोः फलम् ॥२६१॥
भिल्ल-भल्लूक-शार्दूल-शृगालकुलसंकुलाम् ।
किरातीनिकरारब्धहल्लीसकमनोहराम् ॥२६२॥
सदुर्गामिव दुर्गम्यां प्राकाराकारभूधरैः ।
व्याकुलां तस्करैः क्रूरैस्तुरङ्गैरिव मन्दुराम् ॥२६३॥
विवेकिनेव विनयं साधुना सहितः क्रमात् ।
महाटवीं विवेशासौ सागरः सागरः श्रियाम् ॥२६४॥
(त्रिभिर्विशेषकम्

सोऽथ सार्थः सनिर्ग्रन्थः क्रामंस्तामटवीं क्रमात् ।
मदमूर्तिमराजेन भूषिता भुवमालभत् ॥२६५॥
क्रोडद्द्वन्द्वचरद्वृन्दारब्धदुन्दुभिनिस्वनम् ।
लोलरोलम्बसंरावयेणुवीणाक्कणत्कृति ॥२६६॥
निमज्जत्सारसश्रेणीकेङ्कारालापपेशलम् ।
उच्छलत्पक्षहंसालीकृतमर्दलगुम्दलम् ॥२६७॥
उल्ललल्लोलकल्लोलकल्पिताऽनल्पतालकम् ।
अनिलान्दोलिताम्भोजिनीजनितहस्तकम् ॥२६८॥
नाकिभिर्नुतमायातैः सङ्गीतमिव सूचितम् ।
परमोदकलक्ष्मीकं तत्रास्त्येकं सरोवरम् ॥२६९॥
(चतुर्भिः कलापकम्)

सार्थनाथोऽथ पानीयतृणेन्धननिधानकम् ।
वीक्ष्य प्रदेशं तं तत्र सार्थसार्थं न्यवीविशत् ॥२७०॥
अकम्पयन् केऽपि शाखिशाखाः शाखामृगा इव ।
भ्रेमुः फलार्थिनः केऽपि गह्वरे शबरा इव ॥२७१॥
केऽपि मुस्ताशयाऽचखनुः क्ष्मामलं सूकरा इव ।
बभञ्जुर्भूरुहान् केऽपि मत्तमातङ्गजा इव ॥२७२॥
सरोऽम्भोभिः केऽपि सस्नुः सस्नेहं सारसा इव ।
भारवाहा इवानिन्युः केऽपि सस्येन्धनादिकम् ॥२७३॥

---

१ हल्लीसकम्=स्त्रीणां मण्डलीभूय गानम् । २ अश्वशालाम् । ३ मर्दल = पणवनाम वाद्यम् ।

भक्ष्यं बुभुजिरे भक्ष्यं केऽपि अन्यजना इव ।
एवं प्रवृत्तिरे सर्वे सार्थिकाः स्वार्थनिर्भराः ॥२७४॥

(चतुर्भिः कलापकम्)

कलितः कलभैस्तुङ्गैः प्रतिच्छन्दैरिवात्मनः ।
परीतः करिणीवृन्दैः दीर्घिकाभिरिवाचलः ॥२७५॥
भृङ्गैर्दानार्थमायातैर्याचकैरिव सेवितः ।
मरुभूतिद्विपः सोऽथ तत्सरोवरमभ्यगात् ॥२७६॥ (युग्मम्)
कर्णाभ्यर्णभयद्भृङ्गभङ्गिमातङ्गपुङ्गवः ।
पपौ स्वच्छं पयस्तत्र नीरधाविव नीरदः ॥२७७॥
अभितोऽप्यह्यमानाङ्गः प्रोत्क्षिप्तैः करिणीकरैः ।
पतन्तीभिः पयोवाहधाराभिरिव भूधरः ॥२७८॥
कार्यमाणाम्बुप्रभासो द्विपराघोरैरिव ।
हस्तिमल्ल इवाम्भोधौ सस्नौ तत्र स कुञ्जरः ॥२७९॥ (युग्मम्)
अभ्यगादिरिवाम्भोभिर्पीताङ्गः स सरोजलैः ।
तत्पालीमारुरोहाद्रिमेखलामिव वारिदः ॥२८०॥
पदयन्त्रितस्ततोऽपश्यत् स हस्ती सार्थसार्थिकान् ।
महद्दानादभूत् तस्य कोपाटोपः पटीयसः ॥२८१॥
विस्फुरन् कर्णैः क्ष्मापीठं तर्जयन्निव जिह्मगान् ।
शुण्डाग्रं कुण्डलीकुर्वन् घट्टन्नद्रिमिवाननेः ॥२८२॥
शीकरान् निक्षिपन् सान्द्रान् कोपाग्नेर्ध्यं वमन्निव ।
कुर्वन्नाताम्रदृग्युग्मं दष्टुं पल्लवयन्निव ॥२८३॥
सृजन्नयुर्जितां गर्जि पर्जन्य इव भूगतः ।
समधाविष्ट धूमोर्णापतिभूभ इव द्विपः ॥२८४॥ (त्रिभिर्विशेषकम्)
दुर्लोकपेतं साटोपमापतन्तमनेकपम् ।
यमयोधमिव क्रुद्धं वीक्ष्याक्षुभ्यंश्च सार्थिकाः ॥२८५॥
सोऽथ सार्थजनान् दन्तावलः प्रोद्दामधामभृत् ।
भाययामास दन्ताभ्यां भुजाभ्यामिव धर्मराट् ॥ २८६ ॥
आरोहन् भूरुहान् केऽपि दावार्ता वानरा इव ।
गह्वरे प्राविशन् केऽपि व्याधत्रस्ता मृगा इव ॥ २८७ ॥
मूर्च्छितान्येऽपतन् केऽपि विषाघाता इव क्षितौ ।
पर्याटन्नारटन्तश्च केऽपि भूतातुरा इव ॥ २८८ ॥

---

१ नरोत्तमैर्मा सम्भिस्तेरैव । २ करेणुः=हस्तिन्यः । ३ दृक्=दृष्टि ।

नूतनोद्भूतकोपान्धे इभेऽभ्यर्णमुपेयुषि ।
एवं विचेष्टिरे सार्थलोका कोलाहलाकुलाः ॥२८९॥
(त्रिभिर्विशेषकम्)

रटदुष्ट्रं लुठल्लोठमटच्छकटसंकटम् ।
व्रजद्वृषभमाक्रन्दत्खराश्वतरभैरवम् ॥ २९० ॥
त्रसत्स्त्रैणं कदस्त्रैणं स्फुटत्पटकुटीपटम् ।
इत्यभूद् भीषणं तस्मिन्नन्यसैन्य इवागते ॥ २९१ ॥ (युग्म)
जीवग्राहं प्रनष्टेषु लोकेषु निखिलेषु च ।
एक एव मुनिस्तस्थौ मेरुचूलेव निश्चलः ॥ २९२ ॥
ज्ञात्वाऽवधिविज्ञानात् तस्य हस्तिनोऽतियोग्यताम् ।
कायोत्सर्गेण तस्थौ सोऽरविन्दो मुनिपुङ्गवः ॥ २९३ ॥
साकाममभ्यसरदुग्रं सुस्थितं तं मुनिं प्रति ।
गर्जितर्जितपर्जन्यो दधावे सिन्धुरोद्धुरः ॥ २९४ ॥
ध्यानमग्नध्यानस्थस्य प्रभावात् तस्य सन्मुनेः ।
पयःसेकादिवाङ्गारः शान्तः सोऽजनि कुञ्जरः ॥ २९५ ॥
शान्ताकारमसौ द्विपाधीशो भिक्षुं वीक्ष्य क्षमापरम् ।
संवेगं परमं भेजे पूर्वाभ्यस्तमिव स्वयम् ॥ २९६ ॥
शनैः शनैस्तपस्यन्तमागत्यैष द्विरदेश्वरः ।
तस्थिवांसं मुनिं पार्श्वे तस्य तस्थौ सुशिष्यवत् ॥२९७॥
मुमुक्षुरपि शान्तात्मा पर्यालोक्य निकामतः ।
कुञ्जरस्योपकाराय कायोत्सर्गमपारयत् ॥२९८॥
ज्ञात्वाऽसौ ज्ञानविज्ञानात् तत्पूर्वाचरणं मुनिः ।
सम्यग्ज्ञानिनां नूनं स्वधर्मो हि बहुश्रुताम् ॥२९९॥
धर्मोन्निमित्तबन्धुरस्य तिरश्चोऽपि हितैषिणः ।
प्रतिबोधमदात् साधुः स हि वीतस्पृहो यतः ॥३००॥
अनुभूतं त्वया भद्र ! मरुभूतिभवे पुरा ।
तत्सर्वं स्मर निःशेषं निद्रात्ययमिवाहनि ॥३०१॥
विश्वभूतिं स्वजनकं मातरं त्वमनुद्धराम् ।
किं न स्मरसि दुर्भ्रातृकमठं मां च भूपतिम् ? ॥३०२॥
ऽभ्यगाम्मुनेः पार्श्वे स्वीकृतं धर्ममार्हतम् ।
स्वयमज्ञः किं त्वमधुना कृत्यमस्मिन्न चिन्तयसि ? ॥३०३॥
कुत्सितं कर्म त्वयाऽनु कर्मणा कृतं पुनः ।
आर्तध्याने भवान् मृत्वाऽभवदत्र स्मर कुञ्जर ! ॥३०४॥

निरंकुशप्रकारकं विस्फुमार्गोस्थामतिरुन्धनम् ।
स्पानतस्पृष्टप्रतोरियं प्रथमं स्मरदोषुष ॥१०५॥
साधं वाक्येदनाधिये पर्ण येनूपवाजितम् ।
जिनदत्तुः सोऽपि दत्तोस्ह्ः कृपयगाय दशःपमः ॥१०६॥
रदरयमिदं स्वर्गमिति निष्टुषविम ।
असमर्थोत् पृथक्तां आति मधूनिमिव विस्मृतिम् ॥१०७॥
अविदश्य न इर्मतो आनिबन्ध्रया पदारुपाम् ।
सत्यां पृथक्भवास्यस्मरकार्योद्गम कपाम् ॥१०८॥
वैरापरानन्तो स्पादतस मन इव हर्ता ।
जिनवद् कर्मविकिरणं स्पापारिव प्रिशतायः ॥१०९॥
तुषदाय नरर्गुपव पंचदाभिव निमलम् ।
वपुतानिरमानसं मुख्यो पालकं पालर्यादिव ॥११०॥
करो कंत्व मरणो हस्तं चरणाविवार ।
वदपदे इमितस्तान द्विपदप दसामर ॥ १११ ॥

(त्रिभिर्विशेषकम्)

भूयो भूयो मुमं पाहीं मांस्पृहाविजमोसिता ।
सर्वापण्यवजं पावं आमयायिव मावतः ॥११२॥
मादृश्यं जिष्णुरः साधुसमन्यतनं दयमनवम् ।
यमंत्रायाधिंपाय वाक्यविव संयतिः ॥११३॥
पुमतं दृतिमत दातं आयमावितयेतसम् ।
यमाति जिष्णुदर्शसे सुधामधुरया गिरा ॥११४॥
शृणु जिष्णुर! संसारे स्मारणभागनुवर्तिनि ।
न सारं किञ्चिदेहिदं मंदारिव वितथुले ॥११५॥
दयनिरयम्यदुःखानृतिर्यग्मारकामपात् ।
कर्मैव पुदते जन्तुविवासांपाय विवसुन् ॥११६॥
दर्शप्रिया दर्शनिरय भागिभिरवाप्यभोगिभिः ।
संसारमयं कोपैर्नरोऽपि विधहयते ॥ ११७॥
कुर्युनिर्वितिवं कर्म कर्मयानिरवाप्यं ।
लपने सामसामान्यसंहाया मेरुरिव ॥११८॥
कय तापूपमयः क्वाऽपि धावनत्वमनुसरस ? ।
कय मनुजमर्पदस्यतनं मादृवं भवतः पुनः ? ॥११९॥

---

१ हर्षं - भिर । २ देवाम् —भन्तर । ३ लाभ-हास्मोरत्जन, सम्प्राप्तम् । ४ वर्गिम ।

विवेकविकलं क्वेदं तिर्यक्त्वं च तथाधुना ।
क्व चासौ विरतित्यागः क्वायं क्रोधो दुरुद्धरः ? ॥ ३२० ॥
इत्यस्य यतिनो वाचं शृण्वतस्तस्य हस्तिनः ।
निर्ययुर्दृक्पयःपूरा निर्झरा इव भूभृतः ॥ ३२१ ॥
पुनः पुनः क्षिपन् पांशून् मूर्ध्नि वाष्पितलोचनः ।
शुशोच करिराजोऽसौ नष्टश्रीरिव तद्धनम् ॥ ३२२ ॥
द्विपं खेदं प्रकुर्वाणमित्यभीक्ष्णं क्षमीशिता ।
वाचमुच्चरति स्मैव वार्णिकामिव शर्मणाम् ॥ ३२३ ॥
किं खेदेनाधुना दुःखदायिना द्विरदोत्तम ! ? ।
दीप्ते प्रदीपने कूपखनने नोद्यमः शुभः ॥ ३२४ ॥
कषायविषयासक्तं मुञ्च मातङ्गपुङ्गव ! ।
यतस्तन्मोचनात् स्वर्गगामिनः पशवोऽपि हि ॥ ३२५ ॥
तथाऽस्मिन् भवे सर्वविरतिस्तव नार्हति ।
निर्विवेके हि तिर्यक्त्वे दुर्लभा साऽभ्रपुष्पवत् ॥ ३२६ ॥
अणुव्रतानि पञ्चापि सप्तकं गुणशिक्षया ।
अस्तु सम्यक्त्वमेतानि व्रतानि गृहमेधिनाम् ॥ ३२७ ॥
सम्यगाराधनापूर्वं मार्गः स्वर्गापवर्गयोः ।
अर्हद्धर्मस्तवैषोऽस्तु श्राद्धस्येव धियांनिधे ! ॥ ३२८ ॥ (युग्मम्)
धर्मं पूर्वभवाभ्यस्तं भिक्षुणाऽभिहितं करी ।
मेने मूर्धप्रकम्पेन मौनीव विनयी वचः ॥ ३२९ ॥
वरुणा करिणी साऽपि तदा तत्रैव तस्थुषी ।
पश्यन्ती शमिनं लेभे जातिस्मरणमात्मनः ॥ ३३० ॥
साधूक्तं द्वादशात्मानं धर्मं सा प्रत्यपद्यत ।
हस्तिनी साऽपि हस्तीव, पत्न्यो हि पतिमार्गगाः ॥ ३३१ ॥
मुनिनाऽपि पुनः सिक्तः सन्मार्गोक्तिपयोभरैः ।
कुम्भिनां भावभूजन्मा महानन्दः फलप्रदः ॥ ३३२ ॥
निपीय पुण्यपानीयं मुनिराजसरोवरात् ।
स्तम्बेरमः स संतुष्टः प्राप्तश्रीरिव दुःस्थितः ॥ ३३३ ॥
श्राद्धधर्ममुपादाय चिन्तारत्नमिवानघम् ।
मुनिं नत्वा ततः कुम्भी व्यचरद् मुनिराजवत् ॥ ३३४ ॥

---

१ स्थूलेभ्यः प्राणातिपात-मृषावाद-अदत्तादान-मैथुन-परिग्रहेभ्यो विरति अणुव्रतपञ्चकम्
२ दिक्परिमाण-भोगोपभोगपरिमाण-अनर्थदण्डविरमणानि—गुणव्रतानि, सामायिक देशाव
सिक-पौषध अतिथिसंविभाग -शिक्षाव्रतचतुष्कम् । ३ सम्यक्त्वेन सहितम् ।

द्रक्षोपद्रवे तस्मिन् प्रशान्ते सार्थसार्थिकाः ।
मिलंस्तत्र संतुष्टाः सायं वृक्षेष्विवाण्डजाः ॥ ३३५ ॥
लाटपट्टसंघट्टकरकोमलकुड्मलाः ।
तिराजपदाम्भोजरजश्चित्रितमस्तकाः ॥ ३३६ ॥
निनाथगुणग्रामप्रदर्शनकपरायणाः ।
मुर्मुनिं मुदा लोका गोत्रदेवमिवागतम् ॥ ३३७ ॥
र्मप्रभावं तं वीक्ष्य विस्मिताः सार्थवासिनः ।
यातास्ति मुनेः पार्श्वे धर्ममादाद्दिरे मुदा ॥ ३३८ ॥
मानं महिमानं तं दृष्ट्वा सार्थाधिपोऽपि हि ।
व ध्यान्तं दृढयामास धर्मं, घन इवाधनः ॥ ३३९ ॥
ण्यानः श्रमिनः सम्यगुपदेशो स सागरः ।
द्धर्मोद्यनपोऽभूद् मर्यादात इवाम्बुधिः ॥ ३४० ॥
रविन्दमुनीन्द्रो द्राग् गत्वाऽष्टापदपर्वतं ।
णमत् प्रतिमास्तत्रार्हतां साक्षादिवार्हतः ॥ ३४१ ॥
दातीर्थे च सकलैस्त कृत्वा यात्रां यतिप्रभुः ।
हरत् पावयन् पीठं पृथिव्याः पांसुभिः पदोः ॥ ३४२ ॥
नाथीभूतमारण्यं तीर्थयन्दनतां विदन् ।
र्थनाथोऽप्यगात् स्थानमीप्सितं पूरितेप्सितः ॥ ३४३ ॥
प्रभृतिद्विपः सोऽथ प्रयणः प्राणिरक्षणे ।
त्सार्षीत् क्रमानिषण्णाक्षः पतितस्यः पुमानिव ॥ ३४४ ॥
पनातपसतप्तं संपिबन् नैर्झरं पयः ।
ष्कैः पर्णैः फलैर्मूलैर्दलैश्च कृतपारणः ॥ ३४५ ॥
तीयात्मकसमुत्पन्न इव पशु तपः सृजन् ।
तोष्णक्षुत्तृषाबाधां स सेहे प्रायशो द्विपः ॥ ३४६ ॥ (युग्मम्)
ग्राणो भावभिक्षुत्वं स मतङ्गजपुङ्गवः ।
र्धावि स्थण्डिलं तस्थौ सुस्थितात्मेव संयमी ॥ ३४७ ॥
र्वैशाखयोरुग्रप्रभावसंगतविग्रहः ।
अंसलीमातपं सोमदीप्तेरग्निरिव स्थिरः ॥ ३४८ ॥
रपसामलसंतप्तलोदककर्दमाकरे ।
यानोऽगमयद् ग्रीष्मं सरित्कूले परांसुवत् ॥ ३४९ ॥ (युग्मम्)
दिनीदूरनिर्गच्छच्छीतलानिलसंकुले ।

---

१ पराङ्गुः = गतप्राण. ।

पल्यङ्के निशि संतिष्ठन्नुत्कीर्ण इव निश्चलः ॥ ३५० ॥
प्लवद्ग्रान्दोल्यमानद्रुवल्लीसम्भववायुभिः ।
निष्कम्पो निशि कुम्भीन्द्रो हेमन्तमत्यवाहयत् ॥३५१॥ (युग्मम्)
गिरीन्द्रकन्दरागारे समासीनः समाधिमान् ।
तद्वन्मेघासुमद्रक्षादक्षोऽहान्यतिवाहयन् ॥ ३५२ ॥
गतागतमकुर्वाणो बिभ्राणो दुस्तपं तपः ।
अनैषीदेव वर्षर्तुमद्रिसद्मोऽप्यगह्वरे ॥ ३५३ ॥ (युग्मम्)
ग्रीष्म हेमन्त-वर्षासु दौष्कर्यमिति संश्रितः ।
शरीरं कृशयामास कर्मभिः सह सिन्धुरः ॥ ३५४ ॥
कायोत्सर्गं सृजन् क्वापि स्वैकतां सूचयन्निव ।
शुण्डां संयमयंश्चण्डां क्वापि कैरविणीमिव ॥ ३५५ ॥
क्वापि मौनं वितन्वंश्च भृतकुम्भ इवाम्भसा ।
तिष्ठन् क्वापि तरोर्मूले आतश्रम इवाध्वगः ॥३५६॥
करिणीकेलिविमुखः सम्मुखः पुण्यकर्मणि ।
दध्यौ स सिन्धुरः शर्ममर्मधर्मधुरां दधत् ॥३५७॥
(त्रिभिर्विशेषकम्)
धन्यास्ते ये तपस्यन्ति तपस्याऽऽरापि दुष्करा ।
सा नृजन्म विना न स्याद् विवेकैकनिबन्धनम् ॥३५८॥
विवेकविकलस्यात्र तपस्या नृभवोचिता ।
दुर्लभा मम दुर्दैवग्रस्तस्येव निर्वृतिः ॥३५९॥
धन्यास्ते ये सुपात्रेभ्यः प्रदीयन्ते स्वसम्पदः ।
नृणामेवोचितं दानं मत्तानामिव दन्तिनाम् ॥३६०॥
आपन्नोऽहं च तिर्यक्त्वं निजदुष्कर्मदोषतः ।
नालं दातुं किमप्यस्मिन् निर्गतिरिव वारिदः ॥३६१॥
धिग् धिग् मामन्तममंऽप्यार्तध्यानविधायिनम् ।
येन रत्नोपमं मर्त्यजन्म हारितवांस्तदा ॥३६२॥
तिर्यक्त्वं लब्धवानार्तध्यानेन क्लिष्टचेतसा ।
तिर्यक्त्वेऽप्यभवं दन्ती महाकायो महाबलः ॥३६३॥
गात्रगौरवतः किञ्चाशक्तोऽहं प्राणिरक्षणे ।
प्राणिप्राणपरित्राणं दातव्यं हि दयावताम् ॥३६४॥
गच्छंस्तिष्ठन्स्वपंस्तिष्ठन् यत्नेन चरणान् ।
अभयं मयकाद्यं प्राणिनां प्रीतिहेतवे ॥३६५॥

१ युग्मम् ।

पतत्पुष्पपरागौघपल्लवैः पुष्पकैरपि ।
पुष्पाणि पूरयन् महार्णव इव वारिभिः ॥३६६॥
आत्मानं भावयन्नाभिर्भावनाभिरनिन्दिताम् ।
निजशुद्धिं श्रमन् दुर्गो गमयामास वासरान् ॥३६७॥
इतश्च कमठः स्त्रि एकमंकमेत्यमानसः ।
अनुजं मरुभूतिं स्वं मृतं दृष्ट्वाऽपि तद्दृष्टवान् ॥३६८॥
कमठः तापसोटीरः सह दुष्कर्मं मुहुर्मुहुः ।
अन्यमोदत दुरात्मा स्वात्मानं पापिनं विदन् ॥३६९॥
सृष्ट्वा वामांगिनीं दुष्टां गुरुरप्याश्रमादिमम् ।
रवेः निष्कासयामास मन्दिरादिव कुर्कुरम् ॥३७०॥
दुष्टदुष्टेति सर्वांश्चकृत्स्नापसारणापत्संकटात् ।
अनुधावन् दूरतः पाणिं धृत्वा पुच्छमिवोग्रम ॥३७१॥
स्वानकष्टां भ्रमन् पुष्टो भोगीव कठिनाशयः ।
न ऐमे स्थानमप्येव कथापि दुराग्रहीमानिव ॥३७२॥
असौ दुष्कर्मकर्मीणि गर्भमाण पदे पदे ।
नीरसामपि न प्राप भिक्षां पितृभिषांगुपत् ॥३७३॥
आर्तध्याननिबद्धात्मा स मृत्वा कालमृत्युना ।
समवर्तीव हिंसात्मा कुर्कुटाहिरजायत ॥३७४॥
स्वीडीव महापक्षौ बिभ्रत् पक्षयोः सृजन् ।
धर्मद्रुमस्ति मुण्डायं कुन्तामामिव वीणपः ॥३७५॥
संहरन् बहुशः सत्वान् मत्सरस्येव सोदरः ।
सोऽभ्रमत् कुञ्जपुञ्जाद्रिगुहागर्भाद्रिगह्वरे ॥३७६॥ (युग्मम्)
मरुभूतिर्द्विपस्याथ चरतश्चाटव्यां यदा ।
अन्यदाऽभूद् ग्रीष्मकालो दुष्काल इव पाथसाम् ॥३७७॥
नीरन्ध्रेषु वाटुकावायुलंघ्य पङ्कपाथसी ।
अभूतां तत्र घर्मार्तो पर्वतेष्वात्मपूरके ॥३७८॥
नृपार्तो वारणो वारिपानार्थं संभ्रमंस्तदा ।
आपदयत् प्रासुकं क्वापि पयः ध्यानमिवाहनि ॥३७९॥
मानाट्टमरुच्छत्राच्छन्नं तीरवत् ससुष्कारम् ।
भ्रमन्नितस्ततः कुम्भी ददर्शैकं सरोवरम् ॥३८०॥
धारया तत् प्रासुकं तोयमजानन् कर्दमाम्भसोः ।
स्तोकयाऽस्तोकवंश पिपासाऽसौ कासारे यत्नतः करी ॥३८१॥

---

१ शैशिम —सूक्ष्मः । २ निर्वीर्दं निर्लोपमित्यर्थः ।

[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥ ([illegible]) ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥ ([illegible])
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥ ([illegible])
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।

१ [illegible]
[illegible]
[illegible]
[illegible]

उपयोगवशात् सद्यो विस्फूर्तिरवधेस्ततः ।
अस्मार्षीदात्मनो जन्मातीतं स्वप्नमिव द्रुतम् ॥ ४२९ ॥
सोऽहं हस्ती भवे पूर्वे निघृणानां शिरोमणिः ।
अज्ञानमरविन्द्यैर्मदर्पैर्धर्म्ममार्दितम् ॥ ४३० ॥
प्रतिपद्य तदादेशाद्विरतिं पत्युरप्यहम् ।
व्यधामनशनं स्वर्गश्रियामिव करग्रहम् ॥ ४३१ ॥
तैः पुण्यैरासदं कल्पमनल्पसुखतल्पनम् ।
यस्मादनशनं नाकिभोगानां प्रतिभूरिव ॥ ४३२ ॥
स्मृत्वैवं च समुत्थाय येऽप्यसंन्यस्तहस्तकः ।
स्नानासनमलंचक्रे राजहंस इवाम्बुजम् ॥ ४३३ ॥
गान्धर्वैर्गीतसंगीतकलमङ्गलगायिभिः ।
चिरं जीव चिरं जीयास्तुविवद्भिश्च बन्दिभिः ॥ ४३४ ॥
आनन्दाद्वैतसंनद्धैरमरैरमराग्रणीः ।
अभिषिक्तः सुखैः सार्धं मेघैर्मदरिवाम्बुभिः ॥ ४३५ ॥ (युग्मम्)
उत्थाय वाचयामास ततः प्रशस्तपुस्तकम् ।
आत्मकृत्यं च जज्ञेऽसौ गुरूक्तमिव तत्त्वधीः ॥ ४३६ ॥
गत्वा सिद्धालयेऽध्यासौ सुमनोभिर्मनोहरैः ।
प्रतिमाः पूजयामास शाश्वतीः पुण्यपुण्यधीः ॥ ४३७ ॥
इति प्रकृत्य कृत्यानि कृत्यानि कृतिनां वरः ।
अभुङ्क्त विविधान् भोगान् धर्मद्रुमसंनिभान् ॥ ४३८ ॥
अथ कुर्कुटसर्पोऽपि पर्यटन्नटवीतटे ।
अमारयद् बहून् जीवान् कालरात्रेरिवात्मजः ॥ ४३९ ॥
भूरिभिर्वासरैर्भूरिपापभारेण भारितः ।
मृत्वाऽधोगतिभाग् जज्ञे सोऽश्मखण्डमिवाम्बुधौ ॥ ४४० ॥
रौद्रध्यानपरः कृष्णलेश्याक्लिष्टमनःस्थितिः ।
क्षुत्तृषादीनसंत्यपीडानामेकमास्पदम् ॥ ४४१ ॥
पञ्चमक्षोणिगः सप्तदशवारिनिधिस्थितिः ।
पद्ममाधनियोग्याथ वेदना अन्वभूदसौ ॥ ४४२ ॥ (युग्मम्)
वरुणा हस्तिनी हस्तिवियोगाद्धृतिखेदभाक् ।
दुःखिताऽजनि तत्रैकस्थल उष्णेव पद्मिनी ॥ ४४३ ॥
व्यधाद् विशेषतः साऽपि तपः पत्युर्वियोगतः ।
मरणे रमणानां हि रमणीनां तपः श्रिये ॥ ४४४ ॥
दुस्तपं च तपस्तप्त्वा कृत्वान्तेऽनशनं पुनः ।

[illegible] सा वारणुका ॥ ४५५ ॥
स्मितविस्मयविस्मेरदेवदम्पुणवागुरा ।
तारुण्याऽगण्यलावण्यपुण्यपानीयकूपिका ॥ ४५६ ॥
तद्रोपपाद्शाख्यायाः प्रादुरासीत् सुरी च सा ।
पयोनघ्रपयोपाहसंपुटादिव हादिनी ॥ ४५७ ॥
बिभ्रती दद्रनं धूसं पुष्पचापमहीपतेः ।
प्रेरोराधेय संपूर्णं कुम्भं काञ्चननिर्मितम् ॥ ४५८ ॥
पीयरोन्नतवक्षोजभारभुग्नपपुलेता ।
घनाकारनितम्बेनाऽभिभूततटिमीतटा ॥ ४५९ ॥
मध्यदेशं च बिभ्राणा कुलिशोदरसोदरम् ।
निर्गच्छल्लक्ष्मीङ्कितपल्लवामकरक्रमा ॥ ४६० ॥
भुगराजिरयत्रस्तगुणागायविलोचना ।
पुरोर्निर्गमनमात्रेण भ्रामयन्ती सुपर्वणः ॥ ४६१ ॥
सा सुरी क्षोभयामास कटाक्षैर्निशितैः सुरान् ।
संसेयालक्षणाक्रम्य पाणिक्ष्मनक्षमगारत्रयैः ॥४६२॥ (पञ्चभिः)
तत्र कदेरे न काऽप्यासीत् देवो देवशिरोमणिः ।
तां निभाल्य मनोजन्मबाणैर्भिन्नं न यन्मनः ॥ ४६३ ॥
[illegible] निबन्धना ।
न सा अपात् मन स्थीयं [illegible] यरे ॥ ४६४ ॥
[illegible] विना काऽपि भुवे [illegible] सुरी रतिम् ।
[illegible] विना [illegible] ॥ ४६५ ॥
[illegible] प्रति [illegible] ।
[illegible] ॥ ४६६ ॥
[illegible] ।
न हि [illegible] ॥ ४६७ ॥
[illegible] ।
[illegible] ॥ ४६८ ॥
[illegible] ।
[illegible] ॥ ४६९ ॥
[illegible] ।
[illegible] ॥४७०॥
[illegible] ।
[illegible]

कुण्डलीकृतकायेन निधिः कुण्डलिना यथा ॥ २६ ॥
सहंसो भुवनान्तस्थो महाकन्दः परागवान् ।
ताराकारपृषद्व्यो यत्र मेरुः पयोजति ॥ २७ ॥
तत्रास्ति भरतक्षेत्रं क्षेत्रभूरिव सम्पदाम् ।
आकर्णीकृतकोदण्डदण्डकाकृतिविस्तरम् ॥ २८ ॥
नानाऽऽराम गिरि-ग्रामाभिरामं भाति यद् भृशम् ।
मणिस्वर्णादिसम्पूर्णं स्वर्गखण्डमिव च्युतम् ॥ २९ ॥
भान्त्यखण्डानि खण्डानि यत्र षट्क्षोणिभूषणं ।
चक्रास्तानुपमरत्नोपपन्नाः षडरका इव ॥ ३० ॥
तत्राभूत् स्वःपुराकारं नगरं पोतनाभिधम् ।
सदारम्भैकसंभोगा सज्जनाः त्रिदशा इव ॥ ३१ ॥
भाति चन्द्रोपलैर्यत्र कुट्टिमेऽलक्तरक्तिमा ।
स्त्रीपदन्यासजा यत्र रक्ताम्भोजमिवाम्भसि ॥ ३२ ॥
स्वर्णकुम्भा गृहेषूच्चैर्नैपीनाऽरुणशोभिताः ।
स्वःस्त्रीवक्षोजसंस्पर्धाविधित्सव्यो इव बभुः ॥ ३३ ॥
तत्रारिवृन्दकन्दैककुद्दालोऽभूद् महीपतिः ।
अरविन्द इति ख्यातोऽरविन्दस्फारलोचनः ॥ ३४ ॥
छिद्रलोपी साङ्गनैर्यत्स्पर्धीतं येन निजं यशः ।
नैर्मल्यं तदपि प्राप्तं काऽप्यहो ! अस्य वैदुषी ॥ ३५ ॥
यत्कृपाणप्रदीपैकनिलायां परिपन्थिनः ।
सर्वेऽपि परितः पेतुः पतङ्गा इव निस्त्रपाः ॥ ३६ ॥
तस्य राज्ञोऽभवद्राज्ञी धारिणी शीलधारिणी ।
पद्मानुकारिणी, यस्या वपुः श्रीश्च विपाद्यते ॥ ३७ ॥
अभवद् भूपतेस्तस्य विश्वभूतिः पुरोहितः ।
विश्वभूतिभृतः पूर्वदिक्पतेरिव वाक्पतिः ॥ ३८ ॥
निर्भरं यन्मनो जैनधर्मवासितमन्वहम् ।
कृमिरागैर्दुरुत्तारैर्वासःखण्डमिवाऽजनि ॥ ३९ ॥
मुरारातेरिव प्रीता यद्धामनि रमते रमा ।
सरस्वती मुखे यस्य हंसीव सरसीरुहे ॥ ४० ॥
सुररत्न-सुरद्रूणां सारमादाय वेधसा ।

---

१ हंस-=सूर्य, पक्षे तन्नाम्ना पक्षी । २ भुवनम्=जलम्, पक्षे भूमण्डलम् । ३ कन्दः=मेरु, पक्षे कमलकन्दः । ४ परागः=पुष्परजः, रजस्, पक्षे पराग-रेणु=पर्वतरजस् ।

अर्हम्

अथ द्वितीयः सर्गः

अथ पूर्वविदेहेऽस्ति सुकच्छविजयो महान् ।
धनधान्यरत्नादिसंपद्भिर्निधिभूरिव ॥१॥
सन्ति सौख्यान्यसंख्यानि संततं यन्निवासिनाम् ।
स्वर्लोक इव कालस्य तुर्यत्वं यत्र सर्वदा ॥२॥
अस्ति तत्र धनैराढ्यो वैताढ्यो नाम पर्वतः ।
यस्मिन् निर्मन्थनाथेन क्षमाधरतया स्थितम् ॥३॥
पञ्चाशत्पञ्चविंशतियोजनैः पृथुलोच्छ्रयः ।
राजतो राजते यश्च यशःपुञ्ज इवार्हताम् ॥४॥
मेखलाभ्यामुभाभ्यां यः पार्श्वयोरुभयोर्यमात् ।
विस्तारिताभ्यां पक्षाभ्यां पक्षिराज इव स्थिरः ॥५॥
कूटैर्नवभिरत्युच्चैः रत्नराजिविराजितैः ।
यो राजते महाशैल उत्कटैर्मुकुटैरिव ॥६॥
योजनानां सहस्रे द्वे द्वे शते साधिके च यः ।
अभिव्याप्य स्थितः क्षोणिं शेषनाग इवायतः ॥ ७ ॥
यत्कूटाग्रे सिद्धयक्षः क्रीडत्यनेकधा ।
विद्याधरगणः सार्धं सह केलिं प्रकल्पिताम् ॥ ८ ॥
यत्कूटाग्रमासीना विद्याधरवधूजन ।
मार्गाद् नियति यस्य रम्यं दिव्याभिर्मणीगिरा ॥ ९ ॥
यद्गुहागह्वराकारे विस्तर्णं निर्झराञ्जनम् ।
धीरयानुपविमानस्थसुरेशाः प्रसूता अपि ॥ १० ॥
भाति यस्योपरि श्रेणी रत्नकाञ्चनमालयः ।
संगुप्ता निकषस्यापि क्रीडन्ते कन्दुका इव ॥ ११ ॥
दक्षिणोत्तरयोः श्रेण्योः पुर्यो यत्र राजतः ।
शीघ्रमेतासनर्था स्थापितद्वयादिव संस्थिताः ॥ १२ ॥
नगरीव विशिष्टश्रेणिविलकनिकेतोपमा ।
तिलकेति पुरी रम्या स्वःपुरीवावनौ स्थिता ॥ १३ ॥
उच्चैर्धर्म्यस्थितैः कुम्भैर्येद्भूरिविभूषणम् ।
हेमप्राकारेन्दुरूपैर्मौलि स्वर्णादिकुम्भैः सुरद्युः ॥ १४ ॥
वर्ण्यते तस्य पूर्णपूर्णानां नामानि सन्तताम् ।
यत्र पूर्णोऽस्ति मध्यासन्नातुर्णय मानवी ॥ १५ ॥

यत्पथकीनां प्रयान्तीनां त्रुटित्वा हारमौक्तिकैः ।
पतितैर्भाति यद्भूमिस्ताम्रपर्ण्या इवानुजैः ॥ १६ ॥
योऽस्य पश्चिमपाथोधेर्मणिमाणिक्यमण्डिताम् ।
संलक्ष्यते इयच्छ्रेया रोहणाद्रेरधित्यका ॥ १७ ॥
प्रतापविद्युदा दग्धविपक्षघनगह्वरः ।
तत्र विद्युद्गतिर्नाम भूपो भूचरेश्वरः ॥ १८ ॥
यत्प्रतापस्य सूर्यस्य सामान्यमभिदध्महे ।
यदुद्गते रिपुस्त्रीदृक्कैरवैर्मुकुलायितम् ॥ १९ ॥
यत्प्रतापातपस्योष्णदीप्तिर्दीप्तेर्महान्तरम् ।
निदाघमन्दस्तपया तसे तपन्तेऽहर्निशं न हि ॥ २० ॥
राज्ञस्तस्याभवद्राज्ञी तिलकेत्यभिधानतः ।
यया लावण्यलीलाभिः स्त्रैणेषु तिलकायितम् ॥ २१ ॥
दृग्मुखाभ्यां जितौ जाने यस्या मृगमृगाङ्ककौ ।
एकत्रीभूय यद्‌मन्त्रं कुर्वाते तज्जिगीषया ॥ २२ ॥
यन्मुखे विहिते चन्द्रं वृथा जानन् पयोजभूः ।
अपीपुञ्जं निचिक्षेप लक्ष्यलक्षणमन्तरे ॥ २३ ॥
सोऽथ विद्युद्गतिर्भूपः सा राज्ञी तिलकावती ।
मिथस्तयोरभूत् प्रेम गौरीगौरीशयोरिव ॥ २४ ॥
नम्रानेकमहीपालमौलिमालार्चितक्रमः ।
बुभुजे भूपतिर्भोगांस्तया सार्धमहर्निशम् ॥ २५ ॥
विलासैर्लालितैर्लास्यैर्हास्यैश्च भूरिभिः सदा ।
सा मनो रञ्जयामास शम्भोर्गौरीव भूभुजः ॥ २६ ॥
एवं सुखमहाशाखिशाखाशाखामृगोपमौ ।
कालं लवमिवानल्पमित्यवाहयतामिमौ ॥ २७ ॥
इतः करटिकोटीरजीवः सोऽष्टमकल्पगः ।
स्वीयायुः पूरयामास भानुमानिव वासरम् ॥ २८ ॥
एकपर्णमिव च्युत्वा ततः सोऽवातरत् सुरः ।
कुक्षौ श्रीतिलकावत्या मुक्तावच्छुक्तिसंपुटे ॥ २९ ॥
अद्राक्षीत् पद्मपत्राक्षी स्वप्नं साऽस्वप्नसूचितम्[1] ।
गर्भानुभावतः स्वप्ना अपि स्युः शुभशंसिनः ॥ ३० ॥
मेरुभूरिव मन्दारप्ररोहं प्रतिबिभ्रती ।
तं गर्भं साऽभवद्भूमीभर्तुः प्रेम्णे महीयसे ॥ ३१ ॥

१ अस्वप्न = देवः ।

धर्मध्याननिधावस्मिन् निध्याते साधुधूर्वहे ।
निरातपुङ्खलानेव रोपराशीन् भुजङ्गमः ॥८१॥
प्राग्भयाभ्यस्तवैरः स भोगी भोगेन भिक्षुकम् ।
वेष्टयामास दुष्टात्मा प्रकाण्डमिव चान्दनम् ॥८२॥
कुण्डलीकृतकायेन तेन कुण्डलिना तदा ।
वेष्टितः संयमी शातकुम्भकुम्भ इव व्यभात् ॥८३॥
दर्वी दर्वीकरो दीर्घां दीर्घनिद्राविधायिनीम् ।
विधाय यतिनः कायं फूत्करोति स निःसमम् ॥८४॥
जिह्वाभ्यामेव प्रहाराभ्यां तं मुनिं प्रतिमाधरम् ।
अलोलिहल्लेलिहानस्तदायुः स्वादयन्निव ॥८५॥
उद्भटेन फटेनाहिर्मोरयामास तं यतिम् ।
सुतं निर्गमितद्रव्यं स पितेव चपेटया ॥८६॥
विषराशिभिरद्राभिरेव आशीविषां दधा ।
अदशत् साधुधौरेयं श्वभ्रे गन्तुमिवोत्सुका ॥८७॥
तेन प्रसर्पता सर्पविषेणाक्रमितं वपुः ।
तस्य चित्तजमार्धातो ध्यातवानिति साधुराट् ॥८८॥
सपर्योऽक्षारकृतं कष्टदकारिमुल्योऽहितेऽपि मे ।
एतद्दंशार्थिरेषा यत् सोढा मोक्षाय शर्मणे ॥८९॥
धीरेणापि हि धीरेण मर्तव्यं यत जन्मिना ।
एतत्र शर्मणे धैर्यमधैर्यं स्यादशर्मणे ॥९०॥
ददाति दंदशूकोऽस्मिन् साम्यमेवोचिते मम ।
स्तोतर्यस्तोतरि स्यान्तं तुल्यं निःश्रेयसश्रिये ॥९१॥
शमसंयमशीलादिपालनात् कर्मणां क्षयः ।
एतस्मीहेव तं कुर्यात् सर्पोऽसाधुपकारकृत् ॥९२॥
एवं साम्यसुधासिक्तधर्मध्यानधराधरः ।
क्रियाऽऽन्तिकयऽस्फुरत् तस्य प्रतद्रोरिव मञ्जरी ॥९३॥
आलोच्य विधिवत् पापं भजन् साम्यं च जन्तुषु ।
व्यधादनशनं साधुर्धर्मसौधध्वजोपमम् ॥९४॥
ध्यायन्ध्यानिस्थतां चित्ते स्मरन् पञ्चनमस्कृतिम् ।
विपद्यैव ययौ कल्पमच्युतमन्यमच्युतम् ॥९५॥
दीप्तिमानिव दीप्तानां दीप्तीनामेकमास्पदम् ।
सर्वावयवसुभगः शम्भुः शिल्पमिवादिमम् ॥९६॥
भूषितो भूषणैर्भव्यैः शोभितः पुष्पदामभिः ।

सुखारोहेव निःश्रेणिः स्वर्गापवर्गयोर्मनोः ॥११३॥
हित्वा याम्योदक्पथाभ्यां यत्पुरं याति भानुमान् ।
प्रासादाग्रहर्म्यशृङ्गाग्रे रथभङ्गभयादिव ॥११४॥
यत्र रत्नमये चैत्यकुट्टिमे विम्बितः शशी ।
राजते राजतस्थालमिव कस्तूरिकान्वितम् ॥११५॥
यच्चैत्यशृङ्गकलशश्रेणीभिर्निर्जिता घटाः ।
कुम्भिकुम्भेषु कतिचित् कतिचित्स्त्रीकुचेष्वगुः ॥११६॥
यद्रामाभिरामश्री-वसन्तासमयावुभौ ।
दम्पती इव शोभेते नित्यमवियोगिनौ ॥११७॥
यत्रियोर्योऽभवद् यज्ञयोर्वाक्यस्तत्र भूपतिः ।
धैर्याद्री यश्रियज्ञयत्प्रचण्डश्चण्डशासनः ॥११८॥
यत्कीर्तिसर्पिणी व्योम्नि प्रससार शरत्प्रभा ।
यस्याः पुष्पाणि तारालौ कोशः पूर्णेन्दुमण्डलम् ॥११९॥
यत्प्रतापः प्रदीप्तात्मा प्रदीपक इव व्यभात् ।
पक्षेष्वरिपतङ्गेष्वकजमे वैरियशोऽञ्जनि ॥१२०॥
तस्याजनि महीजानेर्जाया मायाविवर्जिता ।
यथा लक्ष्मीपतेर्लक्ष्मी नाम्ना लक्ष्मीवती सती ॥१२१॥
यद्रूपं द्रष्टुमाप्याम्यनिमेषत्वनिमेषता ।
अपिमनकाङ्क्षिणः सर्वे सदर्थे यदनुष्ठिते ॥१२२॥
शोणितैः पाणिपादोष्ठपुटैर्भाति स्म या भृशम् ।
दलैर्विदलितै रक्ताम्भोजिनीव सुकोमलैः ॥१२३॥
यद्वास्यस्याकलङ्कस्य सदैवोदयिनो न हि ।
हीयमानकलस्याङ्ककालस्येन्दोः समानता ॥१२४॥
सत्यप्यन्तःपुरे पत्युः सैव चेतोऽन्तरेऽधिवसत् ।
यतस्तारास्वनल्पासु रोहिण्येव विधोर्हृदि ॥१२५॥
दम्पत्योः सुखनिर्मग्नमनसोरनयोर्बहुः ।
समयोऽगमदेकान्तसुषमारसहोदरः ॥१२६॥
इतः कन्दर्पदर्पैककेलिविह्वलबुद्धिभिः ।
नानाशृङ्गाररचनाचतुराशयचारुभिः ॥१२७॥
संक्रान्तकान्तरागाभिरप्सरोभिर्निरन्तरम् ।
सुरतं पर्यचरिकं चेतःसंक्रमार्तेव भेजुषः ॥१२८॥
पूर्णीभूय किरणवेगर्जीवसुपर्वणः ।
आयुस्तस्याच्युते कल्पे भूमिः सायं रवेरिव ॥१२९॥त्रिभिर्विशेषकम्

ततश्च्युत्वा स गीर्वाण उदियाय मरालवत् ।
राज्ञीलक्ष्मीवतीकुक्षिसरसीसरसीरुहे ॥१३०॥
ईषन्निद्राविमुद्राक्षी साऽद्राक्षीत् स्वप्नमुत्तमम् ।
भुवोऽन्तर्मणिवद् गर्भस्तत्कुक्षौ ववृधे च सः ॥१३१॥
वज्रवीर्यकुलाकाशप्रकाशविधिधूर्वहम् ।
रविबिम्बमिव प्राची साऽसूत सुतमुत्तमम् ॥१३२॥
कृतोत्सवो धराधीशस्तनोस्तस्य शुभेऽहनि ।
वज्रनाभ इति ख्यातामाख्यामाख्यत् सुखावहाम् ॥१३३॥
शशीव कलयामास स क्रमात् सकलाः कलाः ।
निदर्शनमिवाज्ञानाद् विज्ञस्तु जनकोऽप्यमुम् ॥१३४॥
तमालिलिङ्ग तारुण्यावस्था वल्लीव नालिगम् ।
सुवर्णे मणिवत् तस्मिंस्तारुण्यमपि दीप्तवत् ॥१३५॥
लावण्यं तस्य निर्वर्ण्य वर्णनीयगलोचनैः ।
निपेते निर्भरं तस्मिन् सरोजे भ्रमरैरिव ॥१३६॥
यौवनालङ्कृतः स्मारमन्वनो अमनन्मनः ।
आक्रीडाद्रौ स तन्वीभिरक्रीडद् दीपपोतवत् ॥१३७॥
इतोऽजनि जनपदे [illegible] ।
पद्मना विजयालक्ष्मीः स्वर्गेणा इव अजिरे ॥१३८॥
तत्राभूच्चन्द्रवत् कान्तस्तत्र कान्तोऽवनीपतिः ।
[illegible] ॥१३९॥
ऊर्ध्वनी नयनी स्वीयवपुःश्रिया अजायत ।
विभवाढ्या सुता तस्य कमलेव पयोनिधेः ॥१४०॥
यौवनालङ्कृताङ्गी च पूर्णा वेगः क्षणादपि ।
अहार नूपुरी सा, कोलितां वरमुत्तमम् ॥१४१॥
धनदेनां यौवनारूढां सुतो वीक्ष्य व्यचिन्तयत् ।
[illegible] सुखभूषणम् ॥१४२॥
मद्दत्तं [illegible] ।
[illegible] ॥१४३॥
[illegible] वज्रवीर्यनृपात्मजम् ।
[illegible] ॥१४४॥
नवैव दातुं निजां पुत्रीं [illegible] ।
[illegible] स नगरीं तां शुभंकराम् ॥१४५॥

१ [illegible] । २ [illegible] ।

स्वयंवरां वरार्हां तां पित्रादिष्टः शुभे क्षणे ।
उपयेमे वज्रनाभः पद्मनाभ इव श्रियम् ॥१४६॥
विजया तं पतिं प्राप्य मेने स्वात्मानमुत्तमम् ।
तादृक्पुंरत्नसंयोगे प्रमोदः प्रगुणीभवेत् ॥१४७॥
कुबेराख्योऽन्यदा वज्रनाभमातुलनन्दनः ।
स्वत्कृतो जनकेनागाद् वज्रनाभस्य संनिधौ ॥१४८॥
परलोकात्ममोक्षादि नास्तित्वेन विदन् हृदि ।
नास्तिकोऽसौ कुबेरस्तं कुमारमन्ववर्तत ॥१४९॥
धर्मं शर्ममयं कुर्वन्नित्यूचे तेन भूपभूः ।
किं मुधा कुरुषे धर्मं पायसामिव मन्थनम् ! ॥१५०॥
शिरीषसुकुमारं स्वं शरीरं भोगभाजनम् ।
मा ज्वालय महाकष्टैः श्रीखण्डमिव पावकैः ॥१५१॥
मृगीदृगङ्गकौशेयतलिकाभ्यङ्गमर्दनैः ।
फलैरेभिः सफलय स्पर्शनेन्द्रियमात्मनः ॥१५२॥
स्वादुभिर्दधिदुग्धाज्यपानमुख्यभोजनैः ।
फलं भुङ्क्ष्व रसज्ञायाः फलैरेभिः सुदुर्लभैः ॥१५३॥
कुन्दचम्पककङ्केल्लिमालतीसुमनःस्रजाम् ।
सफलीकुरु सौरभ्यैरिन्द्रियं घ्राणसंज्ञकम् ॥१५४॥
नेत्रोत्सवक्षणोत्साहधराधिपकरपिङ्गमाल् ।
रूपीदृशां निभाल्यैतान् स्वनेत्रे सफलीकुरु ॥१५५॥
वेणुवीणाकलालापमृदङ्गमधुरैः स्वरैः ।
श्रुत्योः फलं गृहाणेदं फलैरेभिर्महामते ! ॥१५६॥
स्वैरं प्राप्तान् सखे ! भुङ्क्ष्व विषयान् विषयेप्सितान् ।
पीयूषन्ति हि तारुण्ये विषया विषयैषिणाम् ॥१५७॥
धर्मैहिकं त्यजन् प्रेत्यसुखेच्छुः खेदमेष्यसि ।
स्तोकमम्भो विहायैणतृष्णया धावितादिवत् ॥१५८॥
कुमार ! सुकुमाराङ्ग ! मुधा ते मानुषं जनुः ।
यदेतान् दुर्लभान् भोगान् न भुङ्क्षेऽन्नमिव ज्वरी ॥१५९॥
श्रुत्वेति नास्तिकस्यास्यात्यद्भुतं वचनं चिरम् ।
कृतमौनो महात्माऽसौ चिन्तयामास चेतसि ॥१६०॥
मास्त्ययं समयो नूनममुना सह जल्पने ।
मर्मज्ञानं विना न स्याच्चिकित्सा फलकारिणी ॥१६१॥
मर्मवेत्तुः कुतोऽप्येनं बोधयिष्याम्यहं गुरोः ।

तपोभिर्दुस्तपैरात्मा भवद्भिः कृशितश्चिरम् ।
तत्फलं चेद चेत् तर्हि स्युर्वः साम्राज्यसम्पदः ॥१७९॥
हत्वाऽन्यप्राणिनां प्राणानस्माभिः पोष्यते वपुः ।
तत्फलं चेत् तदाऽस्माकं रक्षस्त्वमिह जायते ॥१८०॥
देवानामप्यलभ्ये यद् भालभागे च भूभुजाम् ।
मणिर्दृषन्मयोऽप्यस्थात् पुण्यं तेनात्र किं कृतम् ? ॥१८१॥
उत्पन्नेऽपि शरीरेऽपि चारुचन्दनचर्चिते ।
मलोऽसौ त्यज्यते लोकैः पापं तेनात्र किं कृतम् ? ॥१८२॥
यदुक्तमयमात्मा स्वकृतभोक्ताऽत्र तन्मृषा ।
धर्मिणाऽधर्मिणा चात्र कृतं स्वं स्वं न दृश्यते ॥१८३॥
कृतानुसारतः प्राप्तिश्चेति यत् तदसंगतम् ।
कृतेन केनेन्द्रचापः प्राप सौन्दर्यमद्भुतम् ? ॥१८४॥
शुभाशुभं स्वं तन्मध्ये यत्प्रत्यक्षं, न चेतरत् ।
विमुच्योत्सङ्गगं गर्भं गतेहा नेह शोभना ॥१८५॥
अन्योऽप्यात्मनि यः कश्चिद् गुणारोपः मुधैव सः ।
तदभावात् तयोर्यस्मादाधाराधेयता स्मृता ॥१८६॥
गुरुरप्याह शान्तात्मा पीयूषसदृशा गिरा ।
भद्र ! निस्तन्द्र ! भद्राय शृणु श्लोकैः सदुत्तरम् ॥१८७॥
अध्यात्मज्ञानगम्योऽयमात्मा भाव्यो मनीषिणा ।
सुखी दुःख्यस्म्यहं चैव प्रत्ययो जीवसूचकः ॥१८८॥
शरीरं मामकं चैतद् मतिरेषा वपुष्मताम् ।
कोऽपि देहान्तरे देही संभाव्यो देहभेदभाक् ॥१८९॥
देहे गेहे धने धान्ये द्विपदे च चतुष्पदे ।
विना नेतुर्न शक्नोति कर्तुमङ्गीकृतिं परः ॥१९०॥
विद्यते स्वशरीरे चेदात्माऽसौ सुखदुःखभाक् ।
परेषामपि कायेऽयं भविता चित्तविभ्रमः ॥१९१॥
संवेत्ता सुखदुःखानामात्मैवास्ति तनुर्न हि ।
यदभावे न शीतोष्णक्षुत्तृषां वेत्ति यत् तनुः ॥१९२॥
अस्त्यात्मनोऽस्य सद्भावे परलोकगतिर्ध्रुवम् ।
वस्तुनोऽपि विनष्टस्य पर्यायेण पुनर्जनिः ॥१९३॥
चेतने चेतनाऽभ्येति प्रेत्यात् कान्तिरिवाश्मनः ।
मुखे क्षिपति पयोजमनुक्तोऽपि यतः शिशुः ॥१९४॥
अचेतनेभ्यो भूतेभ्यश्चेतना चेष्यते कथम् ।

कषायाः स्युः क्रोधमानमायालोभाभिधा अमी ।
चत्वार एव संसारदुर्गद्वारा इवोद्भटाः ॥२१२॥
रूपगन्धरसस्पर्शशब्दाख्या विषया अमी ।
कारणानि कषायाणां बीजानीवावनीरुहाम् ॥२१३॥
एकैकोऽपि विषयः (स ?) सर्वासक्त्या निषेवितः ।
महानर्थाय जायेत हालाहल इवाङ्गिनाम् ॥२१४॥
तस्माद् विषयमूलो यः संसारधरणीरुहः ।
तमाच्छेत्तुमसौ च्छेत्ता यथाऽसौ नैव वर्धते ॥२१५॥
इत्यमुष्य गुरोर्वाचा तस्य मिथ्यात्वसंगतिः ।
दूराद्दूरं निर्जगाम रवेरुद्येव शर्वरी ॥२१६॥
गुरुणाऽऽख्यातमिदं तत्त्वं निर्वाणपथदर्शकम् ।
दृशोरस्य कुबेरस्य निर्जरस्येव आंजनम् ॥२१७॥
भूम्यन्तमस्तको भालसंलग्नकरकुड्मलः ।
आत्तश्रद्धः कुबेरः स पप्रच्छ प्रणमीश्वरम् ॥२१८॥
भगवन् ! केन मार्गेण प्राप्यते चापुनर्भवः ? ।
न तं विवेद शर्मास्मिन् विनाम्भोदं यथा कृषिः ॥२१९॥
परोपकारप्रवणः प्रवीणः पुण्यकर्मसु ।
सूरीशः कथयामास धर्मं शार्मैककारणम् ॥२२०॥
अर्हन् देवः कृपा धर्मो गुरवश्च मुमुक्षवः ।
धर्मोऽयमार्हतस्तत्त्वत्रयीरूपः सुखावहः ॥२२१॥
सूरिणा (कृत ?) कक्षोदरनिर्मलीकृतहृज्जलः ।
कुबेरस्तमुपादत्त धर्मं बीजमिव श्रियाम् ॥२२२॥
चिरञ्जीव जगल्लोके सवारिरिव वारिदः ।
वज्रागार यथोपार्जि धर्मोद्गारमिवापरम् ॥२२३॥
चिरञ्जीव जगल्लोकशोककोकहिमद्युते ! ।
सूरे ! दुर्द्रोहमोहाद्रिभिदेकभिदुरोपम ! ॥ २२४ ॥
स्वप्रसन्तंगुणागारानगारगणपुंगव ! ।
इत्यज्ञानमहं धर्मं आरण्यक इव सत्पथम् ॥२२५॥
वचोभिर्विविधैरेवमभिष्टुत्य यतिप्रभुम् ।
प्राशंसत् पुनरप्येष वज्रवीर्यनृपात्मजम् ॥२२६॥
वज्रवीर्यमहीपालकुलमौलिकभूषण ! ।
धर्मानुग्रहकारित्वात् त्वं मे बन्धुर्गुरुश्च मे ॥२२७॥
यदहं बोधितो धर्मगुरुरस्य इव सत्पथम् ।

इत्याहितप्रेम्णैव भृशमां प्रीत्या प्रोतविडम्बना ।
विघ्ने विषदोऽस्यंश्च यथा यत्र दयालुमान् ॥२४५॥
इहांतरस्तांतरहार्दिद्रुमादिविनिकृताः ।
हरन्ति सुकृतमाप्यान् वारस्य इव दैहिनाम् ॥२४६॥
नित्यपुण्यतरेषु च यमेदो देहिनां महान् ।
न मस्ता निर्नदेश्च तेन निरन्ति संयुतो ॥२४७॥
नित्यानमिव रयतालामर्शोल्कमाहितम् ।
हृदये च प्रमत्तानामिविद्धैवमनस्व रवित ॥२४८॥
एवं संयमनात्हो यज्ञानाशोऽवर्गायम ।
आर्यादिह शुभं दृष्ट्वा जिघृक्षुर्मोहरत्नादिरर्थीम् ॥२४९॥
वागादत्तव शुभां भार्यामुखेन पुरमानमेष्याम् ।
कृतहाम्या यथा स्वार्थे एतेऽन्यथं भवाम्यदम् ॥२५०॥
एवं स विविधैर्वाक्यैः प्रतिवाक्य स्वमात्मजम् ।
न्यायं व्यस्य अवधीरणामलक्षणीलयमास्थम् ॥२५१॥
एवं संयमपूतात्मः छात्रको दिव्यवर्मणः ।
प्राप्ते जगाद स देवंच रतोऽवंधाभिनेत ॥२५२॥
पुत्रकमाम्बुजेत्युदमुद्राणां विशताप्रस्ताम् ।
पंटिरे प्राहसाहानि तात्तानि शुनिनाऽमुना ॥२५३॥
यथाष्टमादिभिर्देहः दुष्करं तपतस्तपः ।
तस्याभूत् स्पोसमताभित्यं तपांशोरिव पल्लवः ॥२५४॥
अन्याय यद्यं दत्तरमस्याशेवमपतस्तपः ।
यत् तपस्यतो लक्ष्यः किरणे इव पृथुकः ॥२५५॥
दानमामा यज्ञमासर्पिः स्वदारेऽपि निस्पृहः ।
स्वपुरोगामर्थ्येवाक्पी प्रतिमां प्रतिपद्यवान् ॥२५६॥
अर्थेपुर्वेदस्थेव यथावी प्रतिमाधुरः ।
सुकृत्तपविमवं प्राप्तविविष्वेगुमहंतः ॥२५७॥
संघत्तिनादिप्रतिमोऽप्रतिमः प्रगुणैर्गुणैः ।
विमर्दे व्याजनिर्मुक्तः सुकृत्तप्रियमयापनी ॥२५८॥
इत्थंतारतन्तोपः स पञ्चमापनिसमयम् ।
संयम विविधं दुःखं ततो प्रागुरुपवर्तत ॥२५९॥
विनीत प्रभाम अभ्यासायपोहानुगालिय ।
विपर्ययानिषु यथाम स अथात् भूरिशो शमी ॥२६०॥

---

१ मत्—हकारौषपतली ।

कोदण्डपाणेः परमाधार्मिकस्येव नन्दनः ।
भिल्लोऽपि निरगात् तिर्यग्नारकत्रासकारणम् ॥२७७॥
आगच्छन् सम्मुखः साधुर्दृष्टोऽनेन पापिना ।
ममामङ्गलमद्यैव चिन्तितं चेति दुर्धिया ॥२७८॥
कोऽयं मुण्डः प्रचण्डात्मा प्रोद्दण्डाखण्डविग्रहः ?।
गच्छतो मम पापर्द्ध्यन्तराय इवान्तरे ॥२७९॥
येदहं स्खलितोऽनेन मृगयार्थे व्रजन् वने ।
तदाहमप्यमुं मुण्डं स्खलयामि भुजङ्गवत् ॥२८०॥
पीतश्वापदरक्तानां रक्तानां मधुजाऽध्वनि ।
पृषत्कानां ममाद्यैव भूयाद् भुक्तिर्मुनिभुवः ॥२८१॥
एवं दुर्ध्यानबद्धात्मा दुर्बुद्धिः शबरप्रभुः ।
बाणेन निजपानैनमायान्तं यतिपुंगवम् ॥२८२॥
प्रहरस्य प्रहारेण तेन प्राणान्तकारिणा ।
ज्ञात्वाऽऽयुषोऽवधिं दक्षो संयमी संयमाशयः ॥२८३॥
मा कुप्यस्त्वं किरातेऽस्मिन्नात्मन् ! यथानियमघ्नने ।
कारणं सुखदुःखेषु प्राणिनां हि पुराकृतम् ॥२८४॥
मयाप्यो जन्म सुप्रापं स्पर्शखण्डमिवाददताम् ।
चिन्तारत्नमिवाप्राप्यं मानुषं जन्म जन्मिनाम् ॥२८५॥
सम्प्राप्तेऽपि दुष्प्रापं कुलमार्यजनोचितम् ।
कुलेऽपि धर्मसामग्री मरुच्छायेव दुर्लभा ॥२८६॥
सामग्र्यामपि च श्रद्धा ग्रीष्मेऽम्भ इव दुर्लभा ।
श्रद्धाङ्कुरे सति प्रौढे दुष्प्रापोपासनेच्छता ॥२८७॥
धर्मेऽपि हि निःशेषविरतिर्दुर्लभा भृशम् ।
आत्मन् ! सापि त्वया लब्धा क्षुधितेनेव भोजनम् ॥२८८॥
अमुं घ्नन् शबरं रोषेऽधुना चेद् भविता तव ।
सलब्धमपि तत्सर्वं वृथाऽमेध्य इवाङ्कुरः ॥२८९॥
इत्यात्मानमभिषिच्य शमोदैः शमधारिणा ।
व्यधादाराधनां सिद्धसाक्षिकं साधुराग्रणीः ॥२९०॥
मनोवाक्तनुमूलानि पापान्यालोचयन् पुनः ।
विपद्य धर्मनामर्षिर्मध्यग्रैवेयके ययौ ॥२९१॥
विद्युत्पुञ्ज इवोद्दामधामधीसमलङ्कृतः ।
ललिताङ्ग इति ख्यातो ललिताङ्गः सुरोऽजनि ॥२९२॥
कुरङ्गः [illegible] कुरङ्गात्मा वीक्ष्यैनं पतितं यतिम् ।

अर्हम्

अथ तृतीयः सर्गः ।

अथास्मिन् जम्बूद्वीपेऽस्ति प्राग्विदेहविभूषणम् ।
पुरं सुरपुरं नाम्ना पुरन्दरपुरोपमम् ॥१॥
नन्दनक्रीडमानन्दाः सुरसार्थश्रितालयाः ।
यत्र गेहेषु भामिन्यो भान्ति रम्भा इवाद्भुताः ॥२॥
सदृग्वर्णाः सदृग्भूषाः सदृग्वस्त्राः सदृङ्मुखाः ।
भिन्ना अप्येकहृद्भावा यत्र लोकाः कुचा इव ॥३॥
यत्र स्फटिकहर्म्याली स्पृष्टा पीयूषरोचिषा ।
पौराणां स्वर्णदीनारस्नानस्नेहमपूरयत् ॥४॥
वीक्ष्य स्फटिकहर्म्येषु संक्रान्तं तरणिं नवम् ।
पाणीन् क्षिपन्ति पद्माक्ष्यो घुसृणास्पदकाम्यया ॥५॥
यत्र सौधमहानीलरत्नभाः प्रेक्ष्य चन्द्रमाः ।
बाष्पभ्रान्त्या लम्बयति करांश्चारयितुं मृगम् ॥६॥
तत्रारिनृपनिकरकोकशीतकरोपमः ।
भूपो नाम्ना धनवाहुर्वज्रपाणिरिवाजनि ॥७॥
यद्दानातिथिभूलोकः स्वशेषो वेति निर्भरम् ।
पाथःपूरैः स्वपतीनां प्रकुर्वन्निव तर्पणम् ॥८॥
यत्क्षिप्ताः खगारुग्रमण्डपाः दावराजयः ।
यत्प्रत्यर्थिनृपग्रामाः सद्ग्रामा इव रेजिरे ॥९॥
गेहाद् भो वरमरण्यं वनं यद्वैरिसूनवः ।
अशिवा अप्यमवाम साशिवा यथमत्र यत् ॥१०॥
प्रस्तीर्णादर्शना नित्यं दर्शनानन्ददायिनी ।
सुदर्शनेति तस्याभूद्राज्ञी राज्ञोऽतिवल्लभा ॥११॥
[illegible]

[illegible]

पादैस्तस्यैत्रमित्राणि तापयत्यम्बुजानि यत् ॥१३॥
अस्यै ददौ विधिर्लात्वा लावण्यं सुरसुभ्रुवाम् ।
तद्दृश्यं तु मिथैतासामनिमेषा दृशोऽभवन् ॥१४॥
गाम्भीर्यस्थैर्यमाधुर्यचातुर्यप्रमुखैर्गुणैः ।

रञ्जयामास सा नित्यं पतिं निजं पतिव्रता ॥ १५ ॥
पञ्चेन्द्रियैकविषयान् (सानन्दं ?) विषयाधिपः ।
तया सममभुङ्क्तैव [illegible] इवामरः ॥ १६ ॥
मध्यग्रैवेयकस्थो योऽनुभवन् सुरसम्पदः ।
जीवः श्रीवज्रनाभर्षेर्निजां स्थितिमपूरयत् ॥ १७ ॥
च्युत्वा सुदर्शनादेव्या उदरे सोऽमराग्रणीः ।
अवातरद् व्योम्नः कूलङ्कषाकूले मरालवत् ॥ १८
प्रसुप्ता सुखशय्यायां सद्वैषा सुदर्शना ।
चक्रिजन्मसूचनः स्वप्नानीक्षांचक्रे चतुर्दश ॥ १९ ॥
ततस्तु पट्टराज्ञी सा दृष्ट्वा स्वप्नान् शिवावहान् ।
विमुमोच द्रुतं निद्रां पतिमपि प्रबोधयत् ॥ २० ॥
बिभरामास सा गर्भं समुद्रमिव सम्पदाम् ।
[illegible]दरा गर्भानुभावाच्च शुभावहा ॥ २१ ॥
गर्भप्रभावतो भाविमहोदयमहाभुजः ।
[illegible] कल्पवल्लीव वल्लभा वल्लभाऽभवत् ॥ २२ ॥
[illegible] सूतिकावेश्म [illegible] त्विषा ।
देवी सुदर्शना काले सुतरत्नमजीजनत् ॥ २३ ॥
कर्णयोरमृतस्यन्दं जन्माकर्ण्याङ्गजन्मनः ।
[illegible] महीजानिः सुधासिक्त इवा[illegible] ॥ २४ ॥
चक्रे महोत्सवं राजा जन्मन[illegible] ।
[illegible] ॥ २५ ॥
[illegible] ।
[illegible] ॥ २६ ॥
[illegible] मुहुर्मुहुः ।
[illegible] ॥ २७ ॥
[illegible] ।
[illegible] ॥ २८ ॥
[illegible] ।
[illegible] ॥ २९ ॥
[illegible] ।
[illegible] ॥ ३० ॥
[illegible] ।
[illegible] ॥ ३१ ॥

स्वकान्त्या दर्पणेवास्य बिम्बितैर्ज्योतिरीदृशावली ।
स्वच्छायायां तथैवास्य दीप्तता प्राप च प्रभा ॥ ३१ ॥
अरपाभूय तादृशं पाणिपादेषु स्पर्शता दृढः ।
आसाङ्कसेषु तादृश्यं पस्पर्श कलिलपर्यंकान् ॥ ३२ ॥
विकसितैर्वीक्षणात्तूर्णैस्वगाम्बुनर्वसना ।
कोकोकनदा दीर्घं काय मातापित्रोर्नालिकान् सुखाः ॥३४॥
अदाविभवैः सादरं प्रहर्षैर्लब्धिभिः सुधैः ।
सुदन्तीव सरसा सद्दैर्मोदितं यद् तद्गुं ॥३५॥
कार्येषु, प्राससंवर्गो पञ्चबाहुः किर्तीरिता ।
नीवाचं रचायमणं तत्र्यं दिग्सुर्भारमिवात्मजः ॥३६॥
गार्थे बाल ! मृदाणेदं दार्शतामिव कार्मकम ।
अतः संपदमतायाशयं समादाय्यपात्पदं वचम् ॥३७॥
सुर्वेतद्वयनं सन्मुखांम्बदमाविततोयनः ।
स्वर्णबाहुरमाविव पितरं प्रणनामनः ॥३८॥
स स्वार्थीः तत्समंदनुविजगात ! मां सुतरोपमम् ।
शाला हि लाल्यमाना मधुः पादपा इव दार्मके ॥३९॥
हे तात ! स्वां बिना धर्मं नाहं प्राणानिमानदेह ।
मीनोऽपि पादपः पाथो बिना जीवेत् किंमहितम् ! ॥४०॥
या दीप्ता तात ! मज्जोह मयकारणांशुभिः ।
विभिन्न ता म याऽऽसवदर्शमवद्गुमनाभिभिः ॥४१॥
यस्तुषे स्यामदारभीतमच्छायायां मनुष्यो मम ।
ताकेन्द्राविव विनाद्दच्छं मूर्धि धृते न तद् ॥४२॥
यद् सुखं शृण्वतां वाक्यमिह गच्छेति तावकम् ।
न तद् मे वज्रिमा वाचो जीव जीवेति जीयताः ॥४३॥
स्वायुरपनमपुता क्षोणी यस्तीयमनुभूयते ।
न तद् मयाधिरूढस्य पार्मिसहासनोपरि ॥४४॥
सम्भूतं धावतः पद्भ्यां स्याद्गुरुः पश्चिमद् मम ।
योगमनिम्पुरस्य स्याधिरूढस्य न तद् मम ॥४५॥
हे तात ! भूमिभागोऽस्मां मयदीयशिरोऽर्पितम ।
मार्थितः सुभ्रतरस्य मथाहो रत्नालिह ॥४६॥
बालं मां सुभ्रतरस्य येन कृपा हार्दिमां न च ।
का सदा ममममर्यादा दयालोः प्राणनाशने ॥४७॥
राज्यं दार्शितोऽप्यदरमं भुजाभ्यामर्जितं त्वया ।

अश्वरत्नमदोऽविष्ट शास्त्रलक्षणलक्षितम् ॥६४॥
स्तब्धकर्णं लघुग्रीवं स्निग्धरोमालिमालितम् ।
गुच्छपुच्छं च दधानं पृष्ठमस्फुटं स्फुटम् ॥६५॥
वीक्ष्य तं तुरगं भानुतुरगाणामिवाष्टमम् ।
सप्तसप्तिममंस्तैव सप्तसप्तिमहीपतिः ॥६६॥ (युग्मम्)
आदाय वाजिनं राजा सच्चक्रे सार्थनायकम् ।
अभ्यदाता हि भूपानां प्रेमपात्रं प्रजायते ॥६७॥
वेगमादाय वातानां सर्वेषां विदधे विधिः ।
अस्मिन् यद् धावतोऽमुष्य कोऽप्यश्वो नाभवत् पुरः ॥६८॥
उच्चैःश्रवप्रभृतीनां वाजिनां वाजिराजिना ।
वाजिना तेन भूभर्तुर्मन्दुरा सुन्दराऽजनि ॥६९॥
सुपर्णमिव गोविन्दस्तमारूढोऽन्यदा नृपः ।
निरगात् क्रीडया भूपः परीतः पुरतः पुरः ॥७०॥
पतद्भिः फेनसन्दोहैर्मुक्ताङ्कुराङ्कितामिव ।
प्रकुर्वन् खुरलीं सोऽप्यचालीदश्वः शनैः शनैः ॥७१॥
वेगज्ञानाय तं वाजिराजं राजशिरोमणिः ।
कशयाऽताडयच्छात्रमुपाध्याय इवोच्चकैः ॥७२॥
गाल्येव सुभटोत्तंसस्ताडितः कशया तया ।
अधाविष्ट समारूढचपलोऽश्वेव तुरङ्गमः ॥७३॥
उत्पतत्पक्षिराजं स तर्जयन्नचलद् नभः ।
तुरङ्गः स्वं तुरङ्गत्वं जने सत्यापयन्निव ॥७४॥
राज्ञाऽतिरक्ष्यमाणोऽपि योगिनेव मनो गतम् ।
न तस्थावेव प्रतीपशिक्षितत्वात् तुरङ्गमः ॥७५॥
पश्यतः परिवारस्य स तस्योन्मुखचक्षुषः ।
तरसाऽध्यासितरोऽधत्त सन्ध्यायामिव गोपतिः ॥७६॥
समाद्रैतमिवात्मानं मन्यानो मेदिनीपतिः ।
स्थावरान् नगनागादीनस्थावरतयाऽविदत् ॥७७॥
तुरगं तं समारूढश्चक्रारूढ इव भ्रमन् ।
ययावेव घने दूरमक्रान्तरिव भास्करः ॥७८॥
मनसा सह सर्वेषां भूपानां पश्यतां सताम् ।
दुःशीलेनामुना[1] राजा निन्येऽरण्येऽथ गह्वरे ॥७९॥
कर्षणात् स्वेदमापन्नः सर्वस्तस्यातिधावतः ।

---

१ दुर्विनीतेन ।

वसनां मुमोच भूभर्ता सलमैत्रीमिवाऽचलः ॥८०॥
मुक्तिं प्राप्य ततः सप्तिमेवादथ मणो क्षणात् ।
गतिनिरोधं विदधे लम्बलस्य हयाग्रुगः ॥८१॥
प्राप्यद्रुमरम्रद्धैः कृताघन्यामिमन्थणम् ।
उत्तालकल्लोललीलारव्याघ्न्यैपगूहनम् ॥८२॥
पद्मपत्रपतत्पिङ्गपरागैः कलरुन्तमण्डनम् ।
हंसाद्दृश्युच्छलत्पक्षव्यजनयोजितान्तरम् ॥८३॥
कोकलोककुलाकीर्णाऽऽसान्तरान्तरभूमिकम् ।
पीयूषोपमपानीयं सद्यसुधिभूतान्तरम् ॥८४॥
वीताहमण्डलमिव पद्मिनीशान्तहस्तकम् ।
ददर्शैव विशामीशाम्भ पीकं सरोवरम् ॥८५॥ (चतुर्भिः
कालांपकम्) [illegible] ।
मद् [illegible] भूपः [illegible] इव नीरदम् ॥८६॥
निर्गत्कुञ्जावन्मायापत्पकुम्भकारपंकजलात् ।
[illegible] सुवृद्वात् कम [illegible] ॥८७॥
तत [illegible] मुमुक्षा ।
[illegible] शीतलं वारि वाहः स [illegible] ॥८८॥
[illegible] तदनु [illegible] वारिणा [illegible] ।
[illegible] ॥८९॥
[illegible] ।
[illegible] ॥९०॥
[illegible] ।
[illegible] ॥९१॥
[illegible] ।
[illegible] ॥९२॥
[illegible] ।
[illegible] विद्याधर [illegible] ॥९३॥
[illegible] ।
[illegible] ॥९४॥
[illegible] ।
[illegible] ॥९५॥
[illegible] ।
[illegible] ॥९६॥
[illegible] ।

कन्दमूलफलादीनि चिन्वतो मालिकामिव ॥९७॥
तपोवनेऽसौ वीक्ष्य तापसानुपतस्थिवान् ।
मेदिनीपतिमूर्धन्यो मुदमाप यथोचिताम् ॥९८॥(त्रिभिर्विशेषकम्)
तदा शोणितसंशुद्धेक्षिणं स्फुरितं द्रुतम् ।
कामं लाभमिदं वक्ति निश्चिकायेति भूपतिः ॥९९॥
सावित्रीमनमुद्भूतमातुलः शोणिकासुतः ।
सुरारिव स्वःस्थानं प्राविशत् तत् तपोवनम् ॥१००॥
स विलोक्य पुरतोऽपश्यदाश्रमोत्फुल्ललोचनः ।
एतां निरुपमलावण्यां कन्यामासक्तदीपिकाम् ॥१०१॥
गृह्णन्तीं स्वकरस्पर्शयुग्माभ्यां वल्लिपल्लवम् ।
एकतानमनाः क्ष्मापः प्रेक्षांचक्रेऽमरीमिव ॥१०२॥
तन्व्यां पातो मनोनेत्रे जगमनुपनिग्रहं इव ।
अशक्ता ते विना स्यातुमिष्टाणादपि धीरता ॥१०३॥
सहसाणमपस्य तस्यां वृत्तिरंगुलिस्पर्शं यया ।
चलाच्चाहस्पर्शः पुष्पांजनावस्तामेव मुद्यात् ॥१०४॥
लावण्यं स्वदलोलौस्फुरज्जगत्तला लद् भूपतिः ।
निर्वर्ण्य वर्णितामेनां ध्यातवानिदमात्मनः ॥१०५॥
अहो ! अस्याः शिरःकलापालोऽसौ श्यामलच्छविः ।
कातरं हन्ति मामुर्व्यर्णधीयासिवल्लुरी ॥१०६॥
सीमन्तः स्फुटः स्पष्टो भात्यस्या मूर्ध्नि सुभ्रुवः ।
अयंव मुष्णतो विश्व पञ्चेषोः परिमार्गितः ॥१०७॥
भालं बिभर्ति सुस्पष्टं युतं बालेन्दुसोदरम् ।
कालचापमिवामश्नोऽधिज्यीकृत्यात्र मुक्तवान् ॥१०८॥
कज्जलच्छलतः कामीयधं धत्ते दृशोरियम् ।
यदेतद्दृग्निपातेन दग्धोऽप्युज्जीवाति स्मरः ॥१०९॥
अहर्निशं प्रभात्यस्याः शोणिमाऽधरविम्बयोः ।
प्रवाल इव चेतोभूभूरुहः प्रथमोद्गमः ॥ ११० ॥
भात्यस्या वदनं रम्यं पार्वणेन्दुसहोदरम् ।
विस्फुरत्कस्तूरिकाचित्रश्यामलं सदमलक्षणम् ॥ १११ ॥
त्रिरेखाञ्चितः कण्ठः शोभतेऽस्या मृगीदृशः ।
कामदिग्विजयं कम्बुरिव मङ्गलमावहन् ॥११२॥
स्तनौ तुङ्गौ विभातोऽस्याः पीनौ मीनाङ्कचक्रिणः ।
द्रष्टुं कर्मभारम्भौ युगपत् कलशाविव ॥ ११३ ॥

रिपोरिवालिनश्चास्मात् पाहि पाहि सहायिनि ! ॥१३०॥
तत्पीडापीडिता साऽऽली प्रोवाच चतुरं वचः ।
कस्त्वां पातुमलं भद्रे ! स्वर्णबाहोर्ऋते पुरः ॥१३१॥
यः पाति स्वीयपदस्थेव निखिलं मेदिनीतलम् ।
शीतार्त इव तरणिं तमेव शरणीकुरु ॥१३२॥
इत्याकर्ण्य वचस्तस्याः श्रवणामृतसन्निभम् ।
चमच्चक्रे वज्रबाहुकुलाकाशनभोमणिः ॥ १३३॥
को वामुपद्रवं कर्तुमलंभूष्णुः शुभाशये ! ।
इत्यापैव धनं वज्रबाहुपुत्रेऽयाति क्षितिम् ॥१३४॥
एवं ब्रुवाणो विज्ञाणो मुदं च परमां नृपः ।
प्रादुरासीत् तयोरग्रे पिनाकीव अयोमयोः ॥१३५॥
पुरतः सहसा प्रेक्ष्य तं साक्षाद् मकरध्वजम् ।
ससंभ्रान्ते अभूतां ते ज्वलिते इव रक्षसा ॥१३६॥
परिवेपथुनं किंचिद् नोचतुश्चतुरं वचः ।
विस्मयस्मेरनयने जाते सुनयने उभे ॥१३७॥
मा भूदाज्वयमनयोर्मत्तो मृगयोर्द्वीरिव ।
इत्यभाषिष्ट भूमर्त्ता प्रेमगर्भतया गिरा ॥१३८॥
भो भद्रे ! विस्मयोन्मुद्रे ! भाविभद्रे तपोवने ।
अस्ति भद्रं तापसानां दुस्तपं तपतां तपः ॥१३९॥
स्वयं पायितपयसः स्वपाणिघटलालिताः ।
पादपाः सन्ति सच्छिपाः कच्चिद् वां बालका इव ॥१४०॥
मौवरिः कृतसम्भागा महाभागे ! सुगाः सुखम् ।
स्वपाणिविहितावाला वल्ल्यः सन्ति शिवं शिवे ! ॥१४१॥
पल्वलाम्भसि कदानां धर्मवृद्धिविधायिनाम् ।
श्रोतोम्भामिव रम्याणां नीवाराणां शुभं शुभे ! ॥१४२॥
स्वयंमुद्रितसेतूनां स्वयमुत्तसरोरुहाम् ।
कुशले ! अस्ति कुशलं सरसां वयसामिव ॥१४३॥
आलवालपयःपानकारिणां मादहारिणाम् ।
पातं वर्तितसौभाग्ये ! वर्तते परपोत्रिणाम् ॥१४४॥
कल्याणमपस्ति कल्याणं युवयोस्तपसि ध्रुवम् ।
इत्यपृच्छदसुच्छात्मा तयोर्भद्रं नमद्रयोः ॥१४५॥
अशक्ता वक्तुमप्येषा तथाप्यालम्ब्य धैर्यताम् ।
धीमती धरणीनाथं सख्युवे चतुरं वचः ॥१४६॥

महाभाग ! स्वसौभाग्यपराभूतमनोभव ! ।
आवयोरस्ति कुशलं सर्वत्रापि निरर्गलम् ॥१४७॥
स्वर्णबाहौ महाबाहौ भूपे पाति वसुन्धराम् ।
कोऽत्र नस्तपसां भूयात् प्रत्यूहव्यूहकारणम् ॥१४८॥
कालिन्दीशीकरस्फारकृत्यया बालकालिना ।
दष्टाऽऽननेऽम्बुजभ्रान्त्या सभ्रमा मधुपी यथा ॥१४९॥
व्याधूतोऽप्यनया भृङ्गो नागाद् माधुर्यलोलुपः ।
यद् वामाधरमाधुर्यं धुर्यं मधुरवस्तुषु ॥१५०॥
तत्पीडाविगतव्रीडा बालैषा भयभीलुका ।
पाहि पाहीति मामूचे कातर्यं सहजं हि न ॥१५१॥
इत्युदार्यं वयस्या सा प्रतिपत्तिं महीपतेः ।
व्यधात् स्थानोचिता गेहानुरूप्यातिथयः स्मृता ॥१५२॥
प्रियालकदलीतालरसालाद्रिरसोद्वहाम् ।
मङ्गलानीव फलानि साऽदौकिष्ट महीपते ॥१५३॥
आनिन्ये वामया नीरं पद्मिनीपत्रसंपुटैः ।
वीजितं व्यजनाकारैर्मृदुलैः कदलीदलैः ॥१५४॥
मल्लिकामालतीकुन्दमधुकन्दसुमोत्करम् ।
साऽढौकिष्ट नृसिंहाय सर्वस्वमिव मान्मथम् ॥१५५॥
प्रत्यग्रैः पल्लवैः सोपैरचिताय विष्टरम् ।
भूर्जत्वक्छादनं स्वच्छं स्वरूपान्तमिव वामुचत् ॥१५६॥
मृद्वी मृदुलताव्लाभे मण्डपे मण्डितासनं ।
आसयामास तत्रैनं नृपं स्वमनमीव सा ॥१५७॥
स्वयं तल्लोचने लीनलोचना लोललोचना ।
[illegible] रथैतस्य पुरस्तात् प्राञ्जलिः स्थिता ॥१५८॥
[illegible] हासयन्तीव तत्पादौ ।
[illegible] सा वचश्चाटचाटुरि ॥१५९॥
[illegible] देव ! अत्र स्वर्लोकतोऽधिकम् ।
[illegible] युष्मत्पादरज पवित्रितम् ॥१६०॥
स्वरूपमप्रमादि लोकोत्तरप्याऽनया ।
[illegible] च पाण्डित्यमिव भाषया ॥१६१॥
[illegible] चक्षुषी पद्मे साक्षात् सितामृते इव ।
[illegible] यया निर्वृतिमापतुः ॥१६२॥

[illegible]नक्रमेण ।

यथा युष्मद्गुणग्रामग्रहणग्रहिलाऽधुना ।
संलक्ष्यास्मयत्नेनामूर्जिद्दया सुखभाजनम् ॥१६३॥
तथान्यकुलनामादिश्रवणे श्रवणे इमे ।
उत्कण्ठिते असस्मातोऽप्यासनाच्चादिते इव । १६४॥ (युग्मम्)
अतः कुलादिकथनप्रसादपीयूषपानतः ।
कर्णयोः कुरु संतुष्टिमावयोर्मनसोरपि ॥१६५॥
आत्मनश्चात्मना ख्यापिता ख्यातिमेति न ।
इति ध्यात्वा पराशीलोऽभिदधे मधुरं वचः ॥१६६॥
स्वयमेवाहुर्महीशिशुरम्यपदं किरातः खलु ।
नित्यं तिष्ठामि तत्पार्श्वे द्वितीयमिव तद्वपुः ॥१६७॥
अभूद् विघ्नकरः कोऽपि तापसानां तपोविधेः ।
इति तेन महीशेन प्रहितोऽहमिहागमम् ॥१६८॥
इति तस्य वचः श्रुत्वा मायज्ञा सा व्यचिन्तयत् ।
स्वयमेवाहुः [redacted] यथासौ राजा राजसमागमः ॥१६९॥
ध्यायान भावविदुरो भूपस्तद्भावमान्तरम् ।
मामज्ञासीदृशी चिन्ता पत्तेव स्वसुताम् ॥१७०॥
पुनस्तां विस्मयाश्चर्यां प्रोचे वसुमतीपतिः ।
कस्य कन्या च किंनामा कुतस्त्या किमिहागता ? ॥१७१॥
कुर्वते किमिदं कर्म वपुषः क्लेशकारणम् ? ।
इत्युक्ता सा सखी समाह बाष्पप्लावितलोचना ॥१७२॥ (युग्मम्)
शृणु नाथ ! कथां तथ्यां प्रथितां पृथिवीतले ।
वैताढ्यभूधरेऽत्रासीद् वरं रत्नपुरं पुरम् ॥१७३॥
तत्र विद्याभृतां मूर्ध्नि शेखरो रत्नशेखरः ॥
राजाऽऽसीद् वासिताऽशेषसुश्लोककोशसमाश्रयः ॥१७४॥
तस्य रत्नावली राज्ञी प्राणं निःशेषयोषिताम् ।
शुभां सा सुषुवेऽन्येद्युः पद्मां स्वप्नोपसूचिताम् ॥१७५॥
तस्यां गर्भमुपेतायां प्रातः पद्मां ददर्श यत् ।
अतोऽभिधानतः साऽऽसीत् पद्मा पद्मानना शुभा ॥१७६॥
तस्यां तु जातमात्रायां पिता पञ्चत्वमाप्तवान् ।
बभूवुः सूनवस्तस्य सर्वे पितृपदार्थिनः ॥१७७॥
सर्वे च तनयास्तस्य राज्यलक्ष्म्यभिलाषुकाः ।
मिथो युयुधिरे क्रोधाद् व्याला इव मदोद्धुराः ॥१७८॥
तेषां तु युध्यमानानां यादं राज्याभिलाषिणाम् ।

भुजिष्यो भूपतिर्वापि नालं रोद्धुमजायत ॥१७९॥
तदा तत्र पुरे प्रौढमस्वास्थ्यं समजायत ।
भूयो भवति लोकानामस्वास्थ्यं राज्यविग्रहे ॥१८०॥
तदा तज्जननी रत्नावली भूमीशभामिनी ।
दुश्चेष्टितं तनूजानां वीक्ष्य चाऽजनि दुःखिनी ॥१८१॥
सुतां निधिमिवाऽऽदाय पुरात् सा निर्ययौ द्रुतम् ।
स्वभ्रातुर्गोलवाख्यस्य मुनेराश्रममभ्यगात् ॥१८२॥
तत्राऽवर्धिष्ट बाला सा कल्पवल्लीव नन्दने ।
क्रमाच्च यौवनं प्राप लावण्यमिव मूर्तिमत् ॥१८३॥
वराहां बालिकां तां च संदृश्य गोलवो मुनिः ।
वरचिन्तासमुद्भ्रान्तानिमग्नो निर्ममोऽपि हि ॥१८४॥
यथैवाऽशेषधामासीद्रत्नं मङ्गिनी सुता ।
नृरत्नं रत्नगर्भायां भावी कोऽपि वरस्तथा ॥१८५॥
अत्रच्छायानुकारिण्या कृतं मच्चिन्तयाऽनया ।
यदाख्या रत्नगर्भाया रत्नगर्भेति विश्रुता ॥१८६॥
अथाऽन्यदाऽऽश्रमे तत्र ज्ञानवान् मुनिराययौ ।
गोलवोऽपि मुनेस्तस्याऽभ्यगादभ्यर्णमञ्जसा ॥१८७॥
अप्राक्षीज्ज्ञानिनं तं च गोलवः परया मुदा ।
अस्याः कुमार्याः विवोढा भावी कः पुरुषोत्तमः ? ॥१८८॥
मुनिरप्यभ्यधादत्र वज्रबाहुनृपात्मजः ।
अस्ति भूभामिनीभालभूषणं भूमिवल्लभः ॥१८९॥
चक्रवर्तिश्रियो यस्य पाणिपल्लवपल्वले ।
मल्लकीभूय भूयोऽपि पूरयिष्यन्ति दोहदम् ॥१९०॥
दुष्कलापहृतः सोऽत्राऽऽगमिष्यति धराधवः ।
त्वच्चिन्ताकुट्टिनीकूलमुक् स्वं निष्यति पण्डवत् ॥१९१॥
अत्राऽऽगतस्य भविता कन्यकैषा कृशोदरी ।
भामिनी तस्य भूभर्तुः स्वाहा स्वाहापतेरिव ॥१९२॥
स्वामिन्येषा सरोजाक्षी कुमारी साऽमरीनिभा ।
पल्यादिसेवनासक्ता क्रीडति स्वेच्छया वने ॥१९३॥
स चापमाश्रमो यत्र गोलवस्तापसस्तपः ।
तपति स्वस्वसुः पुत्रीं लालयंल्लतिकामिव ॥१९४॥
तथेत्युक्ते नृपो दध्यौ तद्वचोभिर्मुदं दधत् ।

१ [illegible]

[illegible]

[illegible] (सुगम)

[illegible]

[illegible]

अथो कुलपतिं प्रेम्णा पृष्ट्वा प्रणतिपूर्वकम् ।
श्वश्रूरत्नावलीपादौ प्राणमत् प्रणयी नृपः ॥२४४॥
तत्कृते तत्क्षणादेव स पद्मोत्तरखेचरः ।
सद्विमानं स्वर्विमानप्रतिमानमसूत्रयत् ॥२४५॥
आपृच्छ्य परिवारं स्वं परीतः खेचरैर्नृपः ।
आरुरोह विमानं तत् कुबेर इव पुष्पकम् ॥२४६॥
पादौ कुलपतेस्तस्य क्षालयन्ती अलैर्दृशोः ।
पद्माऽपि क्षमयामास मातुलं मन्तुमात्मनः ॥२४७॥
हे तात ! यो मयाऽकारी विघ्नस्तपसि तावके ।
तद्बालाया ममाशेषं क्षमस्वागः क्षमानिधे ! ॥२४८॥
भूयो भूयः पतन्ती सा पद्मा तत्पदयोः पुरः ।
तमापृच्छ्य स्वसवित्रीसंनिधौ द्रुतमाययौ ॥२४९॥
स्वयमुत्तलतेवाहं हे मातः ! पालिता त्वया ।
मन्दभाग्याऽहममयं न ते प्रत्युपकारिणी ॥२५०॥
एतेऽभिरामा आरामाः फलदाः सोदरा इव ।
एता मुग्धो विमुग्ध्यास्यो वयस्या इव वत्सलाः ॥२५१॥
संमृष्टा उटजा एते प्रसादा इव शर्मदाः ।
एते च पादपाः फलसालबाला बालका इव ॥२५२॥
पट्टकूलमिव स्वच्छं मृदुलं वल्कलं त्वदः ।
कथमेकपदे मातरिदं मोक्ष्याम्यहं समम् ॥२५३॥
(त्रिभिर्विशेषकम्)
सीतामांसीव बाष्पाणि मुञ्चन्ती च मुहुर्मुहुः ।
वदती सुदती साऽथ न्यपतद् मातृपादयोः ॥२५४॥
साऽप माताऽश्रुपूर्णास्या जगदे गद्गदस्वरम् ।
वत्से ! च्छायेव भूयात् त्वं स्वभर्तुः सहचारिणी ॥२५५॥
सपत्नीष्वसापत्न्यं कुर्याः कार्यविचक्षणा ।
तदपत्येषु प्रणयः कार्यः प्रणयिनि ! त्वया ॥२५६॥
किञ्च सम्पादितानन्दा नन्दाख्याऽसौ सखी तव ।
द्वितीयेव मयन्मूर्त्तिर्भूयात्त्वत्सहगामिनी ॥२५७॥
सर्वविज्ञानविज्ञेया कुशला सर्वकर्मसु ।
मयतोमस्तुगन्धस्ति तदिमामुररीकुरु ॥२५८॥
एवं मात्रा प्रदत्ताभिः शिक्षाभिः सा विचक्षणा ।
धन्यंमन्या स्वमात्मानं निरगाद् नन्दया युता ॥२५९॥

प्रशरद्वारदपूर्णांशी स्मेरास्यो सा शनैः शनैः ।
पर्यायिते विमानं तमारोहद् गौरिवाचलम् ॥२६०॥
विमानं तं समारूढो मूर्त्तिमन्तमिवानिलम् ।
पदपन्निलातलं भूपो वैताढ्याद्रिमुपेयिवान् ॥२६१॥
अभिगम्य समायातं तत्रैव पञ्चराडुजम् ।
ढौकनं ढौकयामासुः सर्वे विद्याधराधिपाः ॥२६२॥
भक्त्या तस्य भुजिष्यत्वमात्मनां भावि सर्वदा ।
उद्गृह्णिलयं श्रेण्यां राज्यमस्मै ददुर्नृपाः ॥२६३॥
नमद्विद्याधराधीशमौलिसम्मृष्टपत्कजः ।
सोऽथ तस्थौ चिरकालं तत्र भूपः सुखैकभूः ॥२६४॥
अन्यदा स्वपुरे गन्तुं समोहाऽजनि भूभुजः ।
स्नेहो हि जन्मनो भूमेर्बलीयान् महतामपि ॥२६५॥
आपृच्छय खेचराधीशान् सामन्तान् भूरिभूभुजान् ।
अचालीद् व्योममार्गेण विधातुः स्वपुरं प्रति ॥२६६॥
व्योममार्गे पञ्चवर्णरत्नसारैर्विनिर्मितैः ।
विमानैर्विदधद् वालेहलिलीलोदयभ्रमम् ॥२६७॥
ध्वजैर्धौतैर्विमानस्थैः शतचन्द्रभ्रमं सृजन् ।
वन्दिकोलाहले कुर्वन् भ्रमं गर्जैः पयोमुचः ॥२६८॥
खेचरीखेचरैर्व्योम्नि विदधन् नगरभ्रमम् ।
सृजन् श्वेतातपत्रैः खे श्वेताऽम्भोजसरोभ्रमम् ॥२६९॥
पत्नीभिः सहितः स्वाभिस्ताराभिरिव चन्द्रमाः ।
आययौ स्वपुरि क्ष्मापोऽमरावत्यामिवाद्रिभित् ॥२७०॥
(चतुर्भिः कलापकम्)
समेतमनया लक्ष्म्या समेतं भूभुजं निजम् ।
वीक्ष्य पौरा मुदं प्रापुः प्राप्तपुण्योदया इव ॥२७१॥
स्वजनाऽस्वजनानन्दाऽनानन्दोद्भेदकारिणौ ।
तदाज्ञा भूधवस्येव पुष्पदामेव मूर्धनि ॥२७२॥
खेचरीभिः समन्ताभिः क्रीडन्नुक्षेव धेनुभिः ।
सुखं पाति स्म भूमीन्द्रः पाकशासनशासनः ॥२७३॥
इतश्चायुधसद्नाधिकारी पुरुषो द्रुतम् ।
आस्थानस्थितमूर्धीशं प्राञ्जलिः प्रोचिवानिदम् ॥२७४॥
नाथ ! त्वदस्त्रशालायामस्त्राणामधिदैवतम् ।
अजनि चक्ररत्नं दिक्चक्रं द्योतयद् द्युता ॥२७५॥

पुण्यैरभ्युन्नतं तत्र भुग्ना नैवाशितं मनः ।
सुरामिव प्रतिज्ञातमचलेन्द्र महीपतिः ॥ २७६ ॥
विश्राणयन्नुपाकोनाऽन्नापानमुपेयिवान् ।
प्रेक्षणके चक्ररत्नं चक्री शोभाप्रकम्पक ॥२७७॥
चक्री चक्रं नमश्चक्रे मन्त्रानपठिताञ्जलिः ।
शान्तं देवमिवाराध्यं हरिराजामहर्निशम् ॥२७८॥
आदाय मृदुलं वालदुग्नं हस्तेन मुग्धता ।
उन्मृष्टं चक्ररत्ने तत् प्रतिबिम्बमिवागमम् ॥२७९॥
स्नानासनं निषद्यायो भक्तं मृदाङ्क आदरात् ।
सलिलैः स्नपयामास प्रतापमिव जङ्गमम् ॥२८०॥
घनसारघनं कस्तूरीकर्पूरागुरुचन्दनैः ।
प्रायशः पूजयामास पुण्यैः श्रीरत्नभासुरैः ॥२८१॥
मङ्गलाम्बर रक्ततन्तुरैरनुलेपनम् ।
चक्रे चक्रामतश्चक्री जयश्रीणामिवाङ्कुरान् ॥२८२॥
गान्धर्वविधिमाधाय तस्मै पार्थिवपार्थिवाः ।
स्तोत्रैः स्तोतुमारेभे चक्रं गुरुमिवान्तिषत् ॥२८३॥
एवं जपासनं पद्मखण्डमयपरक्रायतारक ।
शत्रुश्रीनेत्रनेत्राम्भ पिपासाजयमूचक ! ॥२८४॥
एवं विहिततद्भक्तिः कृत्वा चाष्टाह्निकोत्सवम् ।
स्नानपीठमलंचक्रे चक्री हंसः स्वोम्बुजम् ॥२८५॥
तैलैरभ्यज्य सर्वाङ्गं चूर्णैश्चोद्धृत्य चारुभिः ।
विमलैः सलिलैरेनं स्नपयामासुरङ्गनाः ॥२८६॥
रेजुः काश्चिच्च वक्षोजैः स्पर्धिकुम्भाङ्कितोरसः ।
एतत्तुल्यौ स्तनश्रीर्न इति वक्तुमिवोद्यताः ॥२८७॥
रेजुः काश्चित् क्षिपन्त्यश्च पयः पार्थिवमूर्धनि ।
प्रोत्तुङ्गे काञ्चनगिरेः शृङ्गे घनघटा इव ॥२८८॥
रेजुः काश्चिच्च कनककलशाङ्कितमस्तकाः ।
विम्रस्य इव लावण्यमसंमादि । विग्रहे ॥२८९॥
काश्चिच्च क्षालयामासुस्तत्क्रमौ रक्तिमाङ्कितौ ।
सञ्जातालक्तकश्रद्धा उद्घर्तुमिव हस्तयोः ॥२९०॥
काश्चिच्च चिक्षिपुश्चक्षुःकटाक्षान् सलिलैः समम् ।
स्नानभङ्गोऽम्भसः स्वाल्पयाद् मा भूदस्येति क स्पया ॥२९१॥
एवं स विहितस्नानो रेजे राजशिरोमणिः ।

शार्दिन्दुभिर्विपुलैर्नैर्नर्स्वश्रैरिव मन्दरः ॥२९२॥
यद्दुकूलाञ्चलेनासौ निर्जलीकृतविग्रहः ।
सर्पदधत् सिते वस्त्रे सुते इव सितांशुना ॥२९३॥
दिव्यदामधरो दिव्यचन्दनादिभिरार्चितः ।
ललाटपट्टे तिलकं माङ्गल्यं कृतवानसौ ॥२९४॥
वीराङ्गमिव वलयं पाणौ भूवलयेश्वरः ।
बभार मरमुख्यानां मुख्यमाभरणं हरः ॥२९५॥
सोऽधात् मुक्तावलीं वक्षःस्थलमण्डनमादिमम् ।
मुक्तान्तोपदयाद्दयंतीर्वार्थेरिव बुद्बुदान् ॥२९६॥
महाकः सूत्रयामास कटीसूत्रं कटीतटे ।
अप्यन्तमुक्तादपादौ वेष्टिताहीशतां स्मरन् ॥२९७॥
कुण्डले श्रवतः स्मेन सकलं कर्णपर्णयोः ।
प्रतापमुखविप्रस्त सूर्येन्द्वोरिव मण्डले ॥२९८॥
नृकोटीरः स कोटीरं वर्ण्यस्वर्णमयं दधौ ।
काञ्चनाचलचूलाग्रे हेलिबिम्बमिवोल्वणम् ॥२९९॥
पुण्डरीकातपत्रं स एकं मूर्ध्नि दधार च ।
एकातपत्रं मद्राज्यमिति जनान् विदन्निव ॥३००॥
शुभ्रैरभिनृपच्छत्रं व्यमादिन्दुसनाभिभिः ।
मिलितैरदूसर्वैः शारदैरिवाद्रिराट् ॥३०१॥
चामरैर्वीजितो रेजे राजा कुन्देन्दुसोदरैः ।
निर्झरैः कासासंकाशैरिव शैलशिरोमणिः ॥३०२॥
चामरग्रहणव्यग्रपाणिपण्याङ्गनाननैः ।
भाति स्म भूपतिस्ताम्यतारामिरिव शीतगुः ॥३०३॥
हर्षे सन्दानधाराभिर्गर्जन्तं निघ्ननिस्वनम् ।
गच्छन्तं मन्दया गत्या मूर्तिमन्तमिवाम्बुदम् ॥३०४॥
हस्तभकुम्भसंरम्भस्थिताशाननान्तरम् ।
मद्याक्षिरद्धारापोरणीपीतमूतलम् ॥३०५॥
तालवृन्तैरिवोत्तालैः कर्णतालैः प्रचारिभिः ।
विनिवारयन्तं भ्रमरान् भ्रमतो दानविह्वलान् ॥३०६॥
कालिन्दीसलिलोल्लसत्कज्जलश्यामलच्छविम् ।
गतं जङ्गमतां मूर्त्या शैलोच्चयमिवाञ्जनम् ॥३०७॥
सिन्दूरारक्तशिरःपिण्डाञ्जितबालार्कमण्डलम् ।
शुण्डादण्डपराभूतभुजगाधिपविग्रहम् ॥३०८॥

कुम्भादिः सुभटाः सैन्ये लक्ष्यन्ते पांसुदुर्दिने ॥३२५॥
प्रयाणैरेवं योजनमात्रैर्मार्गे व्रजन् नृपः ।
मागधं तत्प्रापत् कूलंकषाकूलं स दक्षिणम् ॥३२६॥
पार्श्वेऽपि पापप्रादेव नद्या आद्दत्तस्तदा ।
यदनुग्रहविशेषतो मा भूत् स्तोकमद्भ्यः पयः ॥३२७॥
तादृशं महा भैतरन्यग्रहमाणजलाऽभ्यगात् ।
स्फुरन्ति ताऽऽतोय तद्दृदिमाभिर्नीनयनाम्बुभिः ॥३२८॥
एवं स्व.कूलिनीकूलेऽनुकूलगमनं व्रजन् ।
मागधं तीर्थमार्याव चक्री चक्रानुगः क्रमात् ॥३२९॥
द्वादशयोजनायामं नवयोजनविस्तरम् ।
सैन्यं न्यधीविहारस्थां पूर्वपाथोधिरोधसि ॥३३०॥
वार्धकिः कृतवांस्तत्र चम्पुर्ग सौधधारणिम् ।
एकं च पौषधागारमगारं पुण्यसम्पदाम् ॥३३१॥
स्नाऽऽगमतपान्यवकाशनेपथ्यविलेपनः ।
पौषधोपवसमर्हात् (रागादपविनाशकम् ?) ॥३३२॥
मागधतीर्थाधिदेवं देवं चेतसि सस्मरन् ।
कृतासंस्तारके तत्र चक्री तस्थौ दिनत्रयम् ॥३३३॥
पौषधान्तेऽथ पौषधागाराद् निर्गतवानसौ ।
स्वर्णाङ्गसुखलसत्पूर्णं पूर्वक्षीरिय मण्डलम् ॥३३४॥
वर्णमानभवताकाभिभासुरं वरविग्रहम् ।
नेभूतं च भृतं दिव्यनालिकाभिः शस्त्रमालिभिः ॥ ३३५॥
पूर्णाकालसुभगं चतुर्णवं महारथी ।
रथमध्यास्त मघवा विमानमिव पालकम् ॥३३६॥ (युग्म
उच्छ्रितायकृतकाचसलनकुम्भे कूले ।
स्फालस्त्रोलसत्सैन्यकोलाहलसमाकुले ॥३३७॥
प्रविश्य जलधौ नाभिद्रघ्नं जलनिधेर्जलम् ।
सम्यगाहत्य भूमन्तं रथेन रथिनां वरः ॥३३८॥ (युग्मम्)
अधिज्यीकृतकोदण्डः पाणिनाहत्य शिञ्जिनीम् ।
धनुर्विद्योङ्कारमिव स टङ्कारमकारयत् ॥३३९॥
भुजङ्गमिव रन्ध्राद् तीरन्ध्रोजा. क्षमापतिः ।
चतुर्विपुङ्खः स्वीयनामाङ्कं कृतवान् शरः ॥३४०॥
उद्धुद्यरपरया मुष्टया धावं बाणासने नृपः ।
चचाल् मर्त्यर्षिमुपाना चक्रदण्डमिवोरसि ॥३४१॥

इन्नामैः सुभटाः सैन्ये लक्ष्यन्ते पांसुधूसरिमे ॥३२५॥
पार्श्वेरक्षयोजनमात्रमार्गे व्रजन् नृपः ।
प्रापत् कलायनः कूलंकषाकूलं स दक्षिणम् ॥३२६॥
वारीणि वारणादेव यथा आददतस्तदा ।
वपुर्मन्दमित्यत्र मा भूत् स्तोकमदःपयः ॥३२७॥
चारुर्यं गङ्गा मैनाकैर्व्यगृह्यमाणमलोऽप्यगात् ।
स्नानं मा ऽज्ञीव तद्दरिमानिर्नीनयनाम्बुभिः ॥३२८॥
एवं स्व.कूलिनीकूलेऽनुकूलगमनं व्रजन् ।
मागधं तीर्थमार्गेण चक्री चक्रानुगः क्रमात् ॥३२९॥
द्वादशयोजनायामं नवयोजनविस्तरम् ।
सैन्यं स्थापयिताऽसौ पूर्वपाथोधिरोधसि ॥३३०॥
पार्थिवः कृतवांस्तत्र वप्सुरां सौधतोरणाम् ।
एकं च पौषधागारमगारं पुण्यसम्पदाम् ॥३३१॥
कृताष्टमतपास्तत्र क्लप्तनेपथ्यविलेपनः ।
पौषधौषधममदोषं (रोगव्याधिविनाशकम् ?) ॥३३२॥
मागधतीर्थाधिपं देवं चेतसि सस्मरन् ।
कृतसंस्मारकस्तत्र चक्री तस्थौ दिनत्रयम् ॥३३३॥
पौषधान्तेऽथ पौषधागाराद् निर्गतवानसौ ।
धर्मांशुमुक्तसम्पूर्णं पूर्णेन्दोरिव मण्डलम् ॥३३४॥
पर्यस्तमपताकाभिर्भासुर वरविष्टरम् ।
भूतं च भूतं दिव्यशस्त्रभिः शस्त्रजातिभिः ॥३३५॥
कादूर्णाचापसुभगं चतुरश्वं महारथी ।
रथमध्यास्त मघवा विमानमिव पालकम् ॥३३६॥ (युग्मम्)
तुरङ्गमोपपूत्कारमस्तानमाकुल कूले ।
कच्छुलल्लोलकल्लोलकोलाहलसमाकुले ॥३३७॥
प्रविश्य जलधौ नाभिदघ्नं जलनिधेर्जलम् ।
अभ्यगादस भूभर्ता रथेन रथिनां वर ॥३३८॥ (युग्मम्)
अधिज्यीकृतकोदण्डः पाणिनाकृष्य शिञ्जिनीम् ।
धनुर्विद्यागुरुरिव स टङ्कारमकारयत् ॥३३९॥
भुजङ्गममिव रन्ध्रात् नीरन्ध्रौजाः क्षमापतिः ।
अधेपुमिषुधेः स्वीयनामाङ्कं कृष्टवान् बहिः ॥३४०॥
सौवपरस्थया मुष्ट्या चापं चापासने नृपः ।
यथात् मरयाधिभूपानां वज्रदण्डमिवोरसि ॥३४१॥

आकर्णान्तमथाकृष्य सायकं लोकनायकः ।
किञ्चिदुन्नमनःपुद्गपवःषोन्तुमिवोत्पगः ॥३४२॥
क्ष्मापं तादृगवस्थानस्थितं वीक्ष्य पयोनिधिः ।
चुक्षोभ मम सर्वस्वं हर्तुमिच्छेष उद्यतः ॥३४३॥
सुरासुरोरगाधीशैरप्यधिष्ठितमन्वहम् ।
पुद्गलानने पदिमध्ये तत्रैवावस्थितैरिव ॥३४४॥
साक्षरमाशाकारकं सलेखमिव हेरिकम् ।
बाणं मागधतीर्थेशं प्रत्यमुञ्चद् महीपतिः ॥३४५॥
पवनापूरितपुङ्खो पांसुलमध्यविद्रुमः ।
बाणः स ददर्शे गच्छन्नुरगश इव पक्षिराट् ॥३४६॥
वज्रपाणेरिव वज्रो दण्डो दण्डधरादिव ।
विद्युद्दण्ड इवाम्भोदात् कोपदीप्तेर्मुनेरिव ॥३४७॥
हलपाणेरिव हलं सीरं सीरधरादिव ।
तत्कोदण्डादधोगच्छन्नशोभिष्ट सायकः ॥३४८॥ (युग्म
अतिक्रामन् क्रमाद्द्वीप बाणो द्वादशयोजनीम् ।
मागधेशसभाभूमौ हृदि वज्रमिवापतत् ॥३४९॥
विद्युत्पात इवोत्पातहृन् पृषत्कः पतन् पुरः ।
सद्यो मागधतीर्थेशकाधाग्नेर्घनतामगात् ॥३५०॥
पतितं पत्रिणं पृथ्व्यां ततो मागधतीर्थराड् ।
भोगीवात्मीयहन्तारं वीक्ष्य कोपपरोऽजनि ॥३५१॥
कृतान्तकार्मुकाकारभ्रूकुटीभङ्गभीषणः ।
[illegible] ॥३५२॥

(युग्म
यः कण्डूं चक्षुषोस्तीक्ष्णकुन्ताग्रेण चिकीर्षति ।
यः केसरैः केसरिणस्तालवृन्तं विधित्सति ॥३५४॥
सुखाभिलाषुको यश्च संयमिनीं दिदृक्षति ।
मज्जनाय भुजाभ्यां यो वैतरणीं तितीर्षति ॥३५५॥
अवज्ञातस्वजीवः स चिक्षेपैनं शिलीमुखम् ।
इति ब्रुवन् स दष्टौष्ठसम्पुटं विरसं जहौ ॥३५६॥(त्रिभिर्विशेषकम्)
हस्तेन हस्तमास्फाल्य कोशात् कौक्षेयकं द्रुतम् ।
आकर्षत् कर्दमात्कुण्डादण्डं कुञ्जराडिव ॥३५७॥
तस्मिंश्च कुपिते बाढं कुपितास्तत्पदातयः ।

स्वामिवैरिणि यः कोपाटोपोऽधात् स हि सेवकः ॥३५८॥
सुदर्पाधीसवस्तस्य वीक्ष्य रोपाकपक्षणम् ।
मायं, अमाद् तं बाणं स्वामिकोपाग्निवारिदम् ॥३५९॥
वाचयामास स प्रीतिवर्णान् निर्वर्ण्य पत्रिणम् ।
स्वर्णबाहुरयं चक्री स्वतः सेवां समीहते ॥३६०॥
आदाय तमिषुं मन्त्री समागात् स्वामिनोऽन्तिकम् ।
बाणं च दर्शयामास कोपव्याधेर्विपाचनम् ॥३६१॥
स्वर्णबाहुरयं चक्री स्वरसेवापूर्वकं विभो ! ।
स्वतः समीहते दण्डं तत् स्वं च प्रगुणीकुरु ॥३६२॥
श्रवणाद् मन्त्रिणो वाचो वीक्षणात् तस्य पत्रिणः ।
रुपाय शान्तिं तत्कोपोऽङ्गारराशिरिवाम्भसः ॥३६३॥
तदाज्ञामिव तं बाणमादायोपायनान्वितः ।
संमत्य मागधाधीशश्चक्रिणं प्राञ्जलिर्जगौ ॥३६४॥
दिष्ट्या दृष्टोऽसि दृष्टोऽद्य मया त्वं जगतीपते ! ।
निशाङ्कुरालशोकेन कोकेनेव नभोमणिः ॥३६५॥
भूपकोटीर ! कोटीरमिवाज्ञां तव मूर्धनि ।
अतः परं वहिष्यामि भृत्यं मामुररीकुरु ॥३६६॥
उपदीयमर्पयामास मार्गणं तं च चक्रिणे ।
कोटीरं कुण्डले द्वे च स सर्वस्वमिवात्मनः ॥३६७॥
अभाद् तदनुमहदेतवे प्राभृतं च तत् ।
राजा तं समभाषिष्ट भाषयाऽमृततुल्यया ॥३६८॥
नैव मागधाधीशं यन्तःस्तम्भमिव स्वकम् ।
संस्थाप्य विससर्जैनं सैन्यं चागाद् महोचिता ॥३६९॥
अपसृत्य ततः स्थानाद् विहिताष्टमपारणः ।
चक्री चक्रे मागधेशोत्सवमष्टाह्निकं तदा ॥३७०॥
तेजो नभसि चलता चक्रेणार्कसनाभिना ।
दर्शितपथानुगतः स चक्रवर्ती चचाल च ॥३७१॥
प्रत्यहं पथि गच्छंश्च प्रयाणैरेकयोजनैः ।
चक्री वरदामतीर्थं प्रत्यगाच्चक्रपृष्ठगः ॥३७२॥
एलाकक्कोललवलीलवङ्गफलसङ्कुले ।
दक्षिणाम्भोधिपुलिने स स्वसैन्यं न्यवीविशत् ॥३७३॥
तत्राप्यष्टमभक्तेन पौषधव्रतमाददे ।
पौषधान्ते रथारूढोऽम्भोधिमध्ये समागमत् ॥३७४॥

पूर्वेण विधिना चक्री वरदामसुरं प्रति ।
प्राहिणोद् बाणमात्मीयमिव सन्देशहारकम् ॥३७५॥
शान्तिं जगाम तन्मन्युराश्रुतैराशुगाक्षरैः ।
दिव्यमन्त्राक्षरैः सर्पन् विषवेग इवोरगः ॥३७६॥
वरदामामरः सोऽथ तमादाय शिलीमुखम् ।
उपतस्थे महीनाथं दूताहूत इवानुगः ॥३७७॥
प्रीत्येयानाथनाथस्त्वमनाथेन मयाऽधुना ।
दृष्टोऽस्यघातसाऽरण्यां तापार्तेनेव भूरुहः ॥३७८॥
प्रादेयमिव तं बाणं शुकस्याऽस्यामे ददौ मुदा ।
दिव्यमेकं कटीसूत्रं सूत्रमंशोरिवांशुभिः ॥३७९॥
प्राभृतीकृतयानेव पुरस्ताच्चक्रिणः पुनः ।
मुक्ताराशिं पयोराशेः सर्वस्वमिव संहृतम् ॥३८०॥
अनुग्रहाय जग्राह तत्सर्वं तेन ढौकितम् ।
तत्रैव स्थापयामास तं सामन्तमिवात्मनः ॥३८१॥
गत्वैनं सुहितृणात्मा तथाऽस्थात् वरदामपः ।
पीतामृतमिव स्वामिप्रमादस्तुष्टिपुष्टिकृत् ॥३८२॥
स्कन्धावारं समागत्य राजा विधिविदां वरः ।
साधर्मात्मपरीवारैर्विदधेऽष्टमपारणम् ॥३८३॥
तत्रैव स्वांशमष्टाह्निकं जगद्गुरुतम् ।
उद्दिश्य वरदामेशं चक्री चक्रे महोत्सवम् ॥३८४॥
ततः प्रभासमुद्दिश्य चक्री चक्रानुगोऽचलत् ।
प्रतीचीं प्रति प्रायान्नवीह्निरिवाम्बरः ॥३८५॥
रथधान्यार्थमेदिन मुखमाताडयन् पथि ।
दिनैः कतिपयैः प्राप तस्मीर्य पश्चिमाम्बुधिम् ॥३८६॥
पूर्गीप्रयपःहिन्तालनालिकेरवनाकुले ।
मण्डपं कृतनाम्बूलवल्लीपत्रवलाकिते ॥३८७॥
निवेशं च निवेश्याथ वारितशायनः ।
तत्र मूर्धामुखो मूलयः पश्चिमाम्भोधिचेतपति ॥३८८॥ (पुष्प
[illegible] तथापि निविष्टे [illegible] ।
[illegible] प्रभासेशो [illegible] ॥३८९॥
[illegible] ।
[illegible] ॥३९०॥
[illegible] ।

दृग्व्यावृत इवैषोऽपि प्रेष्यन्ते कामपीनके ।
महारिपु ममाशैशं किन्तु किं करोम्यहम् ॥४०८॥
स्नानालङ्कारदानानि मुनिभद्रासनानि च ।
मयः प्रददौ स्वामीकृतानीवानीयते ॥४०९॥
प्रतिजग्राह राजाऽपि तेनोपनीतकं मुदा ।
स्वामिप्रसादकृतिबद्धपुरःसरानमाददिभम् ॥४१०॥
संमान्य विमलश्चैनं गुहापालमिवापिविषम् ।
तत्र चक्रे पारणान्ते चक्री चाष्टाह्निकं महम् ॥४११॥
चक्रानुगोऽचलचक्री तमिस्राहां गुहां प्रति ।
तासेना चाविशत् तत्र सार्थः सार्थपतेरिव ॥४१२॥
नृपालः स्मरणीकृतकृतमालोऽष्टमं व्यधात् ।
सोऽप्यगान्नृपदापाणिदक्षिणं चलितासनः ॥४१३॥
तमिस्रायाः कन्दराया द्वारि द्वाःस्थ इवाहम् ।
सेवकं बालकमिव मां प्रशाधि परात्पर ॥४१४॥
इत्युक्त्वा सोऽर्पयामास तस्मै वसुमतीभुजे ।
भुवनोत्तमयोग्यानि तिलकानि चतुर्दश ॥४१५॥
स्त्रीरत्नोचितदिव्यवस्त्राण्यलङ्करणानि च ।
तत्कोशाध्यक्ष इव स व्यतरत् पृथिवीभुजे ॥४१६॥
तदादानेन संमान्य व्यसृजत् तमिलापतिः ।
कृतभुक्तिश्च विदधेऽष्टाह्निकं स महोत्सवम् ॥४१७॥
अथान्येद्युः समाहूय चक्रवर्ती चमूपतिम् ।
गुरुः शिष्यमिवैवं तमादिदेश प्रसन्नवाक् ॥४१८॥
सिन्धुराट्सिन्धुवैताढ्यपर्यन्तं सिन्धुनिष्कुटम् ।
दक्षिणं चर्मरत्नेनोत्तीर्यापगां वशीकुरु ॥४१९॥
चमूपतिर्गुणोपेतश्चमूपतिरसौ द्रुतम् ।
दामेव निदधे मूर्ध्नि शासनं क्षितिशासिनः ॥४२०॥
सामन्तसैन्यैः सहितः प्रतिबिम्बैरिवात्मनः ।
ग्रैवेयकं दधत् कण्ठे जयश्रीदोर्लतामिव ॥४२१॥
बिभ्राणो हृदये हारं शौर्यपुञ्जमिवामलम् ।
मौली मौलिं दधानश्च प्रसादमिव चक्रिणः ॥४२२॥
निषङ्गौ द्वौ दधत् पृष्ठे स्वदोर्दण्डाविवोद्भटौ ।
बिभ्रच्चापमधिज्यं च वक्रीकृतमिवाशनिम् ॥४२३॥
महादण्डधरो दण्डपतिर्दोर्दण्डचण्डिमा ।

दधानामोष्ठबिम्बे च बिम्बीबिम्बे इवारुणे ॥४७३॥
यथार्हन्यस्तरत्नालङ्कारां रत्नखनीमिव ।
रम्यां सुरासुरस्त्रीणां सौभाग्यैरिव निर्मिताम् ॥४७४॥
अगण्यपुण्यलावण्यां कन्यां स्त्रीरत्नमद्भुताम् ।
तेऽस्यास्मै प्राभृतीचक्रुः सर्वस्वमिव सञ्चितम् ॥४७५॥
(पञ्चभिः कुलकम्)

अथान्यदपि रत्नादि ढौकितं खेचरेश्वरैः ।
तदादात् सर्वमुर्वीशश्चिह्नं चक्रिश्रियामिव ॥४७६॥
विसृज्यैतांस्ततश्चक्रमनु चक्री प्राप जाह्नवीम् ।
सेनां न्यवीविशत् तस्याः कूले कोमलवालुके ॥४७७॥
सेनान्याऽसाधयत् सोऽथ तस्या उत्तरनिष्कुटम् ।
गङ्गादेव्यपि सच्चक्रे चक्रिणं सिन्धुवद् मुदा ॥४७८॥
व्यावृत्तोऽथ ततश्चक्रमनुगच्छन् क्षितीशिता ।
खण्डप्रपाताह्वां गुहां मृगेन्द्र इव लब्धवान् ॥४७९॥
तदीयाभ्यर्णसंन्यस्तसैन्यो वसुमतीपतिः ।
आराधयत् नाट्यमालदेवमष्टमभक्तभाक् ॥४८०॥
स चागादुपदापाणिश्चक्र्यादात् तां स्वकामिव ।
सत्कृत्य विससर्जैनं स्वयं च कृतपारणः ॥४८१॥
निदेशादथ भूभर्तुः पूर्ववत् पृतनापतिः ।
स्वगृहस्येव गुहायाः कपाटावुद्घाटयत् ॥४८२॥
उद्घाटितकपाटां तां पूर्ववद् भूपपुङ्गवः ।
गुहामुल्लङ्घयामास केसरीव वनस्थलीम् ॥४८३॥
निवेश्य सेनां जाह्नव्याः पुलिने पश्चिमे ततः ।
निधीन् नव समुद्दिश्य चक्री चक्रेऽष्टमं तपः ॥४८४॥
पौषधान्ते क्षमाजानिमभ्यगुर्निधयो नव ।
गुह्यकानां सहस्रेणाधिष्ठितास्ते पृथक् पृथक् ॥४८५॥
नैसर्पः पाण्डुकश्चैव पिङ्गलः सर्वरत्नकः ।
महापद्म-काल-महाकाल-माणव-शङ्खकाः ॥४८६॥
उच्चविस्तारदैर्घ्येऽष्टनवद्वादशयोजनाः ।
ते समाः काञ्चनाष्टाष्टचक्रोपरि प्रतिष्ठिताः ॥४८७॥
चक्रचन्द्रार्कचिह्नाश्च सम्पूर्णा रत्नराशिभिः ।
वर्यवैडूर्यमणिजैः कपाटैः पिहिताननाः ॥४८८॥
तदधिष्ठायका देवाः स्वेषामेषामिवाभिधाः ।

नवभिर्निधिभिर्युक्तो मञ्जूषाभिरिव श्रियाम् ।
स्वांशैरिव महारत्नैश्चतुर्दशभिरन्वितः ॥५०६॥
ऊढानां यौवनारूढप्रौढनृपाङ्गजन्मनाम् ।
द्वात्रिंशता सहस्रैश्च परितोऽप्सरसामिव ॥५०७॥
प्रतिच्छन्दैरिवैतासां लावण्यागण्यसंपदाम् ।
तावतीभिर्देशलोककन्याभिः परिवारितः ॥५०८॥
द्वात्रिंशता सहस्रैश्च भूभुजां सद्गुणौजसाम् ।
शोभितः स्वकदोर्दण्डकल्पवल्लीफलैरिव ॥५०९॥
चतुरशीत्या लक्षैश्च सप्तिस्यन्दनदन्तिनाम् ।
योधानां षण्णवत्या च कोटिभिः परितो वृतः ॥५१०॥
अनुयाणामिव पुङ्खोऽनुचक्रं चक्रिचन्द्रमाः ।
सृजन् जगत् सैन्यमयं च बालप्रबलैर्बलैः ॥५११॥ (नवभिः कुलक
वाजिवक्त्रगलत्स्फारफेनस्थासकमौक्तिकैः ।
वितन्वानो वनस्थलीं ताम्रपर्णीसुतामिव ॥५१२॥
हेषां सहर्षं कुर्वद्भिः किशोरैर्मृदुकेसरैः ।
अरण्यानीं विदधानो मन्दुरामिव सुन्दराम् ॥५१३॥
भिल्लीहल्लीसकोल्लासहेलोल्लिखितेक्षणम् ।
कुर्वन् वनं निजैः सैन्यैः पुरन्दरपुरोपमम् ॥५१४॥
पूरयन् रोदसीरन्ध्रं गीरन्ध्रैः सैन्यपांशुभिः ।
सृजन्निव नभोऽम्भोऽन्यदन्तरालेऽन्तरिक्षकम् ॥ ५१५ ॥
पुरग्रामाकरद्रोणमुखमुख्यमहीभुजाम् ।
फलावलीमिव दृशामाददन्नुपदां पथि ॥ ५१६ ॥
अम्भोवाह इवाम्भोभिः सुखयन् जनतां धनैः ।
स्वां पुरीं स्व पुरीरम्यां प्राप पृथ्वीपुरन्दरः ॥५१७॥ (षड्भिः कुलक
निवेश्य च तदभ्यर्णे स्वसेनां तत्सुतामिव ।
तदधिष्ठायकं देवं ध्यात्वा चक्रेऽष्टमं नृपः ॥ ५१८ ॥
आयातेऽथ वशं तस्मिन् देवलोकशिरोमणिः ।
दिव्यैर्भोग्यैर्व्यधाद् भुक्तिं कल्पवल्लीफलैरिव ॥५१९॥
प्रवरे स्वपुरे स्वर्द्धिस्पर्धिनि विश्वशालये ।
प्राविशन् पृथिवीपालः पौराणां जनयन् मुदम् ॥५२०॥
राजद्वारं ययावेव कैलासमिव यक्षराट् ।
करिणोऽवततारासु गिरिशृङ्गादिवामराट् ॥५२१॥
सेनान्यप्रमुखं राजा लोकं लोकपुरन्दरः ।

सहृत्य विस्तरश्रीपद्मामास्ते प्राघुर्णामिव ॥५२२॥
बामपाश्चौरपत्नीभि पत्नीभिश्चनाभिरम्यित. ।
प्रसादं मार्गितस्तूप. नृपः सापुण्यपापसाम् ॥५२३॥
विपर्यविविपर्यदिष्यमारब्धिसा मर्यनैव ।
भोगामसुरुत. भूमनां स्पर्लोकाद्गहनामिव ॥५२४॥
अथ ते ह्यपदायासुमैरामरमयसा ।
स्वामिरयं विक्रयस्याच्य पट्खण्डानाममूर्धिंभु ॥५२५॥
अमोऽप्रियवक्ते चक्रं पुष्पंतं द्वादशाधिकः ।
भक्तिस्थानिरन्तवशी तत्त्व प्रतिपत्स्यपात् ॥५२६॥
ते दृष्ट्वादिनीतापहृदिनीभ्यञ्जाहर्मऽर्दः ।
मरुपूर्वरथ्यविभ्रुक्तं मेदमिव वारिदाः ॥५२७॥
निपूर्वोऽधौरस्थे तस्मिन् पट्खण्डायां निमण्डनः ।
सन्ता क्षत्रपालप्रायदिश्वरावानुपत्रप्रलः ॥५२८॥
मनोऽधिर्वाधमारुह्रो सुजन पथविर्कं सुखम् ।
अमेयाद् पानराज् क्षीर्णवानथां पानयांपमः ॥५२९॥
दण्डप्रायमनिदष्टं सानार्थामानि भूभुज ।
पर्कैट्टयाणि चरणानि वभूवु शास्वथस्पति ॥५३०॥
प्रणिच कारिणः चर्म तथापि हि पुमानयः ।
सुवर्णा च मोक्तिकानीव शशः श्रीधामिन्न अखिंट ॥५३१॥
भ्राम्यद्भ्रमरझङ्कारहारिगण्डस्थलं गजम् ।
आरुरोह जगन्नाथो विन्ध्याद्रिमिव केसरी ॥५५९॥
प्रबलैः पृथिवीपालैर्युक्तः स्वांशैरिवोद्भटैः ।
दैवैरिव शुभाशंसिशाकुनैरनुकूलितः ॥ ५६० ॥
ध्रियमाणोपरिच्छत्रः परिवारितचामरः ।
[illegible] (युग्मम्)

[illegible]

कटकोत्कटभारेण मग्ना सती वसुंधरा ।
चकार रथचीत्कारदम्भादारटिकां भृशम् ॥५६३॥
नानातूर्यघनिर्घोषो व्यानशे गगनं क्षणात् ।
आचिख्यासुरिवेन्द्रेभ्यः प्रयाणं प्रथमं प्रभोः ॥५६४॥
पतत्पत्तिपदप्रौढप्रहारविधुरा धरा ।
सिच्यते च मदाम्भोभिः सानुकम्पैरिव द्विपैः ॥५६५॥
एवं चलच्चमूचक्रभारभुग्नितभोगिराट् ।
विदधे गीतमाङ्गल्यप्रयाणं प्रथमे प्रभोः ॥५६६॥
प्रयाणे प्रथमे नाथं प्रस्थितं पथि सत्वरम् ।
सरथः सारथिर्वज्रपाणेः प्राञ्जलिरभ्यगात् ॥५६७॥
स प्रणम्य जगद्देवं देवाहं हरिसारथिः ।
[illegible] ॥५६८॥

[illegible]

स्तूयमानो जयारावैः सुरखेचरभूचरैः ।
दिनैः कतिपयैः पार्श्वप्रभुः प्राप कुशस्थलम् ॥५७०॥
अथागत्य तदुद्याने स्कन्धावारं न्यवीविशत् ।
स्वयं चैत्योऽवसत् प्रौढप्रासादे सुरनिर्मिते ॥५७१॥
नाथः सनाथः मर्यादया कृपया धैर्येण द्रुतम् ।
प्राहिणोत् कोविदं दूतं कलिङ्गाधीशसंनिधौ ॥५७२॥
सोऽपि गत्वा सदस्यस्य न्यगदद् वाग्मिनां वरः ।

कस्यामी मग्युरेनेदं स्वामाज्ञापयतीत्यसौ ॥५७२॥
एवं प्रसंगजिद्रूपं गुप्तं दुर्गनिरोधतः ।
अयं हि पुण्यमन्तानयर्णौ शरणं श्रितः ॥५७३॥
इयता हि गतं नास्ति किञ्चनापि तथाधुना ।
विमुच्य विदर्ह्य यादि निज नगरमञ्जसा ॥५७०॥
कर्णाऽवर्णं प्रसर्पत्तद्दूतोक्तीरिति वाग्भरः ।
वपूंषोऽन्याधिकं कोपो घनगर्जितबिन्धनैः ॥५७६॥
क्रोधसंपुटो भवांहतमागोऽदपंसुनः ।
सोऽब्रवीद् वचनं कोपात् कांपोऽज्ञानमिवापरम् ॥५७७॥
यदाहूतोऽसि हे दूत ! यदेवं प्रलपस्यदः ।
न मां जानासि तत्पुत्रांधिस्यपिवंथं गुरुम् ॥५७८॥
कः पार्श्वकुमारशील्कष्ट लाटशिरोमणे ! ।
को पाम्यंसको यः कामं प्रकाशयति मामिति ? ॥५७९॥
अथवा नानयोर्दोषो वाच्यपार्श्वकधारिणोः ।
यद्रूक्तं मतिः पुत्रां न दाव्ये न च वार्द्धके ॥५८०॥
रे दूत ! दुराभूत ! हेमागति मर्त्तरि ।
येयं तद्गुणान् पूर्वं मस्कोपचपलेभ्यनम् ॥५८१॥
नूनं कश्चित् स्वयाऽकारि निजमञ्जुदपत्रयः ।
तद्दुता प्रेषितोऽस्यत्र यमस्येव निकेतने ॥५८२॥
त्वमवध्योऽसि दूतत्वादतो गच्छ गतत्रप ! ।
इत्युक्त्वा विरते तस्मिन् स दूतः पुनरूचिवान् ॥५८
अरे यवन ! किं तेऽहिन विपाता यमपेदमति ? ।
मूर्खाणं इव पिपासो यदेवं वाग्यस्तत्स्मत् ॥५८४॥
करस्य श्रीपार्श्वकुमारपुरः पुरपर्कादिकः ।
चेतनासमिपातोयं त्रैलोक्यं यस्य किङ्करः ॥५८५॥
कृपया मम्मुखेनेदं सोऽवदद् भवतो हितम् ।
यथः पानमिवादस्तद्विपरीतं तथाऽभवत् ॥५८६॥
रे वराक ! दुरात्ममायाभासीर्ज्ञापितं निजम् ।
शरणं पार्श्वनाथस्य चरणौ शरणीकुरु ॥५८७॥
एवं प्रणाय संदेशहारकं तं निरङ्कुशम् ।
उदायुधा भटास्तस्य मारणायोपतस्थिरे ॥
यावत् तं गृहीतएवाधैः प्रहरन्त्येतद्भटाय
तावद् देव दयावाद्धि धीसखः कोऽपि धी

अरे आकस्मिकः कोऽसौ आरब्धः सम्पदां क्षयः ? ।
युवनस्वामिनो दूतं यदेतं हन्तुमुत्सुकाः ॥५९०॥
भो भो भटा भवन्तश्च वैरिणः स्वविभोः खलु ।
यदं त्रिजगतां भर्तुर्दूतोपरि रुषातुराः ॥५९१॥
गतक्रोधेषु योधेषु दूतं मन्त्रिवरोऽवदत् ।
न कोपो भवता कार्यो मनागपि मनोऽन्तरे ॥५९२॥
पशव इव भटा एते नैव जानाति किञ्चन ।
त्वं तु मेधाविनां मुख्यः कृपालोऽसि सेवकः ॥५९३॥
दूतं मन्त्री पुनः प्राह शृणु भोः पुरुषोत्तम ! ।
आयास्यामो वयं पार्श्वं नन्तुं सपदि तवानुगाः ॥५९४॥
इत्युक्त्वा विससर्जैनं दूतं सत्कृत्य मन्त्रिराट् ।
आगत्य यवनाधीशसन्निधौ चैवमूचिवान् ॥५९५॥
स्वामिन्नयं न सामान्यः पार्श्वः पार्श्वोऽरिसंपदाम् ।
यस्यैतापादितं प्रकुर्वन्ति निर्जराः किङ्करा इव ॥५९६॥
अस्मै प्रहितवान् शक्रः स्वयं सारथिनिजम् ।
अतो नाथामुना सार्धं विरोधो नायतौ शुभः ॥५९७॥
यवने मन्त्रिवर्येतत्कोपः शान्तिमुपेयिवान् ।
धारायन्त्रस्य धाराभिर्दावानल इवोल्वणः ॥५९८॥
धीमन्तो यवनाधीशो साम्प्रतं पुनर्जगौ ।
यत्राऽऽगच्छतां गुरुरच्छा चेत् तस्याभ्यर्णमथाप्य ॥५९९॥
एवमाकर्ण्य सचिववचः प्राप्य कलिङ्गराट् ।
प्रतिबोध्य स्ववाचाऽहं नियुक्ताऽस्य इवास्यति ॥६००॥
इति ध्यात्वा कलिङ्गेशो निजैः परिजनैः सह ।
कुठारं कण्ठे निक्षिप्य पार्श्वं नन्तुमुपागमत् ॥६०१॥
आ यवनेश्वरैस्तैः सोऽथ प्रविवेश सभां विभोः ।
पादपद्मप्रणिपाती पुत्रमिव प्रभुम् ॥६०२॥
प्रभुरपि प्रसन्नास्य पीयूषसदृशा दृशा ।
आपन्नं यवनाधीशमपश्यत् नाथनायकम् ॥६०३॥
कुठारं ... यवनेशितुः ।
... ॥६०४॥
... प्राह भर्तुः ... यवनप्रभुः ।
... ॥६०५॥
... ।

कृपया बोधितो यस्मात् सन्तः सर्वत्र वत्सलाः ॥६०६॥
शृगाला [illegible] सिंहस्य के वयं पुरतस्तव ! ।
विश्वं विश्वमिदं यस्मभवत्वं विद्यते तव ॥६०७॥
शिष्यत्वेन मां नाथ ! गृहाणानुगृहाण च ।
भुजिष्य इव करिष्ये शिक्षां तेऽहमतः परम् ॥६०८॥
पार्श्वनाथोऽथ जगदे जगदेकहितावहः ।
कलिङ्गेश ! त्वयाऽकार्यं [illegible] कार्यं पुनरीदृशम् ॥६०९॥
दुर्गरोधेऽथ संमुक्ते श्रुतोदन्तः प्रसेनजित् ।
प्रभावत्यान्वितः पार्श्वमभ्यगात् तुष्टिपुष्टिमान् ॥६१०॥
प्रणम्य प्रोचिवान् पार्श्वं कुशस्थलपुरेश्वरः ।
नाथ ! नाथेन भवता सनाथत्वमगामहम् ॥६११॥
यवनो नगरं रोधाद् मुमुचेऽद्य त्वदागमात् ।
तमोभिर्मुद्रितं पद्ममिवाभ्युदयतो रवेः ॥६१२॥
अबन्धुरप्यभूद् बन्धुः कलिङ्गाधीश्वरोऽप्यसौ ।
भवदागमने जज्ञे यदसाधारणकारणम् ॥६१३॥
अथ नाथ ! प्रसीद द्रागुद्वहेमां ममात्मजाम् ।
हृदयति पतिर्नायैषा त्वां जगत्प्रभुं विना ॥६१४॥
दृष्ट्वा प्रभावती वीक्ष्य निर्दोषं विभुमीदृशम् ।
एवं दीपं रत्नद्वीपीत्यत्याशीद् वेधाः प्रसूनसुम् ॥६१५॥
ईदृक्पुंरामनिर्माणप्रावीण्यं बिभ्रतो विधेः ।
चरितार्थप्रयासोऽसौ साफल्यं समुपेयिवान् ॥६१६॥
यादृक् सैः किन्नरैर्गीतस्ततोऽप्येषोऽतिसुन्दरः ।
यस्मादेतादृशं पुंसां रूपं वाचामगोचरम् ॥६१७॥
यदि मामेव भुवनभर्ताऽङ्गीकरिष्यति ।
तदा पल्लवितं नूनं प्राक्कृतैः सुकृतैर्मम ॥६१८॥
तातवाचमसौ स्वामी मंस्यते वा न मंस्यते ।
दध्यौ तन्मुखविन्यस्तलोचनैवमब्जलोचना ॥६१९॥
अथ च स्माह धर्मेयोऽप्यमेयमहिमा नृपम् ।
कन्योद्वाहेऽत्र प्रमाणं तातपादाश्च नाहम् ॥६२०॥
इति श्रुत्वा कनी वज्राहतेवाऽजनि दुःखिता ।
अपतद् मूर्छिता भूमौ लब्धसंज्ञा जगाद च ॥६२१॥
ईदृशं नास्ति मे भाग्यं यदसौ भुवनेश्वरः ।
स्वप्नेष्वपीहेत मां तत् का कथा पाणिपीडने ! ॥६२२॥

अथ श्रुत्वा विभोर्वाचं हृष्टो राजा प्रसेनजित् ।
करिष्यतु पितुर्वाक्यादेव कन्याकरग्रहम् ॥६२३॥
अतः सुतां समादाय गच्छाम्यहं सहामुना ।
इति ध्यात्वाऽभ्यधाद् विश्वराजं राजा प्रसेनजित् ॥६२४॥
त्वया सहाहमेष्यामि देव ! वाराणसीं पुरीम् ।
अश्वसेननृपं द्रष्टुमुत्के स्तस्त्रसुखी मम ॥६२५॥
ओमिति प्रतिपद्यतद् नाथस्त्रिजगतामथ ।
संमान्य विससर्जैनं यवनं स्वपुरं प्रति ॥६२६॥
अथ प्रसेनजिद्राजा सकन्येनान्वितः प्रभुः ।
उत्सुकस्तातसेवार्थे चलति स्म कुशस्थलात् ॥६२७॥
सुरासुरवधूवृन्दैर्गीयमानगुणावलिः ।
चिरं नन्द चिरं नन्देत्युच्चानैः खेचरैः स्तुतः ॥६२८॥
प्रणमत्पृथिवीपालमौलिमालार्चितक्रमः ।
अलंकर्तुं कलयामास पुरीं वाराणसीं प्रभुः ॥६२९॥ (युग्मम)
क्वचित् कर्पूरकस्तूरीपाथःसाम्तरकर्दमम् ।
क्वचिच्चन्दनकाश्मीरद्रवैर्विन्यस्तहस्तकम् ॥६३०॥
क्वचिद् धूपघटीधूपधूमालीधूसरीकृतम् ।
क्वचिद् लम्बितमुक्तास्रग्दामतोरणबन्धुरम् ॥६३१॥
क्वचित् प्रांशुध्वजव्रातैर्गगनाश्लिष्टमालितम् ।
क्वचित्पार्श्वजिनकथाप्रस्तावप्रपरम् ॥६३२॥
क्वचित् सुगन्धपुष्पाणां श्रेणीभिर्विस्मयावहम् ।
क्वचित् नानाविधवाद्यनादपूरितगोपुरम् ॥६३३॥
क्वचिद् दुन्दुभिनिर्घोषप्रमोदभरितजनम् ।
क्वचित् नानाविधनृत्यविनोदोत्सवाकुलम् ॥६३४॥
क्वचिद्वारविलासिनीनृत्यकोलाहलाकुलम् ।
एवं पुरं प्राविशत् स्वामी भूपतिनिवहैर्वृतः ॥६३५॥
(षड्भिः कुलकम्)

अश्वसेनः सुतं दृष्ट्वा सहसाभ्येत्य सत्वरम् ।
विस्मयं निरवापं मस्तु, नम्रो प्रभुर्यदा ॥६३६॥
गतवर्षा प्रसेनजिन्नरवर्षमुखाम्भोजं सान्त्वं ददौ ।
अथ प्रसेनजिद्राजा वामादेवीं ननाम सः ॥६३७॥
तदा सुतवत्सलं च निवेश्य पार्श्वजि ।
अश्वसेनोऽवदत् प्रसेनजित्कुमारमन्वेदिताम् ॥६३८॥

कुशस्थलेश ! कुशलं सराज्यस्य तवास्ति भोः ? ।
सोऽप्याहास्ति भवत्पादप्रसादात् कुशलं मम ॥६३९॥
किन्तु प्रभावती नाम कन्येयं दुहिता मम ।
आनीताऽस्ति भवत्पुत्रपार्श्वनाथकृते कृतिन् ! ॥६४०॥
सत्यीक्रियतां स्वामिन्नसौ मम मनोरथः ।
इत्याकर्ण्य वचस्तस्य जगौ वाराणसीपतिः ॥६४१॥
कुशस्थलपुराधीश ! जागर्ति मम चेतसि ।
मनोरथोऽसौ श्रीपार्श्वपाणिग्रहणगोचरः ॥६४२॥
किन्त्वेष पार्श्वकुमारो भोगेभ्यो विपराङ्मुखः ।
आ जन्मतो विरक्तात्मा न जाने किं करिष्यति ? ॥६४३॥
परं त्वदुपरोधेन बलात्कारेण चात्मनः ।
विवाहं कारयिष्यामि पार्श्वस्यानिच्छितोऽपि हि ॥६४४॥
इति व्याहृत्य काशीशोऽन्वितस्तेन महीभुजा ।
आजगाम जगन्नाथसनाथं केलिमन्दिरम् ॥६४५॥
पार्श्वोऽपि तातमायान्तं वीक्ष्योत्तस्थौ मुदञ्चितः ।
वृद्धानां विनयं सन्तो न मुञ्चन्ति कदाचन ॥६४६॥
यथास्थानं निषण्णेऽस्मिन् पार्श्वं प्राहाश्वसेनराट् ।
एनां प्रसेनजित्पुत्रीमुद्वहोद्वहधूर्वह ! ॥६४७॥
इत्याकर्ण्याभणद् भर्ता वचोभिर्विनयांचितैः ।
धर्मविरुद्धोऽद्रिमः संमतः शर्मपायति ॥६४८॥
लोकः स्वमायाविवशः परिग्रहपरः सदा ।
नृणां तारसद्मग्नानां नरकाध्वनिदीपकः ॥६४९॥
आपातरम्यो रमणीजनानां खलु संस्तवः ।
आस्वाद इव किंपाकफलानां पाकभीरुषाम् ॥६५०॥
तावद्विवेको हृद्गेहे प्रदीप इव दीप्यते ।
न यावत् सुभ्रूभङ्गाः पतन्ति पवना इव ॥६५१॥
कान्तारता विरक्ताऽपि जायतेऽनर्थकारणम् ।
दन्तान्वय भुजङ्गी स्याद्गृहगा घातकाऽपि हि ॥६५२॥
विषयासक्तचित्तानां नृणामुन्मार्गगामिनाम् ।
मुष्णाति शमशीलादि धनं कामपलिम्लुचः ॥६५३॥
तावत् मित्र धनं तावत् तावद् धर्मे मतिः खलु ।
यावत् कामतमस्तोमो न प्रसर्पति हृद्गृहम् ॥६५
अतुलैर्ज्ञानसलिलैः सिक्तः काममहीरुहः ।

स्वप्नादप्यव्ययादुःखफलप्राप्तिं प्रयच्छति ॥६५५॥
अतो दमदयाशीलशमसाम्यादिनिग्रहः ।
हे तात ! संसृतिभ्रान्तिहेतुः कोऽयं कदाग्रहः ? ॥६५६॥
वैराग्यसंगसन्दर्भमित्याकर्ण्य सुतोदितम् ।
पुनर्वाराणसीराजो व्याजहारात्मजं निजम् ॥६५७॥
पुत्र ! यद्भवताऽवाचि जानेऽहमपि तत् तथा ।
किन्तु त्वं मोहतः पाणिग्रहणाय मयेरितः ॥६५८॥
विषयेभ्यो विरक्तोऽपि पूरयास्मन्मनोरथान् ।
परिणीय कनीमेनां गार्हस्थ्यावश्यके क्षमः ॥६५९॥
जिना अजितवीराद्याः सर्वेऽप्यादीश्वरादयः ।
न मोक्षं लेभिरे किं तेऽप्रमहन्तो भवन्तोऽपि हि ? ॥६६०॥
इति मत्वा पितुर्वाक्यमात्मनो भोगकर्म च ।
मेने पाणिग्रहं स्वामी महान्तो ह्यकदाग्रहाः ॥६६१॥
सन्निधाय स काशीन्द्रः स च राजा प्रसेनजित् ।
आरेभाते प्रमोदात् सद्यः पाणिग्रहणोत्सवम् ॥६६२॥
मण्डिता मण्डपाः प्रौढाः शरदभ्रसमावहाः ।
आहूतो ज्ञातिसम्बन्धिसुहृत्परिजनो निजः ॥६६३॥
कृता मुक्तामणिश्रेणीः स्वस्तिकानां च पङ्क्तयः ।
रसालपर्णैः प्रत्यग्रैः कृताश्चन्दनमालिकाः ॥६६४॥
अधोवृन्तैः पुष्पपुञ्जैः परितः प्रकरो भृतः ।
सिक्ता भूरम्बुभिः पीनगन्धैर्घुसृणचन्दनैः ॥६६५॥
दिव्याङ्गरागाः सुन्दर्यः सधवा धवलान्यगुः ।
पण्याङ्गनाश्च मण्डलीभूय हल्लीसकं व्यधुः ॥६६६॥
पत्रभतौ पत्रपूरितौ स्पर्धया मिथः ।
निजर्द्ध्यनुसारेण प्रारेभाते महोत्सवम् ॥६६७॥
अथ त्रिजगतां नाथो महोत्सवपुरःसरम् ।
पुर्यां प्रसेनजिद्राज्ञः पर्यणैषीत् प्रभावतीम् ॥६६८॥
विवृत्य नवाम्भोदः सीतामेव रघूद्वहः ।
पक्षेण सुरराजिस्तया रेजे जगद्गुरुः ॥६६९॥
मौक्तिकस्वर्णमाणिक्यवस्त्रपात्राश्वादिकम् ।
जामात्रे पार्श्वनाथाय ददौ प्रीतः प्रसेनजित् ॥६७०॥
अत्यर्थमागमप्रशंसां भूयो भूयोऽनुशिष्य च ।
काशीन्द्रेण विसृष्टोऽगात् स्वपुरं स प्रसेनजित् ॥६७१॥

चतुर्थः सर्गः ।

सेवे पार्श्वनाथोऽयं प्रभावत्या समं सुखम् ।
भोगकर्मक्षयार्थं हि जिना गार्हस्थ्यवासिनः ॥६७२॥
कदाचित् कोकिलालापमुखरीकृतकानने ।
सदाक्रीडत् तया स्वामी करिण्येव महाकरी ॥६७३॥
कदाचिद्रेमे सरसि सरसीरुहभासुरे ।
चक्राह्व इव चक्राह्वया प्रभावत्या समं प्रभुः ॥६७४॥
श्रीपार्श्वं प्राप्य प्राणेशं प्रामोदत प्रभावती ।
ईप्सितार्थे हि संपन्ने प्रमोदः किन्नु रावते ॥६७५॥
कदाचिन्नर्तयामास वाद्यभिर्वाद्यैर्नवैर्द्धैः ।
अङ्गिद्वां भर्तुरेहेऽसौ मान्मथीमिव चेतनाम् ॥६७६॥
कदाचित् सा सुमनोभिर्मस्तके जीवितेशितुः ।
मुकुटं मण्डयामास चूडामिव मनोभुवः ॥६७७॥
कदाचित् कण्ठनिकटे स्वयं संदर्भितां स्रजम् ।
भर्तुर्निवेशयामास निजबाहुलतामिव ॥६७८॥
कदाचित् साऽथ कस्तूरीद्रवपूरेण जिनेशितुः ।
चित्रमुच्चित्रयामास भालेऽमिव रतीशितुः ॥६७९॥
कदाचिद् मूर्ध्नि सा भर्तुर्बन्धुरैः पुष्पदामभिः ।
धम्मिल्लं बन्धयामास कन्दर्पमिव विभ्रमैः ॥६८०॥
यद् यद् प्रभवेत्तुर्मनःप्रीतिनिबन्धनम् ।
स्वयं निष्पादयामास समस्तं किङ्करीव सा ॥६८१॥
इति स्वप्रियया सार्धं भुञ्जन् भोगाननेकधा ।
गमयामास समयान् समयज्ञशिरोमणिः ॥६८२॥

स्वर्गच्युत्यभिधाभजन्मजननस्नात्रोत्सवाडम्बरो-
द्दामोत्साहमदाविलासविलसत्संरम्भसंदर्भितः ।
श्रीमत्पार्श्वजिनाधिराजचरिते चेतश्चमत्कारकृ-
च्चातुर्यांचिते समाप्तिमगमत् सर्गश्चतुर्थः शुभः ॥६८३॥

इति श्रीतपागच्छाधिराजभट्टारकसार्वभौमश्रीहीरविजयसूरीश्वरविज-
यसेनसूरिराज्ये समस्तसुविहितावतंसपण्डितकोटीकोटीर-
हीर पं० श्रीकमलविजयगणिशिष्यभुजिष्यग०
हेमविजयविरचिते श्रीपार्श्वनाथचरित्रे
चतुर्थः सर्गः सम्पूर्णः ॥४॥

अर्हम्

पञ्चमः सर्गः

अथान्यदा जगद्भर्ताऽधिरूढः सौधमूर्धनि ।
करैरिवेन्दुर्दक्पातैर्विश्वमासीमपाययत् ॥१॥
इतश्च सप्रियान् पौरान् पूजोपस्करप्राभृतान् ।
प्रभुर्निभालयामास गच्छतः पुरतः पुरः ॥२॥
वीक्ष्यैतान् विस्मयस्मेरलोचनस्त्रिजगद्गुरुः ।
अप्राक्षीत् सेवकं कञ्चित् पौराणां गतिकारणम् ॥३॥
सोऽप्यचगततद्वार्तो वार्तयन् स्वामिनं निजम् ।
नाथैकस्मिन् संनिवेशे द्विजोऽभूद् दुर्गतावधिः ॥४॥
अभवद् नन्दनस्तस्य निर्भाग्याणां शिरोमणिः ।
जातमात्रेऽथ तस्मिंस्तत्पितरौ मृतिमापतुः ॥५॥
कृपया सोऽर्भको लोकैर्जीवितः कष्टतोऽलमत् ।
कठ इत्यभिधां प्राप तारुण्यं च क्रमेण सः ॥६॥
भ्रमन् भिक्षाकृते ग्रामाद् ग्रामं चैव गृहाद् गृहम् ।
उदरं पूरयामास सोऽपरस्यन्तनीरसैः ॥७॥
सोऽन्यदा नगरं क्वापि हारादिभिरलङ्कृतान् ।
स्वैरं क्रीडन्ति भूप्राप्ता वासवा इव केचन ॥८॥
अर्थनाप्यप्रहस्ताप्रानर्थिसार्थान् धनैर्घनैः ।
प्रीणयन्ति पुनः कल्पपादपा इव केचन ॥९॥
के चिद्विहितशृङ्गारा भृङ्गारोद्भासिपाणयः ।
पूजयन्त्यर्हतां मूर्तीः सुरा इव सुरौकसि ॥१०॥
दिव्यरूपधराः केऽपि दिव्यनेपथ्यधारिणः ।
रमन्ते स्वेच्छया साक्षाद् भौमभ्यजानुजा इव ॥११॥
गजवाजिरथारूढाः केऽपि भ्राम्यन्ति भूषिताः ।
व्योममार्गे विमानस्था इव विद्याधरेश्वराः ॥१२॥
कान्ताभुजलताश्लिष्टशरीराः स्मरसोदराः ।
तिष्ठन्ति सुखिनः केऽपि लताश्लिष्टा इवाङ्घ्रिपाः ॥१३॥
वीक्ष्यैतान् नागरान् स्वर्द्धिस्पर्द्धितत्रिदशेश्वरान् ।
कठः सद्यः समुत्पन्नसंवेगो ध्यातवानिति ॥१४॥
(सप्तभिः कुलकम्)

यभिः पूर्वभवे नूनमाचीर्णं दुस्तपं तपः ।
सदृक्संपदयो यस्मादीदृशा नागरा अमी ॥१५॥
प्राग्भवे न विमूढेन मया तेपेऽद्भुतं तपः ।

यस्मादहं स्वजठरपिठरापूरणाऽक्षमः ॥१६॥
भोगोपभोगसंयोगयोगाः खलु शरीरिणाम् ।
तपसः स्युः पयोवाहादिव धान्यकाम्यता ॥१७॥
इत्थं ध्यात्वा कठः शीघ्रं तापसव्रतमाददे ।
सोऽपि तेपे तपस्तीव्रं कन्दमूलफलाशनः ॥१८॥
चतुर्दिक्षु चित्रभानुश्चित्रभानुस्तथोपरि ।
एवं प्रकुर्वन् पञ्चाग्नितपः सोऽत्र समाययौ ॥१९॥
केचित् तमर्चितुं केचिद्वीक्षितुं कौतुकात् कठम् ।
ततः समाभूताः पौरा यान्त्यमी नगराद् बहिः ॥२०॥
एवमाकर्ण्य तद्वाक्यं कौतुकोत्कण्ठितः प्रभुः ।
पारूढो ययौ तत्र मित्रैः परिजनैः समम् ॥२१॥
ज्ञानत्रयधरो ज्ञानवतां मुख्योऽश्वसेनसूः ।
काष्ठान्तरस्तत्र ज्वलने ज्वलन्तमहिमैक्षत ॥२२॥
पौरैरभ्यर्चितं मायमुग्धैः पुष्पाक्षतादिभिः ।
प्रोवाच दृष्ट्वा तत् सर्वं दुर्ललितं प्रभुः ॥२३॥
अहो ! अज्ञानमज्ञानमहो ! ते कष्टमुत्कटम् ।
किं मुधा कुरुषे पापं भवभ्रमणकारणम् ! ॥२४॥
कठ ! दुष्ट ! कठोरात्मन् ! मिथ्याज्ञानविमोहितः ।
मा विधेहि मुधा कष्टं बीजोप्तिमिव पावके ॥२५॥
क्षीरस्येव नवनीतं प्रस्तरस्येव काञ्चनम् ।
धर्मस्य सारं कारुण्यं न जानासि शठ ! कठ ! ॥२६॥
विना जीवदयां सर्वं कष्टं कठ ! वृथा तपः ।
विना कृतस्य जीवेन शरीरस्येव मण्डनम् ॥२७॥
इत्याकर्ण्य विमीयायं कठो दुष्कर्मकर्मठः ।
अभूत् पूर्वमथाभ्यस्तकोपाटोपपरः क्षणात् ॥२८॥
अहो ! मुग्धता राजसूनोर्धार्ष्ट्यमहो ! पुनः ।
स्तम्भस्त इव यद् ब्रूते वचो मत्पुरतोऽपि यः ॥२९॥
कोऽसौ विदग्धुर्नरकं भवे मत्तपसां विधौ ।
आगाद् विघ्नकरो मातृसुखमुख्यः पुरो मम ! ॥३०॥
इति ध्यात्वा वचः प्रोचे संरब्धोष्ठः स दुष्टधीः ।
पञ्चाग्निप्रवेशे तोमतापोहारमिवाहृतम् ॥३१॥
गजवाजिरथादीनां वाहनं सुखसाधनम् ।
कामिनीभोगसम्भोगा जानन्ते राजनन्दनाः ॥३२॥

तत्र कुसुमबाणबाणानुत्तेजयन् भृशम् ।
पुष्पकालः समभवन्नारामश्रीविभूषणम् ॥५०॥
अकूजन् कोकिलाश्चारु स्वरं गायन्त्य इवोच्चकैः ।
पञ्चमानि वनलक्ष्मी-वसन्तोत्सवमङ्गले ॥५१॥
भ्रमन्तः पुष्पेषु पुष्पेषु पुष्पधूमापकारिणः ।
झङ्कारान् प्रथयामासुर्मन्दं मन्दं मधुव्रताः ॥५२॥
लसत्परिमलस्तोममूर्च्छितालोपदिङ्मुखा ।
वने पल्लवपुष्पाली स्मरराज्यमदीपताम् ॥५३॥
विश्वं विश्वमिदं तस्मिन् पुष्पकाले प्रसर्पति ।
व्यापन् मधुमादयमिव देहेऽभितस्तदा ॥५४॥
तस्मिन्नवसरे लोकपरीवारोपरोधतः ।
अगादुद्यानलक्ष्म्यावलोके क्षितिपतिः प्रभुः ॥५५॥
स्वामी पश्यंस्ततस्तत्र बहुरूपसमपल्लवान् ।
चिरमक्रीडदारामे विहंगा इव नन्दने ॥५६॥
विचरंस्तत्र शुभ्रामपरपुष्पालिमालितम् ।
मध्यस्थं च महारम्यं प्रासादं प्राविशत् प्रभुः ॥५७॥
चित्रकाचितं नेमिचरित्रं तत्र भित्तिषु ।
तल्लीनलोचनद्वन्द्वः प्रैक्षिष्ट भगवानिति ॥५८॥
यदुवंशशिरोरत्नं दीपकः कुलपद्मयोः ।
त्यागाद् गुणपद्माश्रयं कन्यां राजीमतीं तथा ॥५९॥
भोगार्थमभ्यर्थितोऽपि यदुभिः केशवादिभिः ।
तपस्यामाददे मुक्तिकामिनीसक्तदूतिकाम् ॥६०॥
इत्यैक्षिष्ट प्रभुर्नेमिचरित्रं चित्रकृच्चिरम् ।
चित्ते च चिन्तयामास स्मरकुञ्जरकेसरी ॥६१॥
कोऽप्यहो ! अद्भुतः प्रभावभारस्तस्य नेमिनः ।
वयसि प्रथमे दीक्षां यः संवेगादुपाददे ॥६२॥
इति ध्यायंश्च पश्यंश्च चरित्रं तद् मुहुर्मुहुः ।
अभूद् विमुखोऽस्य भोगकर्मा महाशयः ॥६३॥
तदैवास्य ब्रह्मलोकाद् लोकान्तिकाः सुरोत्तमाः ।
सारस्वतादयः सद्यः प्रोचुः प्राञ्जलयः प्रभुम् ॥६४॥
चिरं नन्द चिरं नन्द चिरञ्जय चिरं जय ।
भूयाद् भद्रं विभो ! तुभ्यं तुभ्यं भूयाद् नमः प्रभो ! ॥६५॥
स्वयंबुद्धोऽसि विभो ! मोहमल्लमर्दनकर्मठः ।

भानुरिवान्धतमसघोरणीध्वंसधूर्वहः ॥६६॥
प्रतिबुध्यस्व भगवंल्लोकालोकप्रकाशक ।
तीर्थं प्रवर्त्तय प्रौढप्रभावं प्राणिपालकम् ॥६७॥
ज्ञानत्रयधरः स्वामिन् ! सर्वं वेत्सि स्वयं सदा ।
तथापि हि वयं स्थित्यधिकारात् तेऽभिदध्महे ॥६८॥
एवमुक्त्वा च नत्वा च स्वस्थानं ते ययुः सुराः ।
भगवानप्यगात् सायं वेश्म संवेगरङ्गितः ॥६९॥
अथ तस्यां त्रियामायां भावयन्निति भावनाम् ।
समयान् गमयामास पल्यङ्कस्थोऽश्वसेनभूः ॥७०॥
कषायैः क्रोधप्रमुखैः कलुषीकृतचेतसः ।
पतन्ति भवकूपेऽस्मिन्नुत्पथ्या इव देहिनः ॥७१॥
जात्यादिकमदोन्मादैर्भ्रमद्भिर्भवचत्वरे ।
जीवैर्नटैरिव स्पष्टं नानारूपैर्विडम्ब्यते ॥७२॥
सेव्यमानोऽपि विषयग्रामः संसारिणामिह ।
जायतेऽत्यन्तं तृष्णायै पीतं क्षारमिवोदकम् ॥७३॥
कामोऽपि वामधीधाम धर्माध्वं घ्नमङ्गिनाम् ।
राजेवान्यायसंनिष्ठ आद्दाति पदे पदे ॥७४॥
क्षान्त्यादिभिः कषायाणां जयः स्यादिह देहिनाम् ।
उपशान्तिर्घनैरेव महारण्यहविर्भुजाम् ॥७५॥
योज्या मदेषु सर्वेषु कृतिभिर्निरहंकृतिः ।
मदानां हि जये सैवालंकर्मीणा शरीरिणाम् ॥७६॥
एवं भावयतस्तस्य भावनां जगदीशितुः ।
भोगबुद्ध्या समं रात्र्या व्युपरेमे क्षणादपि ॥७७॥
सदामोदोल्लसल्लीलालीनमानसवृत्तिषु ।
वन्दिवृन्देष्विवामन्दं प्रकूजत्सु षडङ्घ्रिषु ॥७८॥
भर्तुरिन्दोर्दाररात्रिक्षसम्भोगनिर्वृतेः ।
वियोगात् पतितेष्विव लक्ष्म्यास्ताराश्रुबिन्दुषु ॥७९॥
उद्यन्तं भुवनोद्योतकृते विश्वगुरुं तदा ।
विवन्दिषुरिवार्हन्तमुदीयाय दिवाकरः ॥८०॥
बोधितस्तूर्यनिर्घोषैर्मागधैर्वन्दिभिः पुनः ।
कन्दरोदरतः सिंह इवोदस्थात् स तल्पतः ॥८१॥
ततः पार्श्वप्रभुर्वादं निर्बन्धकनिबन्धनम् ।
प्रतिबोध्य परीवारं प्रारेभे दानमाब्दिकम् ॥८२॥

इन्द्राणामनुवर्त्यादि यथेच्छ चारचमानिमिति ।
विश्वाधारस्त्रार्हे स्वामस्तुदुपायामकारयत् ॥८३॥
स्वान्द्रिप्रमापात्रप्रोक्ता कृतमता तुरा ।
मिपार्डे पूर्वमासुपेन्द्रा नहर्षातिनु ॥८४॥
यथेद मनुमार्गमागतः पर्यमन्दरः ।
प्रभावयत् प्रतिपर्णसम्वायं नुन्दाभिपत् ॥८५॥
सतान द्वीःस्थं तावामां यथेच्छं वपद्धत प्रभोः ।
मरणम इव दावाग्निः प्रपत्तः पनामुच ॥८६॥
आभोजनतरम सूर्योऽस्तात् त्रिजगता पतिं ।
अष्टमार्पिपत्रामेना चाहि देवीमदान स्वयम् ॥८७॥
वीणि पर्विद्यानाम्प्रशस्तानिरमधेय चारण ।
नाना अशीति स्वर्णानामरः दानमभूद् विभोः ॥८८॥
दानान्ते ज्ञाननाधैज्ञानपत्नामदन्तशयाः ।
हेमुर्णारचलानिमन्नाः नद्वेवा पांशपतानसमाः ॥८९॥
स्वर्णादिवस्तुनिमिति पुरुषंस्तोपोस्पुगमभूतः ।
महापामानुरत्नामन्दविधानथा विभुम् ॥९०॥
स्पूर्णे इव चार्ट नाविकाटेधिद्विषधानली ।
सुदिता मपवानोऽथ स्वामिनं वर्धापयत् ॥९१॥
अङ्गोपाङ्गाद्यलंकारान् कोटीगर्भान् यथोचितम् ।
चन्द्रशैर्विभिनम्बन्द्रा रक्षचामागुरदंतः ॥९२॥
अभ्यसेनाऽपि भूमर्णां लीनवद्वनुमारत. ।
सूर्यास विजगद्भमनुपकं निष्क्रमणोत्सवम् ॥९३॥
वेपचार विशालाक्षां पिशालां शिविकामथ ।
प्रतिबिम्बमिवात्मीयमानमधामरस्त्रिपः ॥९४॥
नरिद्धां मनुजैरार्द्धा तदनु त्रिदशोश्वरैः ।
नामावरोह सं स्वामी पिशालां शिविकामथ ॥९५॥
द्दग्नतहिमजगज्जनां स्वर्णरममयीनिर्मितम् ।
सिंहासनमलङ्चकं मेरुमाथामिव प्रती ॥९६॥
जं सम्मूपरि च्छत्रं पार्वणन्दुनिभं शुभम् ।
पाश्यसी भुवनच्छत्रं सूचयन् जगतामिति ॥९७॥
स्वस्तकार्द्वे चकासाते चामरे पार्श्वपार्श्वयोः ।
पिण्डीभूयाभितो धर्मशुक्लध्याने इवागते ॥९८॥
सुरासुरनराधीशगर्भणच्छत्रिपमतः ।

वन्दिवृन्दैरिव प्रोच्चैः कृते जयजयारवे ॥९९॥
सधारिधारिवाहालीगर्जितैरिव सर्वतः ।
वर्यतूर्यैश्च बाधिरीकृतभुवनकोटरैः ॥१००॥
वाराणसीपुरीमध्यं मध्येन त्रिजगद्गुरुः ।
चचाल शिबिकारूढः कुलस्त्रीगीतमङ्गलः ॥१०१॥
सिन्धुरस्कन्धमारूढश्चामरच्छत्रशोभितः ।
अश्वसेनोऽन्वगाद् मार्गं ग्रामं यान्तमिवातिथिम् ॥१०२॥ (पु
वदा च भगवन्तं तं गच्छन्तं पुरवर्त्मनि ।
महाश्चर्यमिवायातं द्रष्टुं पौरैः प्रचक्रमे ॥१०३॥
केचिदारुरुहुः सौधमूर्धानं तद्दिदृक्षया ।
शीतार्ता द्रुमादिरयं वृक्षाग्रं वानरा इव ॥१०४॥
केचिच्च मण्डलीभूय भूयांसः पुरतः प्रभोः ।
चकोरा इव शशिनं पश्यन्ति स्म जिनाननम् ॥१०५॥
कौतुकोत्कण्ठिताः केऽपि स्वामिनः पार्श्वयोर्द्वयोः ।
अग्मुः स्यन्दनस्तुरगारूढा अनुचरा इव ॥१०६॥
केचिद् दधाविरे भर्तुः पृष्ठे चरणचारिणः ।
पश्यामो यममेमं भूयेनमितिबुद्धयः ॥१०७॥
नगरानागराः सर्वेऽप्यनुस्वामिनमन्वगुः ।
द्वीपाद् द्वीपान्तरं यान्तं भास्वन्तमिव रश्मयः ॥१०८॥
तदैव विस्मयस्मेरलोचनाश्चललोचनाः ।
तादृशं जगतामीशं निध्यातुमुपतस्थिरे ॥१०९॥
काश्चिद् दधाविरेऽर्हन्तं द्रष्टुं कटिकृतार्भकाः ।
वानर्य इव मालिकलोकहृत्कारमीरवः ॥११०॥
पश्यन्त्यः काश्चिदप्यर्हन्मुखं चपलचक्षुषः ।
अभ्यभूषन् समस्ताक्षगोचरानक्षितोत्तरान् ॥१११॥
स्वामिनो दर्शनोत्कण्ठोत्कण्ठाः काश्चन मृगीदृशः ।
खेचर्य इव विमानेऽध्यारोहन् सौधमूर्धनि ॥११२॥
काश्चिच्च प्रलम्बितग्रीवा गवाक्षाग्रेण सुभ्रुवः ।
मौक्तिकैर्हारपतितैर्नाथं लाजैरिवार्चयन् ॥११३॥
काश्चिद्गासुरसौरभ्यपुष्पाणां प्रसृतीः प्रभुम् ।
प्रत्यमुञ्चन् कटाक्षाणामिव सञ्चितयोरणीः ॥११४॥
काश्चित् तद्दर्शनप्रेम्णा स्थित्वा रूपाणि वेश्मनः ।
स्तम्भे स्तम्भे तत्पुरतश्चैव लिखिता इव ॥११५॥

अश्वीयमिव वल्गद्भिरिव दुर्दान्तशिशुभिः ।
वाजिभिश्चोत्थितं चारुर्वधाना निरगुर्मुदाम् ॥११६॥
वाजिन् कस्तूरिकारक्तैरभिरम्या मणिदामना ।
विरेजुः परितो वाद्यस्वनावर्णवजा इव ॥११७॥
एवं पौरस्त्रियः स्वामिनिर्वर्णनपरायणाः ।
चिरचुर्विविधां चेष्टां चापल्यं विस्मयावहाम् ॥११८॥
गीयमानो बन्दिवृन्दैरनूपमान सुरासुरैः ।
ईक्ष्यमाणोऽभिरामाभिरर्च्यमानोऽम्बुजाक्षिभिः ॥११९॥
चिरं जय चिरं जीवेत्याशीर्भिः परिवन्दितः ।
विस्तीर्णगगनगुञ्जत्सुरासुरपरंपरः ॥१२०॥
अनुपमाद्भुतमुद्यानं ज्ञातखण्डवनम् ।
जगाम त्रिजगन्नेता जिघृक्षुः संयमश्रियम् ॥१२१॥

(त्रिभिर्विशेषकम्)

अशोकतरोर्मूले शिबिका सा सुरासुरैः ।
मुमुचे प्रभुरप्यस्या उत्ततार रथादिव ॥१२२॥
तानि मन्दारमाल्यानि रत्नाद्याभरणानि च ।
मुञ्चति स्म स्वयं स्वामी कषायविषयानिव ॥१२३॥
धवलद्युतिधवलघनेव दूषितं प्रभोः ।
स्कन्धे न्यधाद् देवदूष्यं स्वयं देवविभुस्तदा ॥१२४॥
शीर्षमासस्यासितायामेकादश्यां शुभे क्षणे ।
पूर्वाह्णे विपिनाच्छायायां स्थिते कुमुदिनीपतौ ॥१२५॥
कृते जयजयारावे कृताष्टमतपाः प्रभुः ।
पञ्चभिर्मुष्टिभिः केशानुच्चखान मदानिव ॥१२६॥
देवेन्द्रोऽप्यथ तान् स्वामिकेशानादाय सत्वरम् ।
क्षीरोदधौ निचिक्षेप स्वकीयैः पातकैः समम् ॥१२७॥
पुनरागत्य सौधर्माधिपतिः पार्श्वसन्निधौ ।
ऊर्ध्वीकृतकरः कोलाहलं तं निरवारयत् ॥१२८॥
कृतसिद्धनमस्कारो नाथस्त्रिजगतामथ ।
सकलसावद्ययोगप्रत्याख्यानमुदाहरत् ॥१२९॥
चारित्रमुररीचक्रे समक्षं सुरलोकिनाम् ।
तदैवाजनि शर्मा तिर्यग्नारकाणामपि क्षणम् ॥१३०॥ (युग्मम्)
तदैव दीक्षयाऽकस्मात् संकेतितमिव द्रुतम् ।
तुर्यं ज्ञानं विभोर्जज्ञे मनःपर्यायसंज्ञकम् ॥१३१॥

तदा च नृपपुत्राणां स्वामिसौहार्दशालिनाम् ।
शतत्रयमुपादत्त दीक्षां संवेगवेगतः ॥१३२॥
उरिकरीटाः किरीटाग्रसंलग्नकरकुड्मलाः ।
नत्वाऽर्हन्तमिति स्वर्गस्वामिनः स्तुतिमुज्जगुः ॥१३३॥
नाथ ! त्वत्स्तुतिमयोऽमूं के वयं स्वल्पमेधसः ! ।
तथापि कुर्महे भक्तिसंभ्रमेरितचेतसः ॥१३४॥
नमः संसारनिस्तारपथतमःप्रदीपक ! ।
त्रसानां स्थावराणाञ्च जन्तूनां जनकाय ते ॥१३५॥
श्वभ्राद्यसह्यदुःखानां बीजमप्रत्ययाह्वयम् ।
मृषावादं त्यक्तवते तुभ्यं भगवते नमः ॥१३६॥
अदत्तं दुःखप्रबलं शम्बलं नरकाध्वनः ।
अनादत्तवते तुभ्यं नमोऽस्तु त्रिजगत्पते ! ॥१३७॥
अतथ्यपथ्यपथिकमन्मथोन्माथकारिणे ।
अखण्डितब्रह्मचर्यचर्याचर्याय ते नमः ॥१३८॥
धनधान्यादिं नवधा परिग्रह भवग्रहम् ।
नित्यं मुक्तवते भूयाद्भूयो भगवते नमः ॥१३९॥
महाव्रतानां पञ्चानां भारनिर्वाहधूर्वह ! ।
लोकालोकप्रकाशैकभास्वते भवते नमः ॥१४०॥
संमतीः पञ्च पञ्चानां व्रतानां सुस्थितीरिव ।
गुणरत्ननिधानाय बिभ्रते भवते नमः ॥१४१॥
शुद्धध्यानैकमनसे वचःसंवरधारिणे ।
कायचेष्टां त्यक्तवते नमस्तुभ्यं जगद्गुरो ! ॥१४२॥
पञ्चस्वपि विषयेषु सुभगाऽसुभगेष्वपि ।
निर्विकल्पमनस्काय तुभ्यं महात्मने नमः ॥१४३॥
ज्ञानदर्शनचारित्ररत्नत्रयश्रियं ध्रुवम् ।
लोकोत्तरगुणाधारां तुभ्यं श्रितवते नमः ॥१४४॥
औदार्यधैर्यगाम्भीर्यचातुर्यादिगुणावलीम् ।
अलङ्कारमिवानर्घ्यं तुभ्यं धृतवते नमः ॥१४५॥
त्रिवर्गाणि यद्गेहवासेऽभ्यास्तानि ते प्रभो ! ।
धर्म्यकर्मभयान्यासप्रच्छाद्धेष्टचेतसः ॥१४६॥
इत्थं स्तुत्वा जगन्नाथं सौधर्माद्या दिवौकसः ।
कृतनन्दीश्वरद्वीपयात्रा जग्मुर्यथागतम् ॥१४७॥
दशोः क्षरद्भिः कपोष्णैर्बाष्पैः प्लावितभूतलः ।

धन्य ! धन्योऽसि लोकेऽस्मिंल्लोकेषु सकलेष्वपि ।
भावतो विदधे येन कृत्यमत्यद्भुतं त्वया ॥१६५॥
ईदृक्पुंरत्नचरणरेणवोऽप्यतिदुर्लभाः ।
तवाङ्गणमलंचक्रे सोऽसौ हंस इवाम्बुजम् ॥१६६॥
धन्यः सोऽगण्यपुण्यानां निधिरेवं प्रशंसितः ।
मानितो भूभुजा जज्ञे संमतः पुरवासिनाम् ॥१६७॥
धन्योऽपि पारणास्थाने प्रभुपादपवित्रिते ।
रत्नैरबन्धयत् पीठं विन्यस्तप्रभुपादुकम् ॥१६८॥
विजह्रेऽथ जगन्नाथस्ततो विहितपारणः ।
वायूनामिव साधूनां नैकत्रावस्थितिर्भवेत् ॥१६९॥
सहन् परीषहान् सर्वांस्तिर्यग्नरसुरैः कृतान् ।
कादम्बरीमरण्यानीमभ्यगादन्यदा प्रभुः ॥१७०॥
कायोत्सर्गेण तत्राथ तस्थौ कलिगिरेरधः ।
कलिकुण्डसरस्तीरे तत्र रूढ इवेशिता ॥१७१॥
इतः प्रोत्फुल्लपाथोजरम्ये तत्र सरोवरे ।
महीधरः सिन्धुरेन्द्रः पयःपानार्थमाययौ ॥१७२॥
तत्र नासाग्रविन्यस्तनयनं नयनोत्सवम् ।
प्रभुं प्रेक्ष्य द्विपः प्राप जातिस्मरणमात्मनः ॥१७३॥
तथाहमभवं क्वापि पत्तने कुलपुत्रकः ।
उपहास्यास्पदं पुंसां कुब्जाङ्गो हेमलाभिधः ॥१७४॥
कुटुम्बेन पराभूतो निर्गतो गेहतोऽन्यदा ।
अनाथ इव संभ्रमन् प्रापं न क्वापि निर्वृतिम् ॥१७५॥
पर्यटन् सुप्रतिष्ठाख्यसुहृदन्तिकमभ्यगाम् ।
तोषितोऽहं च तेनापि वचनैरमृतोपमैः ॥१७६॥
समये सममुना सभायां गुरुसंनिधौ ।
धर्मोऽभ्यधाय्यधर्माद्विरमणं गुरुणाऽपि मे ॥१७७॥
तदन्तिके साधुधर्ममादित्सुरभवं तदा ।
प्रत्यवादि पुनस्तेन सूरिणा पुण्यधारिणा ॥१७८॥
भद्र ! कुब्जस्य ते नास्ति यतिधर्मस्य योग्यता ।
अतस्त्वं प्रतिपद्यस्व धर्मं श्राद्धजनोचितम् ॥१७९॥
तत् श्रुत्वा कुब्जतां निन्दन् साधुधर्मविरोधिनीम् ।
इत्थं प्रकर्षेणाकार्षमात्मसाद् धर्ममार्हतम् ॥१८०॥
आराधयं श्राद्धधर्मं यथाशक्त्यहमन्वहम् ।

अपश्यन् भुवनाधीशं धराधीशोऽतिखिन्नवान् ।
प्रभुकृतकमन्यासोपरिविन्यस्तमस्तकः ॥१९८॥
तस्य खेदापनोदाय नागेन्द्रोऽथ जिनेशितुः ।
नवहस्तमितां हस्ते प्रतिमां बिभ्रदभ्यगात् ॥१९९॥
साक्षात् प्रभुमिव प्रेक्ष्य प्रतिमां प्रतिमामिमाम् ।
भूपः प्राप परां प्रीतिं भुवनैश्वर्यभागिव ॥२००॥
चारुभिश्चान्दनाम्भोभिः कुसुमैश्च सुगन्धिभिः ।
पूजयित्वा परप्रीत्या ववन्दे प्रतिमां नृपः ॥२०१॥
तथाऽत्र भूभुजा तेन चैत्यं प्रोत्तुङ्गमर्हतः ।
कारितं यशसां पुञ्जमिव पिण्डितमात्मनः ॥२०२॥
अथ सा प्रतिमा तत्र प्रासादे प्राप्ततोरणे ।
न्यधायि क्ष्माभुजा तेन साक्षादिव हृदि प्रभुः ॥२०३॥
महाप्रभावा जैनेन्द्री प्रतिमापि हरी नृणाम् ।
समाराधयतां स्वान्ताऽभीष्टं कल्पलतेव सा ॥२०४॥
प्रासादे तत्र हस्तीन्द्र स समागत्य नित्यशः ।
विन्यस्तमस्तकः पार्श्वप्रतिमां प्राणमत् सदा ॥२०५॥
तीर्थेऽस्मिन् भक्तिभाक् कुम्भी स मृत्वा व्यन्तरोऽजनि
महातीर्थस्य तस्यैवाधिष्ठायकः प्रभाववान् ॥२०६॥
आसन्नत्वात् कलिगिरिकुण्डयोरेतयोस्तदा ।
तत्तीर्थम[illegible] कलिकुण्डमिति श्रुतम् ॥२०७॥
[illegible] परमेश्वरः ।
[illegible] पत्रे प्रमात् ॥२०८॥
[illegible] श्रितगद्गुरु ।
[illegible] धुरन्धर. ॥२०९॥
[illegible] प्रभुः ।
[illegible] ॥२१०॥
[illegible]

मृगारातिरिवौजस्वी विजहार ततो वनात् ॥२१४॥
वत्सोऽपि प्रभोर्मौक्तिमेवं कृत्वा दिनत्रयम् ।
आससाद मित्रं स्थानं कार्याऽऽयात इवातिथिः ॥२१५॥
तत् श्रीपार्श्वनाथस्य प्रौढप्रासादशोभिता ।
आदित्यश्रेति विख्याता पुरी साऽभूद्भुवस्तले ॥२१६॥
भगवान् विचरन् प्राप पुरं राजपुरं क्रमात् ।
सुमेरुरिव निष्कम्पस्तत्र प्रतिमया स्थितः ॥२१७॥
इतस्तत्रनगराधीश ईश्वरो मनुजेश्वरः ।
ससैन्यस्तुरगारूढः क्रीडार्थं निर्ययौ पुरात् ॥२१८॥
गतः क्रमात् स भूस्वामी स्वामिनालङ्कृतां भुवम् ।
इतस्तद्वृषभिनाऽभाणि केन चित् पश्यता प्रभुम् ॥२१९॥
पश्यैतो देव ! देवेन्द्रवृन्दवन्दितपङ्कजम् ।
अश्वसेनसुतं पार्श्वजिनं प्रतिमया स्थितम् ॥२२०॥
तेनेरयुक्तः क्ष्माजानिः पार्श्वे पार्श्वप्रभोर्ययौ ।
स्फारितास्यः पपौ पार्श्वदर्शनं तु सुधामिव ॥२२१॥
असौ त्रिजगतामीशः श्रुतोऽयत्र च जन्मनि ।
इति ध्यायन् धराधीशो मूर्च्छितो न्यपतत् क्षितौ ॥२२२॥
कृतोपचारो दक्षैः सजलैः कदलीदलैः ।
जातिस्मृत्या समं लेभे संज्ञां वसुमतीपतिः ॥२२३॥
अथावनतसञ्जातजातिस्मृतिरिलापतिः ।
अस्मरद् दर्शनादस्य प्राचीनं चरितं मम ॥२२४॥
ततः परिजनः प्रोचे कीदृक् त्वच्चरितं विभो ! ।
स्वामीवेत्सुदितः प्राह भूपः प्राक् चरितं निजम् ॥२२५॥
दत्तनामाऽभवद् विप्रः श्रीवसन्तपुरे पुरा ।
ज्योतिर्वाङ्मयविद्यानां सदःसदनमण्डनः ॥२२६॥
अथ तस्याऽभवत् कुष्ठरोगो दुष्कर्मयोगतः ।
विमर्दं तत्पुरस्तेन मधुनेव पयोधरः ॥२२७॥
दैवज्ञोऽप्येव कुष्ठेन विनष्टोऽनिष्टतां गतः ।
सत्त्रभिः श्वेव न प्राप प्रवेशमपि कुत्र चित् ॥२२८॥
परिवारोऽपि तं तादृग्वर्णं निर्वर्ण्य वाढयम् ।
तस्मिन् मैवादरं चक्रे शुष्के वृक्षे इवाण्डजः ॥२२९॥
दत्तो दत्तापमानं स्वं कुटुम्बं वीक्ष्य दुःखितः ।
न लेभे चेतसं स्वास्थ्यं घर्मोत्तप्त इवाध्वगः ॥२..

गृहान् निष्काशितो दुष्टकुष्ठक्लिष्टवपुस्ततः ।
स ग्रासमात्रमप्यन्नं अरन् गौरिव नाप्तवान् ॥२३१॥
एवं तद्रोगसंयोगोद्विग्नोऽसौ वाडवाग्रणीः ।
वल्लभानप्यवाशासीत् प्राणानात्मरिपूनिव ॥२३२॥
अन्यदाऽसौ निजप्राणपरिहारपरायणः ।
धर्मबुद्ध्याऽभ्यगाद् गङ्गातीरं निष्पापमृत्यवे ॥२३३॥
स यावज्जाह्नवीं प्राप वाढवारितरङ्गिताम् ।
अनुज्ञाप्य प्रवेशार्थमुत्सुकोऽजनि तज्जले ॥२३४॥
तावत् केनापि स व्योमचारिणा भिक्षुणा क्षणात् ।
ददृशे शुक्लतारामसारणीसदृशा दृशा ॥२३५॥
प्रोचे च यतिना भद्र ! कथं पतसि वाधसि ? ।
पालेन मृत्युनाऽनेन दुःखावाप्तिः शरीरिणाम् ॥२३६॥
स्वस्मिन् कुष्ठेन रोगेण गतं विद्यादिकं मम ।
तद्विना किं तृणप्रायैः प्राणैः संरक्षितैः खलु ॥२३७॥
एष स्वर्गाद्विनीर्याहस्तीर्थे त्रैलोक्यपावनम् ।
स्पर्शोऽप्येतस्य तोयस्य हन्ति दुःखान्यनेकशः ॥२३८॥
अतस्तीर्थेऽत्र दुष्कर्ममर्मवारिणि वारिणि ।
निपत्याहं करिष्यामि सफलं जनुरात्मनः ॥२३९॥
तेनेत्युक्तः पुनः प्राह ब्राह्मणं श्रमणोत्तमः ।
छलेनापि हि गङ्गायां किं मुधा मृत्युनाऽमुना ? ॥२४०॥
जरामरणदौर्गत्यदुःखादेर्दिव्यमौषधम् ।
विधेहि धर्मं सार्वज्ञं सर्वज्ञभिषजोदितम् ॥२४१॥
किं तद्रोगापहं दिव्यं भेषजं भिक्षुपुङ्गव ! ? ।
इत्युक्ते तेन वाडवे तत्पुरो धर्ममाहतम् ॥२४२॥
तत्पार्श्वे श्रद्धया श्राद्धधर्ममङ्गीचकार सः ।
साधुः सोऽपि ययौ व्योममार्गेणान्यत्र पत्रिवत् ॥२४३॥
तं धर्मं विधिवद् नित्यं स विप्रः परिपालयन् ।
अर्च्यपुरागमद् देवदम्भनार्थं जिनौकसि ॥२४४॥
अर्हतां प्रतिमास्तत्र प्रणम्यातिप्रमोदतः ।
बहिरस्था च मुनीन्द्रस्यो स यावद् मुनिसन्निधौ ॥२४५॥
तावत्तत्राश्रये तत्र श्रावकः पुष्कलोऽपि च ।
आयातः स मुनिं नत्वा यथास्थानं निषण्णवान् ॥२४६॥
अथैनं मुनिं दृष्ट्वोपविष्टं तावतिप्रये ।

अप्राक्षीत् पुष्पकः श्राद्धः साधुं मधुरया गिरा ॥२४७॥
स्वामिन्नसौ द्विजः कुष्ठविनष्टो जिनपद्मनि ।
पञ्जिनाद् यन्दतेऽस्यैतस्ताऽद्भुतं वाच्यताऽधमम् ? ॥२४८॥
पुनः प्राह गुनिः श्राद्धे रोगवानप्यसौ द्विजः ।
यद् देवान् वन्दते देवगृहद्वारगतां स्वजन् ॥२४९॥
नैव सापप्रपातस्य योग्योऽमुष्य सदा भवेत् ।
समन्ति पञ्जिनाद् मध्धिपाङ्गा अपि भिक्षुकाः ॥२५०॥
तस्मिन्दया दुष्कृतं मूपाद् यद्वस्याज्ञातमां व्यधात् ।
इति श्रुत्वा प्रथमं पोषियावत् पुष्कलः पुनः ॥२५१॥
का गतिर्भाविनी स्वामिन् ! मृतस्यास्य द्विजन्मनः ? ।
एवं तेनोदितमाचीस्युदीर्णे च मुमुक्षुणा ॥२५२॥
निषद्भमायुरद्युना तिर्यग्योनौ द्विजन्मना ।
तेनाप्ये कुर्कुटो भावी विपत्तो भवान्तरे ॥२५३॥
वाचं वाचंयमस्यैव सामीपीनां निशम्य सः ।
राजपनेव ययौ गेहे श्रावितुःखेन दुःखितः ॥२५४॥
अतिथिं प्रभुपौणं ब्राह्मणं श्रमणोऽब्रवीत् ।
भो भद्र ! त्वं मः कार्यिनोऽन्यथा कर्मणो स्थितिः ॥२५५॥
इत्थं निभ्रम्य कथितैर्वचोभिश्चतुरोत्तम ।
स प्रोच प्रतिभूं गुरोः कदा मे बोधिरुत्तम ? ॥२५६॥
अत्यत्याह ज्ञानपारीयो ब्राह्मणं स प्रमाधवः ।
इतो मृत्वा राजपुरे लाघ्नपुरो भविष्यसि ॥२५७॥
तत्रापि भविता जातिस्मृतिर्जिनरे गुणिदर्शनात् ।
विपाकवामराणं पातं ततो मरकमाप्स्यसि ॥२५८॥
श्रुत्वा तथैव भपी स्वमीश्वतस्वः स्थितीश्वरः ।
सदृशा शुभ्या च दर्शिनः दुपूर्व स्थावरः ॥२५९॥
अन्येद्युः शीद्रनाथोऽदर्शदथा निर्गतः पुरात् ।
तपोधिनो जिनं पार्श्वे तदिधवासे च द्रष्टवान् ॥२६०॥
दर्शने दर्शनीयस्य तस्य दृष्ट्वा समन्ततम् ।
तत्क्षणे संमूर्छितो जातिस्मरत्वं चाप्यं मतेः ॥२६१॥
तत्रैव ते महाभाग ! भावी भवदवस्थमद्भुतः ।
एवं तद्वचनैरनुस्मृतिभिर्बुद्धि द्विजोऽभजत् ॥२६२॥
सोऽहं निर्वर्ण्य निर्बन्धंचुलं कार्तिन्दनश्वरम् ।
अत्यर्थं पूर्वकृतानां कर्मणोऽत्रैव दुःखम् ॥२६३॥

इति व्याहृत्य वसुधानाथो नाथमपूजयत् ।
व्यहरद् विभुरन्यत्र मित्रे शत्रौ च तुल्यदृग् ॥२६४॥
ईश्वरोऽपि हि तत्स्थाने तुङ्गं चैत्यमकारयत् ।
बिम्बं च पार्श्वनाथस्य न्यधात् तत्र महोत्सवैः ॥२६५॥
कुक्कुटेश्वरमित्याख्यं तत्तीर्थं प्रथितं भुवि ।
पुरं तदपि विख्यातं कुक्कुटेश्वरमित्यभूत् ॥२६६॥
गजेन्द्र इव शौण्डीरः स्वशरीरेऽपि निर्ममः ।
मौनवान् मुनिनाथः स व्यचरत् पृथिवीतले ॥२६७॥
सुखे दुःखे च सदृशः क्रमेणो विहरन् विभुः ।
पुरासन्ने ययौ क्वापि तापसानां तपोवने ॥२६८॥
उदयोऽस्तं भवत्येव नित्यतेजस्विनामपि ।
ज्ञापयन्निति लोकानां तदैवास्तं ययौ रविः ॥२६९॥
तदा च हृदि निश्चाय विहारासमयं विभुः ।
कुम्भीवाऽभ्यगमत् तस्यासन्नं न्यग्रोधपादपम् ॥२७०॥
कूपोपकण्ठे न्यग्रोधाधस्ताद् विन्यस्तमन्मथः ।
तत्पाद इव निष्कम्पस्तस्थौ प्रतिमया प्रभुः ॥२७१॥
कज्जलश्यामलैरन्धकारैरन्धत्वकारिभिः ।
अमान्द्भिरिव निर्भुग्नं भूतं भुवनकोटरे ॥२७२॥
निशा निशाचरी श्यामाम्बराऽपुण्यजनप्रिया ।
भयङ्करी समभ्यागात् तद्देवोद्धतपद्धतिः ॥२७३॥
तारताराः स्वर्णचित्रा क्षौमपत्यसितं घनम् ।
तदा दिव्याम्बरा रेजे युवतीव विभावरी ॥२७४॥
गोमायवो रटन्ति स्म पर्यटन्तः पदे पदे ।
शार्दूलाः शम्बराः मत्ताः प्रगल्भाः पृथुका इव ॥२७५॥
मिथः स्फालितहस्तास्यस्पर्धिभूतगणाङ्गनाः ।
अनृत्यद् मण्डलीभूय भूपयो भूतपङ्क्तयः ॥२७६॥
इत्यस्यां निशि नानाप्रतीपक्षोभकृत्स्वपि ।
निद्रात्यागपरः स्वामी कायोत्सर्गेण तस्थिवान् ॥२७७॥
इतश्च कटकीर्तिः स मेघमाल्यसुरप्रभुः ।
स्मृतप्राग्भववैरोऽपश्यत् पार्श्वनाथं तथा स्थितम् ॥२७८॥
स प्राग्वैरं स्मरन् कोपाटोपाकुलोऽधमः ।
आगात् क्षोभयितुं पार्श्वमद्रिं मेरुमिवार्णवः ॥२७९॥
पार्श्वनाथपुरस्तस्य व्यादाय पञ्चास्यं च भूतकम् ।

त्रिलोक्यामिव प्रोच्चान् विचक्रे करिणोऽथ सः ॥२८०॥
हस्तिनस्तेऽथ हस्ताग्रैः स्वामिनं प्रेक्षुमुद्यताः ।
स्वर्गिरिं गौरिमागारं स्वशुण्डाभिरिवाण्डजाः ॥२८१॥
ममज्जुल्लाव्य शुण्डाग्रैः स्वामिनं पुष्पवासवत् ।
दन्ताग्रैस्त्विमोऽपहृताद् निपतन्तममधारयन् ॥२८२॥
इत्थं कदर्थितोऽश्मोर्मिभिः करिभिः परमेश्वरः ।
मर्यादामिव पाथोधिर्नोमुचद् ध्यानमञ्जसिम् ॥२८३॥
ततमसौम्यमर्हन्तं मायाऽप्यसृजदसुरः ।
त्यक्तोत् फूत्कारफूत्कारकारिणः फणिनः क्षणात् ॥२८४॥
सर्पास्तेऽपि प्रसर्पन्तः परितः परमेष्ठिनः ।
फणाफूत्कारपापुलैर्भापयन्तममायन् ॥२८५॥
भोगिनो भीमभोगास्ते भोगैर्भगवतो वपुः ।
निरंरं वेष्टयामासुः प्रकाण्डमिव चान्दनम् ॥२८६॥
प्रसरत्फूत्काराक्षीभिराशीभिर्मर्मणि प्रभुम् ।
दन्दशूका ददंशुरिव भूयो भूयो निरङ्कुशाः ॥२८७॥
अभीमिभिर्गौरिभिर्नायमक्षोभ्यं वीक्ष्य सोऽसुरः ।
पिशाचान् चित्रवीक्षकाराक्षिप्रकोपस्तलोपमान् ॥२८८॥
पुष्कराटदंष्ट्रोटपेंमवर्तीर्निर्मितैः पुनः ।
तेऽप्यीशं पीडयामासुरनु निर्भिन्नराशयः ॥२८९॥
आत्तुंग्ण इतासतेन पुनः क्षोभयितुं विभुम् ।
करालध्वान्तव्याडुंकृम्पालाचा अनेकशः ॥२९०॥
पतेंऽपि भगवत्यस्मिन् ध्यानमीलितचक्षुषि ।
पृथा संजज्ञिरे नादीस्तारा इव संयतो ॥२९१॥
प्रबन्धेन पुनः पापमालिना मेघमालिका ।
मेदुरैर्मुदिरैकाके श्यामलं गगनस्थलम् ॥२९२॥
कलीकाटपविस्फोटपटीयान् स्तनितध्वनिः ।
शुम्भत्तडीलवयुपिण्यालसोदरो श्यामलो दिशः ॥२९३॥
स्फुरितं विद्युता विद्युत् पटुभास्वत्तरकाया ।
पतितं करकैर्वज्रकर्करैरिव कर्करैः ॥२९४॥
अकूजत् कोकिलाः कामकेकाकोलाहलादिभिः ।
रटन्ति स्म मुखावासाः मौर्योपातकपोलकाः ॥२९५॥
फालरोलम्बकलहीर्देषु श्यामलं च दुर्दिनैः ।
पर्वतैरिव सरत्पयोधीविशालं समन्ततः ॥२९६॥

सम्भूतं तद्वनं सर्वं जलाद्वैतमिवाजनि ॥२९८॥
कूपाः कासारतां प्रापुर्गोष्पदाः कूपरूपताम् ।
नद्यश्च स्वर्णदीभावं कासाराश्च पयोधिताम् ॥२९९॥
सरिद्भावं च सारिण्यो ह्रदतां वनदीर्घिकाः ।
एवं मेघेषु वर्षत्सु पानीयैः प्रचुरैरिति ॥३००॥ (युग्मम्)
पतत् तत् सलिलं लोकानस्तोकान् प्लावयत् क्रमात् ।
कायोत्सर्गस्थितो भर्तुर्जानुदघ्नमजायत ॥३०१॥
ध्यानधामसमाधारस्य जगदीशितुः ।
क्रमतः कटिकण्ठाग्रं यावदेति स्म तत्पयः ॥३०२॥
तत्पाथःप्लावितवपुः शुशुभे परमं विभोः ।
अन्तर्लीनमृणालस्य कोशो किञ्जल्कजन्मनः ॥३०३॥
पानीयं पतति स्म तत् स्वामिनासाग्रमपि क्रमात् ।
चिरं तद् यद् भवाम्भोधौ निमग्नः सोऽप्युत्तरायमः ॥३०४॥
ध्यानरक्ताः स्फुलिङ्गनासाः परितः परमेश्वरम् ।
क्षणकाम्यमगाः ध्येयमध्येतुमिव भेजिरे ॥३०५॥
एवं विधीयमानेऽस्मिन्नुपसर्गे जगद्गुरो ।
नरनैवासनद् विश्वं विश्वमप्येतदाकुलम् ॥३०६॥
[illegible] कठिमानमभा ।
[illegible] जगद्भर्त्री मेदवत् धैर्यमानमून् ॥३०७॥
[illegible] दुःसहं संघर्षमुपसर्गमिमं विभो ।
[illegible] ॥३०८॥
[illegible] स्वामिनो [illegible] ।
[illegible] पार्श्वार्थमधारयत् ॥३०९॥
[illegible] स्वामिनो मूर्ति [illegible] ।
[illegible] ॥३१०॥
[illegible] ।
[illegible] ॥३११॥
[illegible] ।
[illegible] ॥३१२॥
[illegible] ।

मायाद् भोगीन्द्रभामिन्यः प्रभुभक्त्यै प्रचक्रमुः ॥३१३॥
ताः सद्यो गीतसङ्गीतसंगतं पुरतः प्रभोः ।
ताण्डवं मण्डयामासुर्महाडम्बरमम्बरे ॥३१४॥
इत्थं कुर्वति भोगीन्द्रे भक्तिं सद्भक्तिनिर्भरे ।
कठं तथोपसर्गेति सहगृहन् विधुरप्यभूत् ।३१५॥
तथापस्थापितं नाथं दृष्ट्वाऽसौ दुष्टचेष्टितः ।
कठः कठिनधारौघैः पयोऽमुञ्चत् पुनर्घनम् ॥३१६॥
यदा धाराभिर्मुशलमांसलाभिः प्रभूपरि ।
पतन्तीभिर्जगत्प्लावोपच्छायाभिर्न संस्थितम् ॥३१७॥
अवधिज्ञानतोऽज्ञासीत् तदा पन्नगपुङ्गवः ।
उपद्रवितुं प्रारब्धं कठेनातुच्छमत्सरात् ॥३१८॥ (युग्मम्)
इत्था परपयात् भोगिराजोऽवात् मेघमालिनम् ।
मूढ ! ब्रूपाय ते जज्ञे स्वामिनो हितवागपि ॥३१९॥
हितमप्यहितायाऽभूत् तद्वचोऽस्य विमोस्तव ।
न तच्चित्रं ज्वरार्तस्य यत् पयोऽपि विषायते ॥३२०॥
नरकाध्वनि पाथेयात् प्राणिप्राणप्रणाशनः ।
रक्षितः स्वामिनाऽनेन तदा त्वं दुर्धियो निधे ! ॥३२१॥
ईदृश उपकारैकरसिकेऽस्मिन् जगद्गुरौ ।
केयं तदा तव द्रोहमतिर्दुर्मतेरेव हि ॥३२२॥
एवमुक्तोऽपि भुजगप्रभुणा मेघमाल्यसौ ।
विरराम नाऽम्बुमुक्तेरपथ्य इव दुष्पथात् ॥३२३॥
भ्रकुटीभङ्गभीमाक्षः पुनः पन्नगपुङ्गवः ।
साक्षेपमिदमाचख्यौ वर्धन्तं मेघमालिनम् ॥३२४॥
कृपालोरस्य नाथस्य यद्यहं विदुरः खलु ।
न सहिष्ये क्षणमपि भवद्दुर्ललितं हृदः ॥३२५॥
इत्युक्तियुक्तिमाकर्ण्य दृष्ट्वा च त्रिजगत्पतिम् ।
कृतभक्तिं भोगिभर्त्रा दध्याविदमसुगुणः ॥३२६॥
अणीयसी क्व मे शक्तिः क्वाऽसौ मेरुरिव स्थिरः ।
[illegible]
[illegible]
[illegible]
इयामपि ममायासो संजातोऽस्मिन् जिने वृथा ।
अम्बुधिबिम्बितशीतांशुबिम्बग्राहे शिशोरिव ॥३२९॥

शत्रुमित्रतृणस्त्रैणमणिरेणुसदृग्मनाः ।
अस्ति यद्यपि विवेकवत्सलोऽसौ जगद्गुरुः ॥३३०॥
तथाऽप्यस्य जगद्भर्तुः पर्युपास्तिपरायणात् ।
ममास्ति भीतिर्भोगीन्द्राज्जीवितान्तविधायिनी ॥३३१॥
अतोऽमुत्र परत्रापि हिताय विहिताहितम् ।
अमुमेव श्रये श्रेयःशरणं शरणं विभुम् ॥३३२॥
मत्वैवं मेघमाल्येष संहृताम्भोदसंहतिः ।
अनन्यशरणः पार्श्वचरणौ शरणं श्रितः ॥३३३॥
स्वकीयागः क्षमयित्वा स्वस्थानं मेघमाल्यऽगात् ।
सर्पेशोऽपि प्रभुं नत्वा ययौ निजनिकेतनम् ॥३३४॥
उपद्रुतोऽयं नृदेवो नृदेवाऽसुरशेखरः ।
सत्यां मयीति खेदेन वाधिक्षम्पापरायणा ॥३३५॥
मायोपसर्गसंसर्गं निवारयितुमक्षमा ।
पतत्ताराश्रुकणिका क्षपाऽपि क्षयमाययौ ॥३३६॥ (युग्मम्)
यस्यां सत्यां विभोर्जाता उपसर्गाः क्व सा निशा ।
इतीव तच्चपेटायै करविस्तारणोत्सुकः ॥३३७॥
किंशुककाश्यपकल्पैरमल्पै रोचिषां चयैः ।
भुवं प्रकुर्वन् काश्मीरनीरकर्दमितामिव ॥३३८॥
उपसर्गप्रसङ्गाग्निसंतप्तध्यानकाश्रमम् ।
विधम्पिपुरिवार्हन्तमुदियाद्दिवाहर्मणिः ॥३३९॥ (त्रिभिर्विशेषकम्)
ततः प्रभातसमये रविणा पविते पथि ।
वायुरिवाऽप्रतिबद्धः प्रभुरप्यचलत् ततः ॥३४०॥
क्रमाद् गत्वा पुरीं काशिं काशिनायकनन्दनः ।
श्रयति स्माश्रमपदोद्यानं सिंह इवाभयः ॥३४१॥
तत्र शुक्लमनाः शुक्लध्यानाद्याधिगमाध्वगः ।
धातकीद्रुमाद्धाधस्ताद् ध्वस्ताध्वस्तविषयान् विभुः ॥३४२॥
क्षपकश्रेणिमारूढोऽधिरूढो ध्यानवर्त्मनि ।
प्रभुश्चिच्छेद दुर्दान्तघातिकर्मचतुष्टयीम् ॥३४३॥
परीषहान् सहमानो मूर्तिपन्निर्जरकृतान् ।
व्रतादाच्चतुरशीतिमह्नां मायोऽव्यवाहयत् ॥३४४॥
अथो निशीथिनीनाथे विशाखायामुपस्थिते ।
चैत्रासितचतुर्थ्यां च पूर्वाह्णेऽपूर्वसमये ॥३४५॥
कृताष्टमतपा लोकालोकार्थकमलोपमम् ।

केवलं ससाद ज्ञानं प्रभुः ज्ञानिशिरोमणिः ॥३४६॥ (युग्मम्)
विभिन्नस्ते विभोर्ज्ञानोत्सवं संकेतिता इव ।
आजग्मुः सर्वतः सर्वे वासवाः कम्पितासनाः ॥३४७॥
भोगस्पृहगतयो दर्पकन्दर्पप्रोज्झिताशयाः ।
स्वीयैः स्वीयैः परीवारैः परितः परिवारितैः ॥३४८॥
अन्येऽपि हि सुपर्वाणः स्पर्धमानाः परस्परम् ।
आयातास्ते च समवसरणायोग्यं व्यधुः ॥३४९॥
वैमानिकज्योतिषिकभवनाधिपव्यन्तराः ।
तत्र चक्रुः पुरः नाथस्याथ कार्याणि सत्वरम् ॥३५०॥
अथो सुधाशनाम्भोजनाम्भोजन्मस्ममाभुजः ।
पूर्वद्वारेण समवसरणं प्राविशत् प्रभुः ॥३५१॥
ततः प्रदक्षिणीकृत्य चैत्यद्रुं जगदीश्वरः ।
नमस्तीर्थाय तीर्थाय समधानः समो ह्यसौ ॥३५२॥
इति जयजयारावं सुरासुरनरेश्वरैः ।
चिरं जीव चिरं जीयेत्यप्सरोभिरुदीरिते ॥३५३॥
ततः प्राग्वदनः सिंहासनं रत्नविनिर्मितम् ।
अलंचक्रे धर्मचक्री चक्रबन्धुरिवाम्बरम् ॥३५४॥ (युग्मम्)
प्रभो रूपानुरूपाणि रूपाणि चापराण्यथ ।
व्यकुर्वन् व्यन्तरास्त्रीणि प्रभावः प्रभुमूर्त्तयो ॥३५५॥
संघस्तत्रागतस्तत्र सर्वतः सपरिच्छदः ।
पश्यन्तः स्वामिवक्त्राब्जं तस्थुः स्थाने यथोचिते ॥३५६॥
वनपालो निभाल्येति विभोर्वैभवमुत्तमम् ।
द्रुतः प्रविश्य स्वपुरीमश्वसेनमभ्यगात् ॥३५७॥
मस्तकन्यस्तहस्तोऽयमश्वसेनाय भूभुजे ।
यथाज्ञातं समवसृतेर्वृत्तान्तं समभ्यधात् ॥३५८॥
श्रुताऽप्येषाऽवनेर्नेतुर्वार्त्ताऽभूदमृतोपमा ।
यस्याः प्रभृतेः पुरतः शर्करा कर्करायते ॥३५९॥
अश्वसेनोऽपि तद्वाग्भिः प्रीतः पुलकितोऽभवत् ।
सिक्तोऽम्भोधरधाराभिरिव नीपावनीरुहः ॥३६०॥
तस्मै तुष्टाय तुष्टान्तःकरणो धरणीधवः ।
ददौ दानं मणिस्वर्णरूप्याद्यं पारितोषिकम् ॥३६१॥
विसृज्योद्यानपालं तं तं वृत्तान्तं यथाश्रुतम् ।
वामायै च प्रभावत्यै भूपोऽभिहितवान् स्वयम् ॥३६२॥

स्थाने स्थाने परिमुक्तमौक्तिकस्वस्तिकाङ्कितम् ।
मार्गे मार्गे शातकुम्भकुम्भोत्तम्भिततोरणाम् ॥२१३॥
गेहे गेहे धूपधूम[illegible]ितम् ।
हट्टे हट्टे [illegible]ताम्बराम् ॥२१४॥
त्रिके त्रिके [illegible]हारिणीम् ।
द्वारे द्वारे [illegible]मालिकाम् ॥२१५॥
एवं [illegible]कराम् ।
[illegible] काशीं काशीशिता पुरम् ॥२१६॥
(चतुर्भिः कलापकम्)

[illegible] ।
[illegible] ॥२१७॥
[illegible] ।
[illegible] ॥२१८॥
[illegible] ।
[illegible] ॥२१९॥
[illegible] ।
[illegible] ॥२२०॥
(चतुर्भिः कलापकम्)

[illegible] ।
[illegible] ॥२२१॥
[illegible] ।
[illegible] ॥२२२॥
[illegible] ।
[illegible] ॥२२३॥
[illegible] ।
[illegible] ॥२२४॥
[illegible] ।
[illegible] ॥२२५॥ (युग्मम्)
[illegible] ।
[illegible] ॥२२६॥
[illegible] ।
[illegible] ॥२२७॥
[illegible] ॥

धर्मचक्रं धर्मचक्रिलक्ष्म्याश्चिह्नमिव स्फुटम् ॥३७८॥
महत्स्वपि महात्मेभ्योऽत्यन्ताधिपत्यतैः ।
त्वत्पुरो विदधे स्वामित्वपर्यमिन्द्रध्वजो महान् ॥३७९॥
सार्वं भगवन् ! भवान् अंघ्रे दधद्गुरासनः ।
ध्यं धनुर्गतिमिदारसपादजस्याय सन् ॥३८०॥
स्तम्भेन कङ्केलिर्यस्तपल्लवशालितः ।
मथाश्रिव विभो ! कस्त्वं यद्गुणो नाऽभवद् मुदे ! ॥३८१॥
विभो ! त्वं कल्पद्रुच्छायः स्वर्णसिंहासनस्थितः ।
महतीन स्वास्थ्योदः सम्यगुदं व्यधाः ॥३८२॥
छत्रत्रयी मणिरत्नयुक्तैः रचिता विभो ! ।
भुवि भुवनैश्वर्यं त्रैलोक्यस्थिरमभ्युपगत् ॥३८३॥
छत्रत्रयी भवद्गुणैः पार्श्वेऽनुविभा व्यभात् ।
ज्ञानदर्शनचारित्रमयप्राभुर्यसूचिका ॥३८४॥
पदयचामरश्रेणी धवला पार्श्वयोस्तव ।
मुखाम्भोजदर्शनार्थं मरालालिरिवागता ॥३८५॥
देवदुन्दुभयो देव ! नदन्तो गगनाङ्गणे ।
त्वत्स्तुतिपरायणा जाता कोपादिवैरिणाम् ॥३८६॥
गन्धाम्बुवर्षणं दधान् तेनिरे स्वसुराः सुराः ।
मिथुन इव बोधिद्रुमुखःपरपल्लासये ॥३८७॥
पञ्चवर्णा पुष्पपङ्क्तिरवपतद् भवतः पुरः ।
स्वर्गेव बाणालिः पञ्चबाणेन त्यासमीयुषा ॥३८८॥
यं नुतिंयन्ततुरा नाटाकठमासरिणां मिथः ।
स्वरनन्दात् सुदर्शयन्त ते परस्परयरसत्ताः ॥३८९॥
कैवाद्मभुभनला यथा वृद्धि यान्ति विभो ! तव ।
आप्तो नासि: परिस्व यमायान् महिमा भुवि ॥३९०॥
अनुकूलेन्द्रियार्थ स्वामृतवो युगपत् समे ।
भवुः पद्मांयनिकाया इव वाणान् सन्तुष्टाः ॥३९१॥
पतरांतिदार्यस्मरिस्लातामिरिव चन्द्रमाः ।
केलितः प्रभो ! न कस्य दृष्टयांपुत्रे मयेः ! ॥३९२॥
नमस्ते ज्ञानविज्ञानप्रभाभारस्तोभिने ।
जगदेकविलक्षणवर्धातिशयशालिने ॥३९३॥
स्तुत्वेति मुनिमूर्धन्यं मूर्ध्नि बद्धाञ्जलिर्नृपः ।
यथास्थानं स्थितः स्वामिमुखलीनविलोचनः ॥३९४॥

मालवकैशिकीमुख्यग्रामरागानुरागया ।
संस्कारवत्त्वप्रभृतिपञ्चत्रिंशद्गुणस्पृशा ॥३९५॥
नरतिर्यक्सुरश्रेणीवाणीविज्ञानविक्रया ।
आदेशनैर्वोगामिन्या मेघगम्भीरया गिरा ॥३९६॥
निःसरद्दशनज्योतिःप्लावप्लावितदिग्मुखः ।
सर्वतः सम्मुखः स्वामी विदधे धर्मदेशनाम् ॥३९७॥
(त्रिभिर्विशेषकम्)

दानशीलतपोभावभेदैर्धर्मश्चतुर्विधः ।
सोऽप्यत्र पुण्यहीनानां कल्पद्रुरिव दुर्लभः ॥३९८॥
दानं देयं सदैवाभ्यनुष्ठानपरैरपि ।
दत्तं यदाब्दिकं दानं जिनैर्निर्णीतमुक्तिभिः ॥३९९॥
दानकल्पतरोः सार्वभौमभोगास्तु पल्लवाः ।
स्वर्भोगाः सुमनःश्रेणी महानन्दः फलोदयः ॥४००॥
वैक्रियौदारिकात् कामाद् मनोवाक्कायतस्त्रुतिः ।
कृत्वाऽनुमत्या कारित्वा ब्रह्माष्टधा भवेदिति ॥४०१॥

मन्त्रयन्त्रौषधासाद्धा दधाः प्रत्यक्षता क्षणात् ।
यान्ति नूनं ब्रह्मचर्यचर्याचर्येषु देहिषु ॥४०३॥
व्याघ्रोरगजलव्यालज्वलनादिसमुत्थिता ।
भीतिर्भीतेव शीलैकलीलातो याति दूरतः ॥४०४॥
नयभिर्गुप्तिभिर्गुप्तं यैः शीलं परिशीलितम् ।
मुक्तिसीमन्तिनी तेषां स्यादवश्यं वशंवदा ॥४०५॥
निकाचितानां दुष्कर्ममर्मणामपि भेदकम् ।
दुःखसाध्यं हीनसत्त्वैस्तपो द्वादशधा स्मृतम् ॥४०६॥
संन्यासानौदर्यवृत्तिसंक्षेपा रसवर्जनम् ।
संलीनता तनुक्लेशः षोढेव बाह्यकं तपः ॥४०७॥
प्रायश्चित्तं च व्युत्सर्गः स्वाध्यायो ध्यानपद्धतिः ।
वैयावृत्त्यं च व्युत्सर्गः षोढेत्याभ्यन्तरं तपः ॥४०८॥
तपो द्वादशधाऽप्येतद् निर्निदानं निषेवितम् ।
निदानं निर्वृतेर्दाने स्यादवश्यं शरीरिणाम् ॥४०९॥
दुष्कुलकलङ्कितानां दुस्तपं तपतां तपः ।
निर्जराः क्रियन्ते यतनैः कीर्तिता [illegible] ॥४१०॥

विना तपः पृथग्भावो न भवेज्जीवकर्मणोः ।
विना कृशानुमकृशं स्वर्णपाषाणयोरिव ॥४११॥
एकत्वाशुच्यन्यशरणजगदाश्रवसम्वराः ।
भवोऽनित्यत्वमन्यत्वं बोधिर्धर्मश्च निर्जरा ॥४१२॥
दानशीलतपोधर्मसाफल्यैकनिबन्धनम् ।
मता द्वादशभेदास्तैर्भावना भवनाशकृत् ॥४१३॥ (युग्मम्)
विना भावं क्रियाकर्म कायक्लेशाय केवलम् ।
विना जीवं हि कोदण्डदण्डो भाराय भूभुजे ॥४१४॥
भावस्यैव हि मुख्यत्वमावश्युधर्मकर्मणि ।
क्रियां कुर्वन्नप्यभव्यो नाऽपुनर्भवतां भजेत् ॥४१५॥
जीवध्वंसेऽपि यद् बन्धो न स्यात् प्रशमशालिनाम् ।
प्रामाण्यं तत्र भावस्य न पुनः कायकर्मणः ॥४१६॥
भावप्रसादतः पापकर्माणि प्रचुराण्यपि ।
क्षणादेव विलीयन्ते वायोरिव पयोमुचः ॥४१७॥
मानुष्यमुख्यसामग्री समग्राऽपि शरीरिणाम् ।
चतुर्विधेऽपि धर्मे स्यादसाधारणकारणम् ॥४१८॥
तथापि दश दृष्टान्तैर्भोजनप्रमुखैः खलु ।
भवेऽस्मिन् मानुषं जन्म मरौ वारिवद् दुर्लभम् ॥४१९॥
तत्रापि च सदाचाराचार्यदेशविचारभूः ।
वार्धौ द्वीपमिव भवे आर्यनीवृत् सुदुर्लभः ॥४२०॥
तथापि धर्माऽधर्मादिविद्याविधुरा नृणाम् ।
छायेव पथि पान्थानां दुर्लभा जातिरुत्तमा ॥४२१॥
धर्मकर्मविनिर्माणेऽलंकर्मीणी शरीरिणाम् ।
स्यादक्षेऽक्षयता साक्षात् तथापि खलु दुर्लभा ॥४२२॥
मानुष्यादिकसम्प्राप्तिसफलीकारकारणम् ।
तथाऽप्यायुः सुदुष्प्रापमन्धकारे प्रदीपवत् ॥४२३॥
स्वयं तरंस्तारयंश्च परान् सन्मार्गदर्शकः ।
दुष्प्रापः कथकः पाथःपतौ पोत इवाङ्गिनाम् ॥४२४॥
तत्राप्यलभ्यं सिद्धान्तवार्धिमध्योपतस्थुषाम् ।
हेयाऽऽदेयादिवस्तूनां श्रवणं श्रवणामृतम् ॥४२५॥
तत्राप्यनन्यसामान्या श्रद्धा स्यादतिदुर्लभा ।
सैव यद् धूर्तहार्येत नितान्तं धर्मकर्मणि ॥४२६॥
तत्रापि खलु दुःसाध्या विरतिः रतिरद्भुता ।

यां विना पूर्वयोगोऽसौ निस्तुषोऽपि तुषायते ॥४२७॥
साधुमार्गाऽविरतानां सम्यक्सम्यक्त्वशालिनाम् ।
न प्रमत्तैरतो माऽयं धर्मे शर्ममये जनाः ! ॥४२८॥
एवं कर्णपुटैर्याचं धार्यंयमशिरोमणेः ।
पपुः सर्वेऽपि पार्षद्या येनकामामिधेनकाः ॥४२९॥
निःसरन्तो गिरां पूरा भेजिरे भगवन्मुखात् ।
पीयूषे पुष्करावर्त्तप्रवाहा इव पीवराः ॥४३०॥
श्रुत्वेयं देशनां स्वामिमुखाम्भोजसमुद्भवाम् ।
सर्वसावद्यविरतिर्विरतैः कैश्चिदाददे ॥४३१॥
देशतो विरतिः कैश्चित् कैश्चित् सम्यक्त्वमुत्तमम् ।
कैश्चिद्भद्रकता भाविभद्राऽमुत्र परत्र च ॥४३२॥ (युग्मम्)
रोहणादिव रत्नाली स्वामिनो धर्मपद्धतिः ।
स्वोपमाग्यानुसारेणाऽऽददे पर्षज्जनैस्तदा ॥४३३॥
मूर्त्तोऽनुप्रोऽर्थसमस्य हृदये दर्पणोपमे ।
यमोऽसौ धर्मरागोक्तः सम्प्रासः प्रतिबिम्बताम् ॥४३४॥
राज्यं दत्त्वाऽथ मेनोऽथ हस्तिसेनाय सूनवे ।
मुक्तिसीमन्तिनीदूती दीक्षां संवेगतोऽग्रहीत् ॥४३५॥
कामादयोऽप्रमादस्तोमैस्तद्दानाद् मुदे व्यधात् ।
स्वामी सर्वत्र महतः किं पुनः स्वपरिच्छदे ? ॥४३६॥
आर्यदत्त आर्यघोषो वसिष्ठो ब्रह्मनामकः ।
सोमश्च श्रीधरो वारिषेणो भद्रयशा जयः ॥४३७॥
विजयश्चेति नामानो द्वीपे पुण्योत्तमाः ।
पुरवराः प्राग्भवेऽभूवन् प्रोचिवांसः प्रभुं प्रति ॥४३८॥ (युग्मम्)
स्वार्थविनयप्रत्यक्षतुर्गतिकृतचेतसः ।
नाथ ! त्वां शरणाः स्मो महानुप्रविशाध्वगाः ॥४३९॥
संसृतिभ्याः स्मो भवाम्बुधिलक्तोलसङ्कुलात् ।
अस्तारोग इव महामेघदर्शनयतो वयम् ॥४४०॥
महामन्त्रमहाज्ञानदायक ! दिवानिशम् ।
संसारकल्पात् सद्यस्तराम् प्रभो ! तारय तारय ॥४४१॥
इत्युक्तः पुरुषश्रेष्ठैर्भिः परमेश्वरः ।
ददौ तेभ्यः सहजम्बूद्वीपभूषणमिव व्रतम् ॥४४२॥
चतुर्विधस्य सङ्घस्य स्थापना विदधे विभुः ।
गणधरेष्व ममहुर्मनसूपमतस्तेषां ततः ॥४४३॥

द्रव्यरूपसनयानां नाथः कथयति स्म सः ।
उत्पादो विगमो ध्रौव्यमित्यमीषां पदत्रयीम् ॥५४४॥ (युग्मम्)
तथानु तदनुसृत्य द्वादशाङ्गीमसूत्रयन् ।
विस्तरेद् वाङ्मयं चित्ते तैलबिन्दुरिवाम्बुनि ॥५४५॥
दिव्यान् स्थालस्थितान् वासान् वासवेनप्रढौकितान् ।
अनुज्ञेयं गणभृतां मूर्ध्नि चिक्षेप सादराद् ॥५४६॥
द्रव्यैर्गुणैश्च पर्यायैरनुज्ञामानुयोगिकीम् ।
गणानुज्ञां च गणभृद्भ्यो भगवानदात् ॥५४७॥
मुनिमूर्धस्वमूर्धान्यः सुरपुष्पाभिषेचकाः ।
तदा सद्गन्धवासचूर्णैस्तूर्णमपूरयन् ॥५४८॥
वाद्यानि जगुरत्र सुरासुरनरस्त्रियः ।
मेदुरदुन्दुभयो व्योम्नि प्रतिध्वानितदिङ्मुखाः ॥५४९॥
कोलाहलं प्रवर्तन्निरमरैरसुरैर्नरैः ।
ताण्डवाडम्बरोऽभावि तदा तत्र महोत्सवे ॥५५०॥
अथैते साधुशार्दूलाः मुकुलीकृतपाणयः ।
तस्थुः छाया इव स्तब्धं प्रतीच्छन्तो गुरोर्गिरम् ॥५५१॥
पुनरासनमासीनस्तत्र चैत्यतरोरधः ।
विदधे देशनां शिक्षामयीं शिष्यपुरः प्रभुः ॥५५२॥
लोकतापापनोदाय पर्यन्ते प्रभुपादिदे ।
घटिकेवाभवत् तूर्णं संपूर्णा तत्र पौरुषी ॥५५३॥
अथ स्थालीस्थितैर्दिव्यैरखण्डैस्तण्डुलैः कृतः ।
चतुःप्रस्थमितः कादीभरतेश्वरकारितः ॥५५४॥
सदोद्यमभ्यः समवसरणं नागरैर्धृतः ।
प्रोद्यद्योतधवलः पूर्वद्वारेण प्राविशद् बलिः ॥५५५॥ (युग्मम्)
प्रभुं प्रदक्षिणीकृत्य सोऽक्षेपि पुरतो बलिः ।
स व्योमस्थाले निपतन्नर्धोऽग्राहि सुधाशनैः ॥५५६॥
अर्धः समाददे काशिपतिनाऽथनिभागसौ ।
दायादैरिव जगृहे शेषः शेषजनैः पुनः ॥५५७॥
बलेः प्रभावतो रोगाः क्षीयन्ते पूर्वसम्भवाः ।
भवाः पुनर्न जायन्ते षण्मासावधि देहिनाम् ॥५५८॥
अथोदग्द्वारमार्गेण निर्ययौ जगदीश्वरः ।
सुरकोटिवृतः स्वर्णपद्मन्यस्तपदाम्बुजः ॥५५९॥
शालयो रत्नकनकमययोरन्तरस्थिते ।

अर्हम्

अथ षष्ठः सर्गः ।

अथास्त्येषु धुमदृन्दवृतो मतिपुरन्दरः ।
पुण्यदेशामलंचक्रे द्वीपान्तरमिवांशुमान् ॥१॥
तत्राजनि सौधश्रीहसितस्वःपुरी पुरी ।
ताम्रलिप्ताभिधा पूर्वदेशोर्वीमुखभूषणम् ॥२॥
तस्यां सागरदत्ताह्वः सार्थवाहसुतोऽभवत् ।
स्मरमूर्तिरिव भाति स्म मूर्तो यस्य पुरः स्मरः ॥३॥
प्राग्भवे तु पशूयेव मूर्खेषोऽस्य पत्नुमा ।
अभ्यासक्ताऽऽस्मगं कालकूटमस्यान्यदा ददौ ॥४॥
प्रसर्पता विषेणाशु रक्षेनास्य द्विजन्मनः ।
विहिता चेतनाऽभ्राभ्रेणेव शशिनः कला ॥५॥
मग्नसंबन्धतया पुष्पंधयाऽप्येष्यती बहिः ।
हा ! रक्ताऽपि विरक्ताऽपि स्त्री भुजङ्गीव भीषणा ॥६॥
अर्धेन पतितं पीत्वा काऽपि पल्लवपल्लभा ।
संमूर्छितो विषेणैव द्राग्दशाऽऽसीत् स्वसुहृद्धिनः ॥७॥
जीवातुतुल्यया जीवि तयाऽऽलापोऽपधेः क्षणात् ।
द्विजः स्वस्त्रीचरित्रेण खिन्नोऽभून् तापसस्ततः ॥८॥
विप्रो विपद्य समये तत्रैव श्रेष्ठिसूरभूत् ।
दत्ता सागरदत्तेति पितृभ्यामभिधा शिशोः ॥९॥
दिनैः कतिपयैर्यन्मानांऽसौ स्त्रीवशंवदः ।
पुरीमासक्षर्णा स्वां पश्यन् प्राग् अनुस्मरत् ॥१०॥
इति स्मरसतो स्त्रीचरित्रापापा दुश्चेष्टितम् ।
विरक्तः सर्वथा स्त्रीषु पद्मिनीष्विव चन्द्रमाः ॥११॥
पतिव्रता गुणवाम्ता मुग्धा साऽऽसीदमायिनी ।
पुरे तत्रैव संजज्ञे कन्याऽपि श्रेष्ठिनः सुता ॥१२॥
अपेयाऽऽरण्यवद्वयपदसीर्धिका दीर्घलोचना ।
दत्ता सागरदत्ताय प्रेमसम्पत्सया दत्ता ॥१३॥
तज्जातया जनकस्तस्य भावाऽपायात सादरम् ।
दत्ती तां जनकस्तस्यालस्य साधेदापस्ये ॥१४॥
सागरस्य परं तस्या दर्शनशुद्धिं प्रमाणी ।
अतः पाणिमदेद् तस्या नादरं विदधे च सः ॥१५॥
भीतः पूर्वप्रियाभीत्या च तस्यां न जनो स्वधात् ।
सर्वस्य पुमान् नूनं स्त्रोऽपि कर्मेति यत् ॥१६॥

एतद्व्यतिकरो ज्ञात्वा धीमत्या कन्यया तया ।
तस्मै प्रेषि लिखित्वैव श्लोकस्तं सोऽप्यवाचयत् ॥१७॥
गुणाढ्यानतिशीला च शुद्धवंशसमुद्भवा ।
पुण्यैरवाप्यते धाम्नि कान्ता हस्ते धनुर्लता ॥१८॥
सागरोऽपि वाचयित्वा श्लोकमुत्पन्नधीः सुधीः ।
